ŚIṢYADHĪVṚDDHIDA TANTRA OF LALLA

PART I

CRITICAL EDITION WITH COMMENTARY

लल्लाचार्यविरचितं

शिष्यधीवृद्धिदतन्त्रम्

मल्लिकार्जुनसूरिविरचित-व्याख्योपेतम्

ŚIṢYADHĪVṚDDHIDA TANTRA OF LALLA

With the Commentary of Mallikārjuna Sūri

Critical edition with Introduction,
English Translation, Mathematical Notes and Indices

By

BINA CHATTERJEE

PART I

CRITICAL EDITION WITH COMMENTARY

INDIAN NATIONAL SCIENCE ACADEMY
NEW DELHI

Published for

THE NATIONAL COMMISSION FOR THE
COMPILATION OF HISTORY OF SCIENCES IN INDIA

By

The Indian National Science Academy
Bahadur Shah Zafar Marg, New Delhi—110 002

©

Indian National Science Academy

1 9 8 1

Price : Rs. 45/- (In India)
$ 15 (Outside)

Printed

At the Vishveshvaranand Vedic Research Institute Press, Hoshiarpur.

FOREWORD

The publication of original texts in Sanskrit, Arabic, Persian etc. and their translation into English is one of the main objectives of the National Commission for the Compilation of History of Sciences in India. Texts like *Āryabhaṭīya* with commentaries (3 vols.) and *Rasārṇava-kalpa* are some of the prestigious publications of the Commission in this direction. The present text, the *Śiṣyadhīvṛddhida Tantra* ('A Treatise for increasing the Intellect of Students') by Lalla, a very important work in astronomy in the pre-Bhāskara (II) period, belongs to this category of texts.

The work of editing and translating into English of *Śiṣyadhīvṛddhida* with critical annotations was taken up by the late Dr. (Mrs) Bina Chatterjee whose scholarship in this field is already well known. While the work of printing was in progress, and 32 pages had been printed, Dr. Chatterjee passed away in January, 1978. After her demise we took the help of two other scholars in the field, namely, Prof. K. S. Shukla and Prof. K. V. Sarma towards the publication of the work. They have taken utmost care in their work and have given dedicated service towards the press-processing, printing, proof reading, preparing indices etc. of the work. The Academy is indeed very grateful to these two scholars for their valuable co-operation in the work. Without their help, the work could not have been published so early. We hope that this publication also will receive the approbation of scholars like the other publications of the Commission.

F. C. AULUCK
Vice-chairman

National Commission
For the Compilation of
History of Sciences in India

CONTENTS

		Pages
FOREWORD —*By* Prof. F.C. Auluck	...	v
PREFACE —*By* Bina Chatterji	...	xv
INTRODUCTION		
I. Manuscript Material	...	xvii
II. Grouping of the Manuscripts	...	xxii
III. Constitution of the Text and the Commentary	...	xxv

I. मध्यग्रहाधिकारः

मङ्गलाचरणम्	...	१
ग्रहभगणाः	...	२
ग्रार्कचान्द्रदिवसाः	...	३
सावननाक्षत्रदिनानि	...	४
ग्रहसावनदिनं चान्द्रमासाश्च	...	४
ग्रधिमासास्तिथिक्षयाश्च	...	५
ग्रहयोगसंख्या केन्द्रपर्ययाश्च	...	५
ग्रहर्गणानयनम्	...	६
ग्रहर्गणानयने प्रकारान्तरम्	...	७
ग्रहानयनम्	...	९
ग्रहानयने प्रकारान्तरम्	...	१०
चन्द्रानयनम्	...	१०
रविचन्द्रानयने प्रकारान्तरम्	...	११
ग्रहानयने प्रकारान्तरम्	...	१३
वर्षाधिपानयनम्	...	१४
शुद्धघानयनम्	...	१४
ग्रहध्रुवानयनम्	...	१५
लघ्वहर्गणानयनम्	...	१६
दिनाधिपानयनम्	...	१६
लघ्वहर्गणाद् रव्याद्यानयनम्	...	१७
रव्यादीनां दिनगतयः	...	२४
देशान्तरम्	...	२६

II. स्फुटग्रहाधिकारः

जीवाः	...	२९
स्फुटचन्द्रानयनम्	...	३३

रविचन्द्रयोः स्फुटभुक्तिः ... ३४
भुजान्तरसंस्कारः अयनांशश्च ... ३४
चरानयनम् ... ३५
दिनरात्रिमानम् ... ३६
तिथ्यानयनम् ... ३७
योगानयनम् ... ३८
करणानयनम् ... ३८
दर्शकालः ... ३९

III. कुजादिस्पष्टीकरणाधिकारः

ग्रहाणां मन्दोच्चशीघ्रोच्चांशाः ... ४१
मन्दशीघ्रकर्णयोरानयनम् ... ४३
ग्रहस्फुटानयनम् ... ४३
मन्दस्फुटभुक्तिः ... ४६
शीघ्रस्फुटभुक्तिः ... ४६
चन्द्रभुक्तिः ... ४८
चन्द्रोच्चभुक्तिः ... ४८
ग्रहवक्रम् ... ५३
ग्रहाणां उदयास्तमयदिनानि ... ५७

IV. त्रिप्रश्नाधिकारः

द्वादशाङ्गुलशङ्कुच्छायातो दिग्ज्ञानम् ... ५८
विषुवच्छाया ... ६०
स्वदेशाक्षो लम्बश्च ... ६०
सममण्डलशङ्कुः तद्धृतिश्च ... ६०
चरखण्डाः ... ६१
लङ्कोदयप्राणाः ... ६१
तत्काललग्नम् ... ६२
इष्टकाललग्नम् ... ६३
द्युगतकालः ... ६३
नतिः ... ६४
मध्याह्नच्छाया मध्याह्नकर्णश्च ... ६५
मध्याह्नशङ्कुः ... ६७
मध्याह्नच्छाया कर्णश्च—प्रकारान्तरम् ... ६७
नतकालः ... ६८
इष्टकालच्छाया ... ६९
छायातः कालानयनम् ... ७१

कोणशङ्कुः ... ७२
कोणशङ्कुच्छाया ... ७४
मध्याह्नच्छायातो रविस्फुटः ... ७४
छायातोऽपक्रमः ... ७५
कोणच्छायातो रविस्फुटः ... ७७
मध्याह्नच्छायातो रविस्फुटः ... ७७
छायाभ्रमणम् ... ७९
नलकयन्त्रम् ... ८०
नतभागाः नतकालश्च ... ८४
लघुक्रियाः ... ८४

V. सोमग्रहणाधिकारः

ग्रहणसम्भावना पर्वाधिपाद्याश्च ... ८७
ग्रहणकालः ... ९०
आकाशकक्ष्या ... ९०
ग्रहभुक्तिलिप्ताः ... ९१
रविचन्द्रयोः भूमध्यान्तरम् ... ९३
भूच्छाया ... ९४
मध्यग्रहः ... ९६
ग्रहणसम्भवासम्भवः ... ९७
ग्रहणक्रिया ... ९८
ग्रहणलेखनम् ... १०३
ग्रहणवर्णः ... १०९

VI. रविग्रहणाधिकारः

रविग्रहणसाधनानि ... ११०
मध्यलग्नम् ... ११०
मध्यलग्नशङ्कुः ... १११
उदयज्या ... १११
दृक्क्षेपः ... १११
लम्बनशुद्धपर्व ... ११२
असंलक्ष्यग्रहणम् ... ११८

VII. राहुपर्वानयनाधिकारः

पर्वणि ग्रहणसम्भावना ... ११९
छायाबिम्बम् ... १२१
घटिकादिलम्बनम् ... १२१

लम्बनसंस्कृतपर्व ... १२२
स्फुटविक्षेपः ... १२२
इष्टकालग्रहणम् ... १२३

VIII. ग्रहोदयास्तमयपौर्णमासीकरणाधिकारः

ग्रहोदयास्तमयौ ... १२५
अयनसंस्कृतग्रहः ... १२६
दृक्कर्मशुद्धः ग्रहः ... १२६
स्फुटग्रहोदयास्तमयौ ... १२८
चन्द्रोदयास्तमयस्फुटकालः ... १३०

IX. चन्द्रशृङ्गोन्नत्यधिकारः

चन्द्रस्य क्रान्तिज्या दिनमानं च ... १३२
चन्द्रस्य चरार्धम् ... १३३
चन्द्रशङ्कुः ... १३४
चन्द्रच्छाया ... १३५
चन्द्रस्य शृङ्गमानम् ... १३७

X. ग्रहयुत्यधिकारः

ग्रहसमागमः ... १४५
ग्रहाणां समागमकालनिर्णयः ... १४५
ग्रहाणां युतिकालः समकालिकत्वं च ... १४७
ग्रहैस्ताराणां छादनम् ... १५०
ग्रहसमागमे स्थित्यर्धनिर्णयः ... १५०
ग्रहसमागमे दिङ्निर्णयः ... १५१
ग्रहसमागमे दृक्कर्मसाधनम् ... १५२

XI. भग्रहयोगाधिकारः

नक्षत्रभोगलिप्ताः ... १५६
ग्रहयुतिकालः ... १५८
नक्षत्राणां विक्षेपाः ... १५९
अगस्त्य-लुब्धक-अभिजितां ध्रुवविक्षेपाः ... १६०
नक्षत्राणां दक्षिणोत्तरविक्षिप्तत्वम् ... १६१
चन्द्रेण नक्षत्राणां छादनम् ... १६१
चरार्धाद् अक्षवृक्कर्म ... १६२
नक्षत्राणां उदयास्तमयकालः ... १६४
ध्रुवतारादर्शनकालः ... १६५

ध्रुवताराणामदर्शनकालः ... १६६
नक्षत्राणां विभिन्नदेशेषु दर्शनसाध्यता ... १६६
अगस्त्योदये पक्षभेदः ... १६७
मरीच्यादिमहर्षिभिर्भुक्तनक्षत्राणि ... १६७

XII. व्यतीपातवैधृत्यधिकारः

व्यतीपातवैधृतिसम्भवः ... १६९
पातमध्यकालः ... १६९
क्रान्तिसाम्यसाधनम् ... १७०
व्यतीपातवैधृतिकालः ... १७१
पातकालः तस्मिन् कर्तव्याकर्तव्यौ च ... १७३
रवीन्द्वोः पातप्रवेशनिर्गमकालः ... १७३

XIII. बीजवासनाधिकारः

लघुज्याः ... १७७
खण्डज्याः ... १७७
पिण्डज्याः ... १७८
रवीन्द्वोः स्फुटः भुक्तिश्च ... १७८
प्रकारान्तरेण मन्दफलम् ... १८१
प्रकारान्तरेण शीघ्रफलम् ... १८३
दिनप्रमाणम् ... १८५
चन्द्रविक्षेपः ... १८६
लम्बननाडिकाः ... १८७
प्रकारान्तरेण लम्बनं नतिश्च ... १८७
पुनः प्रकारान्तरेण नतिलम्बने ... १८८
दृक्फलम् ... १८९
चन्द्रशृङ्गोन्नतिः ... १९०
कविवृत्तम् ... १९४

XIV. छेद्यकाधिकारः

मङ्गलाचरणम् ... १९७
गोलप्रशंसा ... १९७
छेद्यकविधिः ... १९८

XV. गोलबन्धाधिकारः

खगोलबन्धः ... २००
भगोलबन्धः ... २०१

ग्रहगोलबन्धः ... २०२
सामान्यगोलबन्धः ... २०३

XVI. मध्यगतिवासनाधिकारः

सावनदिनादिमानम् ... २०६
देशान्तरादिवासना ... २०७
चरादीनां वासना ... २०७
दृक्कर्मवासना ... २०९
ग्रहणवासना ... २०९
चन्द्रादीनां सितासितवासना ... २१०
ग्रहबिम्बदर्शनवासना ... २११
दृक्कर्मसंस्कारवासना ... २१२

XVII. भूगोलाध्यायः

भूगोलस्वरूपम् ... २१३
भुवः केन्द्राकर्षणशक्तिः ... २१४
भुवो धारणशक्तिः ... २१४
भूतलमानम् ... २१४
भुवश्चतुर्थभागे चतुर्नगर्यः ... २१५

XVII. ग्रहभ्रमसंस्थानाध्यायः

सप्त वायवः ... २१६
भूभ्रमणम् ... २१६
भुवो विन्यासः ... २१७
रविचारः ... २१८
चन्द्रचारः ... २१९
ब्रह्मणो दिवसः, जगतः सृष्टिक्षयौ च ... २२०
लोकोपदेशः ... २२१

XIX. भुवनकोशः

सप्तसमुद्राः ... २२३
पाताललोकः ... २२४
पर्वताः ... २२४
इन्द्रादीनां स्थानादयः ... २२७
भारतभागाः ... २२८
भुवोपरिभुवः ... २२८

ध्रुवः ... २२९
ग्रहचारः ... २२९
अवन्तिपुरी समरेखा च ... २३०
चन्द्रचारः ... २३०
धिष्ण्यमण्डलम् ... २३०
सुराणां विशेषः ... २३०
एको रविर्दीपकः ... २३१

XX. मिथ्याज्ञाननिराकरणम्

मिथ्याज्ञाननिराकरणप्रयोजनम् ... २३२
मिथ्याज्ञानानि ... २३२
अयनोपरिमिथ्याज्ञाननिराकरणम् ... २३३
निशासम्बन्धिमिथ्याज्ञाननिराकरणम् ... २३३
मेरुसम्बन्धिमिथ्याज्ञाननिराकरणम् ... २३४
पितृणां चन्द्रदर्शनम् ... २३४
ग्रहणसम्बन्धिमिथ्याज्ञाननिराकरणम् ... २३४
रवेरधश्चन्द्र इति निरूपणम् ... २३५
चन्द्रसम्बन्धिमिथ्याज्ञाननिराकरणम् ... २३५
भूरनन्तेतिमिथ्याज्ञाननिराकरणम् ... २३६
भूः समतलेतिमिथ्याज्ञाननिराकरणम् ... २३७
भुवश्चलनोपरि मिथ्याज्ञाननिराकरणम् ... २३७
भुव आधारसम्बन्धिमिथ्याज्ञाननिराकरणम् ... २३८
भुवश्चलननिराकरणम् ... २३८
रविचन्द्रद्वितयमिथ्याज्ञाननिराकरणम् ... २३९
भुव आकाशसंस्थाननिरूपणम् ... २३९
भुवः सृष्टिनिरूपणम् ... २३९

XXI. यन्त्राध्यायः

भूभगोलरचना ... २४१
घटिकायन्त्रम् ... २४२
नरकूर्ममयूरादियन्त्राणि ... २४३
चक्रयन्त्रम् ... २४३
धनुर्यन्त्रम् ... २४४
कर्तरीयन्त्रम् ... २४४
कपालयन्त्रं पीठयन्त्रं च ... २४४
भगणयन्त्रम् ... २४५

शङ्कु: ... २४५
घटीयन्त्रम् ... २४६
शलाकायन्त्रम् ... २४६
शकटयन्त्रं; यष्टियन्त्रं च ... २४७

XXI. प्रश्नाध्याय:

देशान्तरादिसंस्कारा: ... २४९
दिनवृद्धिक्षयौ ... २४९
राश्युदय: ... २४९
राशीनां दृश्यत्वं चन्द्रदर्शने वैविध्यं च ... २४९
सूर्यग्रहणे लम्बनतिसंस्कारौ ... २५०
रवेर्दिनमानम् ... २५०
त्रिप्रश्न: ... २५०

APPENDICES

I. Index of Authorities cited ... २५३
II. Index of Half-verses ... २५४
III. Errata ... २७९

PREFACE

The first time I had a glimpse of Lalla's *Śiṣyadhīvṛddhida* was in 1937 when I began studying Indian astronomy and mathematics with Pandit Muralidhar Thakur. Since then, while at Oxford preparing a critical edition of the *Khaṇḍakhādyaka* by Brahmagupta, I cherished the intention of editing the *Śiṣyadhīvṛddhida* after completing the work in hand. Under the auspices of the International Federation of University Women, whose Fellowship I held from 1941-43, my main subject for study was Indian and Greek trigonometry and planetary motions. However, I managed to glance through the *Śiṣyadhīvṛddhida* as well, though perfunctorily.

The *Khaṇḍakhādyaka* was published by me in October 1970 and, soon after, my study of the *Śiṣyadhīvṛddhida* commenced. This plan was facilitated by the timely financial assistance extended to me by the Indian National Science Academy with effect from November 1971, for which I am extremely grateful to the Academy.

The *Śiṣyadhīvṛddhida* had already been published by Sudhakara Dvivedi in A.D. 1886, but that edition was based only on one manuscript and could not, therefore, be called a critical edition. The present edition has been prepared after collating twenty manuscripts, of which one is from the Bodleian Library, Oxford, and another from the Statsbibliothek, Berlin (W. Germany). The remaining manuscripts are from different libraries in India. The present edition gives also the commentary by Mallikārjuna Sūri, available only for the First Part. The translation provided is intended to give an intelligible rendering of the text and the Notes to interpret, in terms of modern

science, the mathematical calculations involved in the textual verses.

I take this opportunity to express my gratitude to Professor David Pingree, Brown University, U.S.A., who after learning that I desired to bring out an edition of the *Śiṣyadhīvṛddhida*, very kindly sent me a list of the manuscripts of the work. I thank all the libraries which extended their cooperation not only by sending me copies of the manuscripts required but also by making it possible for me to visit those institutions to collect materials for my study. I am also grateful to Dr. K. S. Shukla, Professor of Mathematics, Lucknow University, who was always ready to help me to solve my difficulties with the text. I must also mention with gratitude the assistance offered by Dr. M. L. Sharma, Head of the Department of Astronomy, Sampurnanand Sanskrit Vishvavidyalaya, Varanasi, in the matter of checking some of the examples in the commentary. My thanks are due also to Dr. K.V. Sarma, Director-Professor of the Vishveshvaranand Institute, Hoshiarpur, for the wholesome suggestions and advice he gave me towards the presentation of the volume.

In all humility I place this work before the learned world and fervently hope that in spite of its short-comings it will still be of some use to the study of the history of Indian astronomy.

Bina Chatterjee

New Delhi,
31st May, 1975

INTRODUCTION

Śiṣyadhīvṛddhida-Tantra of Lalla, who probably hailed from the Lāṭadeśa and lived about the 8th cent. A.D., is one of the major comprehensive treatises on Indian astronomy. The only edition of the work so far published is by Sudhakara Dvivedi in 1886. This is, however, based on one faulty manuscript, and cannot, therefore, be said to be a critical text. This is referred to in the present edition as D. A critical edition, based on all the manuscript material available, has been a desideratum. The present edition is intended to meet this requirement.

I. MANUSCRIPT MATERIAL

The undermentioned manuscripts have been collated for the constitution of the text and the commentary for this edition :

1. A_1. Ms. 5199 of the Anup Sanskrit Library, Bikaner, 26 cm. × 11 cm., Devanagari, paper, folios 104, 10 to 11 lines per page. Undated.

This MS is incomplete. It extends upto the end of *Śṛṅgonnatyadhikāra*, (ch. ix), and carries Bhāskara II's commentary on the work. The MS gives only the incipits (*pratīkas*) of the verses. Occasionally, it does not give even the incipits, though the commentary is there.

2. A_2. Ms. No. 5198 of the Anup Sanskrit Library, Bikaner. 25 cm × 11 cm., Devanagari, paper, 27 folios, 9 lines per page. Undated.

This MS has only the first section, *Gaṇitādhyāya*, which contains 13 chapters. At the end of verse 16 of the thirteenth chapter is written :

इति शिष्यधीवृद्धिदे महातन्त्रे प्रत्यब्दशुद्धिनामाधिकारस्त्रयोदशः । समाप्तिमगमत् तन्त्रं । सम्पूर्णं । शुभं ।

Then are given the verses 17-19 at the end of the chapter.

3. A_3. Ms. No. 4513 of the Anup Sanskrit Library, Bikaner. 24·5 cm × 11 cm., Devanagari, paper, 13 folios, 13-14 lines per page ; the last but one page carries only 11 lines and last page is blank. Undated.

This MS does not have *Gaṇitādhyāya* but gives the complete text of the *Golādhyāya*.

4. **B**. Ms. No. 9321 of Oriental Institute, Baroda. Devanagari, paper, 32 folios. Scribe : Moreśvara. Written in A.D. 1642.

This MS contains only the complete text of the *Gaṇitādhyaya*, in 13 chapters. At the end of the MS is written : इति श्रीभट्टत्रिविक्रमात्मज-लल्लविरचिते शिष्यधीवृद्धिदे महातन्त्रे उत्तराधिकारः ॥ छ ॥

समाप्तमिदं धीवृद्धिदं तन्त्रं ॥

शके १५६४ चित्रभानु संवत्सरे आस्विनवदि ७ भोमवासरे श्रीमद्रामेदेवज्ञात्मज-मोरेश्वर-ज्योतिर्विदा लिखितमिदं ॥

5. **Be**. Ms. from the Statsbibliothek, Berlin. Devanagari, paper. Undated.

This MS contains the *Gaṇitādhāya* only.

6. **Bo_1**. Ms. No. 360 of the University Library, Bombay. 13″ × 5¼″, Devanagari, glazed yellow paper, 19 folios, 10 lines per page. Undated.

This MS contains the *Gaṇitadhyaya* only.

7. **Bo_2**. Ms. No. 361 of the University Library, Bombay. 13¼″ × ¼8″, Devanagari, thick glazed yellowish white paper, 13 folios, 16 lines per page ; the last page has 17 lines. Written in A.D. 1777.

This MS contains the *Gaṇitadhyāya* only. At the end of the last chapter is written : इति श्रीभट्टत्रिविक्रमात्मजलल्लविरचिते शिष्यधीवृद्धिदे महातन्त्रे उत्तराधिकारः ॥ छ ॥ शके १६९८ दुर्मुखनासंवत्सरे भाद्रपदकृष्णचतुर्दश्यां भृगुवासरे समाप्तं ॥छ॥ अयं शककालो मूलपुस्तकस्य ॥

8. **Bod**. Ms. No. Chandra Shum Shere d. 806 of the Bodleian Library, Oxford. Devanagari. Undated.

This MS gives both *Gaṇitādhyaya* and the *Golādhyāya*.

9. M_1. Ms. SB 608 of the Oriental Research Institute, Mysore. Kannada, 19 cm. × 14 cm., paper, 93 folios, 30 lines per page. Undated.

This MS contains only the *Gaṇitādhyāya* but contains the commentary of Mallikārjuna Sūri.

10. M_2. Ms. No. of the Oriental Research Institute, Mysore. Grantha, 37.5 cm. × 3.5 cm., palmleaf, Śrītāla, 188 folios, 6 lines per page. Undated.

This MS contains only the *Gaṇitādhyāya*, but with the commentary by Mallikārjuna Sūri.

11. M_3. Ms. No. SB 607/2 of the Oriental Research Institute, Mysore. Kannada, 19.5 cm × 15 cm., paper, 18 folios, 23 lines per page, with only 3 lines on the last page. Undated.

This MS gives the text of *Gaṇitādhyāya* only.

12. S_1. Ms. No. 9365 of the Scindia Research Institute, Ujjain. Devanagari, 32.5 cm. × 12 cm., paper, 57 folios, 14 lines per page. Undated.

This MS gives the text of the *Gaṇitādhyāya* up to *Śṛṅgonnatyadhikāra* (ch. ix) only. Instead of complete verses, only the incipits are given. It also contains Bhāskara II's commentary. It is a very inaccurate MS. त and न, व and च etc. are confused. Conjunct letters are written incorrectly.

13. S_2. Ms. No. 9407 of the Scindia Research Institute, Ujjain. Devanagari, 35 cm. × 11 cm., paper, 16 folios, though written 17 in the MS, since folios 14 and 15 are written on the same folio. 11-12 lines per page, with only 5 lines on the last page. Undated.

This MS contains the *Gaṇitādhyāya* only. Omissions and corrections are written in the margin in the same hand. Occasionally the verses are wrongly numbered.

14. S_3. Ms. No. 12951 of the Scindia Research Institute, Ujjain. Devanagari, 33·5 cm. × 10·5 cm., paper, 3 folios, 10 lines per page, with only $2\frac{1}{2}$ lines on the last page. Undated.

This MS gives the incipits of verses i. 1-10 of the text, with Bhāskara's commentary. It then breaks off. It is identical with S_1, in contents, but there are several mistakes.

15. S_4. Ms. 12605 (a) of the Scindia Research Institute, Ujjain. Devanagari, 33·5 cm. × 10·5 cm., paper, 2 folios, 11 lines per page. Undated.

The MS is incomplete, and contains only verses 1 to 17 of ch. i. Its actual contents are verses i. 1, 2, 3a, 4-11 ; then चन्द्रज्ञ ··· मानुषाणि ; then, i. 12-16 ; then मासा ··· इत्यहर्गणः । Then i. 17, with which the MS ends.

16. S_5. Ms. No. 12605 (b) of the Scindia Research Institute, Ujjain. Devanagari, 33·5 cm. × 10·5 cm., paper, 1 folio, 12 lines per page, on the first page and 15 on the second. Undated.

It claims to be a complete MS, the colophon at the end being इति शिष्यधीवृद्धिदमहातन्त्रः समाप्तः ॥ But it has only just a few verses of the first three chapters of *Gaṇitādhyāya*. Its contents are :

Text verses i. 1, 2, 3, 4a ; then चन्द्रज्ञ ··· परिभ्रमन्ति, अतोऽहर्गणोऽर्ध-रात्रौ भवति । Then i. 42, 43 ; Then ii. 9 b, दिवाकरोच्चं भुजगाचला लवाः । Then ii. 11 ; xi. 21, 22 ; xiii. 16 b, हततुषाष्टयवाङ्गुलसिद्धये । इति षडङ्गुलमानं । Then xiii. 17-19 ; then आदौ ··· कुसांवत्सराः । Then इति शिष्यधीवृद्धिदतन्त्रः समाप्तः । Again, on the same page, iii. 7-8, 11-19 ; then शीतमरीचिसंज्ञा । Then iii. 2. The MS ends with this.

17. V_1. Ms. No. 37071 of the Sampurnanand Sanskrit Vishvavidyalaya, Varanasi. Devanagari, 34·5 cm. × 13·5 cm., paper, 136 folios, 9 lines per page. Date 1883.

The MS begins with i. 17. It, however, gives the text of both the *Gaṇitādhyāya* and *Goladhyāya*, and Bhāskara's commentary, till the end of the *Śṛṅgonnatyadhikāra* (ch. ix) of the first section. After this is written :

श्रीभास्कराचार्यकृते शिष्यधीमहातन्त्रविवरणे शृंगोन्नत्यध्यायः समाप्तः । अथातो ग्रहयुत्यधिकारस्य मूलमेव लिख्यते । टीका तु प्रत्यन्तरात् लेख्या ॥

Then are written the next two chapters of *Gaṇitādhyāya* and the first six verses of the twelfth chapter. The MS then breaks off. Then start folios 1-17 giving the text of *Golādhyāya*, without any commentary. At the end of the MS is written :

इति श्रीलल्लाचार्यविरचितो गोलाध्यायः समाप्तः ॥ श्री संवत् १९४० ज्येष्ठकृष्ण १ भौमवासरे शुभं भूयात् । श्रीरामः ॥

18. V_2. Ms. No. 35743 of the Sampurnanand Sanskrit Vishvavidyalaya, Varanasi. Devanagari, 23 cm. × 11 cm., paper, 24 folios, 11-12 lines per page, 13 lines on the last page. Scribe : Tryambaka. Written in A.D. 1607.

This MS gives the text of *Gaṇitādhyāya* only. After xiii. 16 of the text, it gives the following colophon : इति श्रीलल्लाचार्यविरचिते प्रत्यब्दशुद्धिस्त्रयोदशः ॥

Then in a new chapter are inserted the two verses शाके ·····वृद्धिम् and then *xiii.* 17-19. The last colophon is :

इति श्रीलल्लकृते शिष्यधीमहातन्त्रे अयनसंस्काराध्यायः चतुर्दशः ॥

शके १५२९ कार्तिककृष्णाष्टम्यां ज्योतिर्वित् पुंडरीकसुतत्र्यंबकेणेदं पुस्तकमालेखि । श्रीरस्तु ।

चापघ्नपरिधिश्चापवर्गोना व्यासताडिता ।
वृत्तार्धोत्क्रमचापार्धकृत्यैक्याप्ता तु सिंजिनी ॥

परिधि १८० । चाप ९० । व्यास १२० । वृत्त १८० ।

Then the MS ends.

19. V_3. Ms. No. 59210 (known also as Ms. 140) of the Sampurnanand Sanskrit Vishvavidyalaya, Varanasi. Devanagari, 24 cm. × 10 cm., 53 folios, 7 lines per page, with only 5 lines on the last page. Scribe : Muṭhāṅ Kobirāmaṇa Parama. Written A.D. 1837.

This MS gives the text of the *Gaṇitādhyāya* only. The last colophon is :

इति श्रीभट्टत्रिविक्रमसूनु आर्यभटशिष्यलल्लविरचिते आर्यभटसिद्धांततुल्ये लल्लसिद्धांते शिष्यधीवृद्धिदतन्त्रे उत्तराधिकारश्चतुर्दशः ॥ इति गणिताध्यायः सम्पूर्णः ॥

अथास्याग्रे गोलाध्याय: ।। संवत् १८९४ । शाके १७५९ । कीलक नाम संवत्सरे । माघशुक्ल १० । रवौ वासरे । मुठाङ् कोविरामण परमसुषन लीक्षि कोटामध्ये ।।

गोकुलनाथजी कुलषीदनी ।।

20. V_4. Ms. No. 707687 (known also as No. 1'111) of the Sampurnanand Sanskrit Vishvavidyalaya, Varanasi. Devanagari, 34 cm.×13 cm., paper, three sets of folios numbered 1-67, 1-60, 1-15 ; 9 lines per page. Undated.

This MS gives *Gaṇitādhyāya* only with Bhāskara's commentary till the end of *Śṛṅgonnatyadhikāra* (ch. ix). Its three sets of folios are written in three different hands.

The MS agrees with V_1, i.e., MS No. 37101. It also begins with i. 17. Even the mistakes are repeated here. It, however, does not have the *Goladhyāya*.

II. GROUPING OF THE MSS

Group A : Sixteen of the twenty MSS noticed above can be divided into four groups. The first group consists of MSS M_1, M_2, M_3, A_1, S_1 and S_3.

The MSS M_1 and M_2 give the complete text of the *Gaṇitādhyāya* with the commentary of Mallikārjuna Sūri. They are identical in contents, though the grammatical and orthographical errors in them are not the same. One does not appear to be the copy of the other.

MSS A_1 and S_1 also give the text of the *Gaṇitādhyāya* but only till the end of the ninth chapter, *viz.*, *Śṛṅgonnatyadhikāra*. The complete verses of the text are not given. Only the incipits are given. In addition, the MSS give the commentary by Bhāskara II till the end of the chapter. The texts of *Gaṇitadhyaya*, as judged from the incipits, are the same in both these MSS, excepting in one case. The texts of the commentary are also the same but for some omissions and orthographical and grammatical mistakes. It is, however, not possible to say whether one is a copy of the other.

MSS A_1 and S_1, are identical as regards the contents of the text of the *Gaṇitādhyāya* with those in the MSS, M_1 and M_2. Only, in

chapters v and ix, A_1 omits one verse each and S_1 omits one verse in v and two verses in ix ; that is, whereas M_1 and M_2 contain 322 verses, A_1 and S_1 give only 320 and 319 verses, respectively. It must however, be noted that occasionally the incipits are missing in A_1 and S_1, but the respective commentaries are given. Such omissions may perhaps be put down as errors on the part of the scribes.

The contents and arrangement of the text in M_3 are exactly the same as in MSS M_1 and M_2, the difference being that M_3 does not give the commentary. It is certain that all these have the same source. M_3 has been copied from a MS containing the commentary of Mallikārjuna Sūri, because at so many places it has copied verses from the commentary and introduces them as such. These have been indicated in the *apparatus criticus*.

S_3 with only 3 folios is identical with S_1 in contents but the grammatical and orthographical mistakes are different. It may not be a copy.

M_1, M_2, M_3, A_1, S_1 and S_3 have therefore been grouped together.

Group B : The next group contains the MSS A_2, B, Be, Bo_1, Bo_2, S_2, V_2 and V_3. All these give the text of *Gaṇitādhyāya* only with no commentary. But the most important point to note is that these MSS have more verses in the first chapter than the MSS in the first group. These extra verses numbering 24 appear in almost all the MSS of this group. Most of these are found in Dvivedi's edition also. The contents of the remaining chapters are the same, excepting that five extra verses are found in some of these MSS. Occasionally, the arrangement in a MS of this group may differ from the text edited. All these extra verses are given in the *apparatus criticus*. Some of them, as will be seen, are definitely explanatory and may have been copied from other texts. But others like '*śāke*' and '*stamberama*', do not appear to be explanatory. In view, however, of these extra verses, mostly occurring only in the first chapter, it cannot be said that the first group of MSS forms the shorter recension and the second, the longer. The difference is not marked enough to warrant such a distinction.

MS Bod. is the only MS which gives the complete text of *Gaṇitādhyāya* and *Golādhyāya*. It gives the extra verses of the MSS in group B. It is identical in contents and arrangement with those in the printed edition. There are, however, some differences in the orthographical and grammatical errors.

MS A_3 gives the *Golādhyāya* only. The contents are the same as those in Bod. A_3, however, has innumerable mistakes of all kinds.

Group C : V_1 and V_4 form the third group. It has the first nine chapters of *Gaṇitādhyāya* as edited, with the commentary of Bhāskara II. It gives the complete verses and not the incipits only as in A_1 and S_1. It gives the extra verses of the MSS of Group Two also. But there is no commentary on these by Bhāskara. After the ninth chapter, there are the next two chapters and then the first six verses of the twelfth chapter. All these have no commentary. The MS then has a lacuna. After that there is *Golādhyāya* with the same text as that in Bod. V_4 is identical with V_1. There is no doubt that it is a copy of V_1. Even the mistakes have been copied. It does not, however, have *Galādhyāya*.

Group D : S_4 and S_5 are incomplete MSS even as far as *Gaṇitādhyāya* is concerned. S_4 has only the first 17 verses of the first chapter. It is not of any consequence.

S_5 is a MS of its own kind. According to the last colophon—and this is the only colophon—it is a complete MS. As regards its contents, there are the revolutions of the planets, their arrangement in space and a part of the longitude correction ; methods to find the correct positions of planets and their motion ; the rising of Agastya and Saptarṣi ; measurement of an *aṅgula* ; and then the last few verses giving the family etc. of Lalla. It is then written that the *Śiṣyadhīvṛddhidamahātantra* is complete.

Did the originator of this MS copy only those verses which he intended for his own use ? Some of the important verses are here. Could there be other MSS of this type ? Such MSS containing only portions of the *Śiṣyadhīvṛddhida* could form a group of their own.

Of course, as has been shown above, quotations from the *Śiṣyadhī-vṛddhida* occur in other works. But a MS like S_5 has not yet come to notice.

III. CONSTITUTION OF THE TEXT AND COMMENTARY

It has already been noted above that Mallikārjuna and Bhāskara II wrote commentaries on the *ŚD*. Bhāskara's commentary extends only up to the ninth chapter of the *Gaṇitādhyāya* whereas Mallikārjuna's is complete at least on the first section. Moreover, Mallikārjuna is less known than Bhāskara. Whatever has so far been written about him is by Datta. Besides, Bhāskara's commentary is nothing like his *Vāsanābhāṣya* of the *SŚi*. If both the commentaries of the *ŚD* are compared, Mallikārjuna's is certainly the better of the two. It contains also some historical information. Both are perhaps of the same period. It was, therefore, felt that Mallikārjuna's commentary should be published.

There are only two MSS, M_1 and M_2, giving this commentary. Both the MSS show a large number of grammatical and orthographical errors ; both have the same lacunae ; both often neglect rules of sandhi ; and both have a few omissions. There is really nothing to choose between the two. M_1, however, has been selected as the basis for the text and the commentary. The variants in M_2 if any, are noted in the *apparatus criticus*.

Now, a few words on the constitution of the text of the *Golādhyāya*. All the three MSS, A_3, Bod. and V_1, give the same contents arranged in the same manner. All are equally corrupt. So no particular MS has been followed in this case. With the help of these MSS and the printed edition, the present text has been prepared. Important variants have been noted in the *apparatus criticus*.

Excepting obvious spelling and grammatical mistakes, correction or restoration in the text and commentary has been specified in the *apparatus criticus*. The construction of the sentences and the grammatical forms in the commentary including writing of numbers in words, even if not always conforming with the standard practice, are strictly preserved.

Only important variants in the other MSS and in D are given in the *apparatus criticus*. S_3 being identical with S_1 and V_4 with V_1 have not been mentioned. The contents of S_4 and S_5 are so meagre and there being no important variants, they have not been noted in the *apparatus criticus*.

An account of the contents and their arrangement in the different MSS is given, as far as possible, in the *apparatus criticus*.

An attempt has been made to reproduce the extra verses in a corrected form as far as possible, as it would have otherwise meant burdening the *apparatus criticus* with unnecessary errors probably due to the scribes.

The printed edition of the *Śiṣyadhīvṛddhida*, though full of mistakes, has been of great help in preparing this edition. Its variants have been noted in the *apparatus criticus*. Corrections in the original MSS, have been made whenever necessary, with the aid of the printed edition.

Occasionally minor metrical defects have been ignored to preserve the correctness of formulas.

ABBREVIATIONS

ĀBh	*Āryabhaṭīya*
BJ	*Bhāratīya Jyotiḥśāstra* (translation in Hindi)
BS	*Bṛhatsaṃhitā*
BSS	*Brāhmasphuṭasiddhānta*
GT	*Gaṇakataraṅgiṇī*
KK	*Khaṇḍakhādyaka*
KP	*Pūrvakhaṇḍakhādyaka*
KU	*Uttarakhaṇḍakhādyaka*
LB	*Laghubhāskarīya*
MB	*Mahābhāskarīya*
PS	*Pañcasiddhāntikā*
ŚD	*Śiṣyadhīvṛddhida*
SŚe	*Siddhāntaśekhara*
SŚi	*Siddhāntaśiromaṇi*
SS	*Sūryasiddhānta*

ROMAN TRANSLITERATION OF DEVANAGARI

VOWELS

Short :	अ	इ	उ	ऋ	ऌ		
	a	i	u	ṛ	ḷ		
Long :	आ	ई	ऊ	ए	ओ	ऐ	औ
	ā	ī	ū	e	o	ai	au

Anusvāra : ं = ṁ

Visarga : ः = ḥ

Non-aspirant : ऽ = ऽ

CONSONANTS

Classified :	क्	ख्	ग्	घ्	ङ्
	k	kh	g	gh	ṅ
	च्	छ्	ज्	झ्	ञ्
	c	ch	j	jh	ñ
	ट्	ठ्	ड्	ढ्	ण्
	ṭ	ṭh	ḍ	ḍh	ṇ
	त्	थ्	द्	ध्	न्
	t	th	d	dh	n
	प्	फ्	ब्	भ्	म्
	p	ph	b	bh	m

Un-classed :	य्	र्	ल्	व्	श्	ष्	स्	ह्
	y	r	l	v	ś	ṣ	s	h

Compound :	क्ष्	त्र्	ज्ञ्
	kṣ	tr	jñ

लल्लाचार्यविरचितं

शिष्यधीवृद्धिदतन्त्रम्

मल्लिकार्जुनसूरिकृतव्याख्यानसहितम्

गणिताध्याये मध्यग्रहाधिकारः

प्रथमोऽध्यायः

[मङ्गलाचरणम्]

श्रीमत्सुरासुराराध्यचरणाम्बुरुहद्वयाम् ।
चराचरजगद्धात्रीं चण्डिकां प्रणमाम्यहम् ॥
सर्वज्ञनङ्गनार्याणामनुजो मल्लिकार्जुनः ।
प्रवक्ष्ये शिष्यधीतन्त्रटीकां स्पष्टां यथार्थतः ॥

नत्वा ब्रह्महरित्रिनेत्रदिनकृच्छीतांशुभूनन्दन-
प्रालेयांशुसुतेन्द्रमन्त्रिभृगुजच्छायासुतेभाननान् ।
आचार्यार्यभटोदितं सुविषमं व्योमौकसां कर्म य-
च्छिष्याणामभिधीयते तदधुना लल्लेन धीवृद्धिदम् ॥ १ ॥[1]

विज्ञाय शास्त्रमलमार्यभटप्रणीतं
तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः ।
कर्मक्रमो न खलु सम्यगुदीरितस्तैः
कर्म ब्रवीम्यहमतः क्रमशस्तदुक्तम् ॥ २ ॥[2]

इत्थं वृत्तद्वये प्रथमार्धे ब्रह्मविष्णुमहेश्वरान् भास्करादिग्रहान् गणेश्वरं च नमस्कृत्य, द्वितीयार्धे ग्रहगणितस्य वैषम्यं संसूच्य, तृतीयार्धे स्वस्य

मूलम्—1. All MSS except A_3 and V_1 begin the text with this verse. A_3 gives only Golādhāya. V_1 begins with verse 17.

2. D_5 V_3 ०स्तु सूक्तम् ।

शास्त्रकर्तृत्वमुत्पाद्य, चतुर्थार्धे लल्लाचार्यः शिष्याणां बुद्धिवृद्धिदं ग्रहगणितं क्रमशः करोमीति प्रतिज्ञां कृतवान् ॥ १-२ ॥

[ग्रहभगणाः]

दन्ताब्धयोऽयुतहता युगवत्सराः स्युः
सूर्यज्ञशुक्रभगणा अपि तत्समानाः ।
तावन्त एव कुजजीवशनैश्चराणां
शीघ्राख्यतुङ्गभगणा गणकैर्निरुक्ताः ॥ ३ ॥

चन्द्रस्य षड्गुणसुरेष्वचलाद्रिबाणा[1]
भौमस्य सङ्कृतिगजाङ्कनवाश्विदस्राः ।[2]
प्रालेयरश्मितनयस्य चलोच्चचक्रा-
ण्ययभ्राक्षिखाद्रिगुणनन्दतुरङ्गचन्द्राः ॥ ४ ॥

जीवस्य सागरयमाश्विकृताङ्करामाः[3]
शीघ्रोच्चपर्ययमितिर्भृगुनन्दनस्य ।
वस्वष्टरामयमनेत्रवियत्तुरङ्गा
मन्दस्य सागररसेषुरसाब्धिचन्द्राः ॥ ५ ॥[4]

इति वृत्तत्रये ग्रहभगणाः कथ्यन्ते । कथमित्युक्ते । कृतयुगाब्दाः सप्तदशलक्षा अष्टाविंशतिसहस्राणि, १७२८००० । त्रेतायुगाब्दा द्वादशलक्षाः षण्णवतिसहस्राणि च, १२९६००० । द्वापरयुगाब्दा अष्टौ लक्षाश्चतुःषष्टि सहस्राणि, ८६४००० । कलियुगाब्दा लक्षचतुष्टयं द्वात्रिंशत्सहस्राणि, ४३२००० । एतद्युगचतुष्टयं युगमित्युच्यते । इत्थं युगाब्दसङ्ख्या त्रिचत्वारिंशल्लक्षा विंशतिसहस्राणि च, ४३२०००० । अस्मिन् युगे रविबुधशुक्राणां भगणसङ्ख्या तुल्यैव । भौमगुरुसौरीणां शीघ्रोच्चभगणसङ्ख्यापि

मूलम्—1. A_2. Bc. BO_1. BO_2. Bod. D. S_2. V_2. V_3 ०रेषुनगाद्रि०

2. BO_2 नवद्विदस्राः ; V_2 ०नवाब्धिदस्राः

3. S_2 ०युरमा०

4. Wrongly numbered 4 in V_2. The error continues.

तुल्यैव। युगे चन्द्रभगणाः पञ्चकोट्यः सप्तसप्ततिलक्षास्त्रिपञ्चाशत्सहस्राणि त्रिशतानि षट्त्रिंशच्च, ५७७५३३३६। भौमभगणा द्वाविंशतिलक्षाः षण्णवतिसहस्राण्यष्टौ शतानि चतुर्विंशतिश्च, २२९६८२४। बुधशीघ्रोच्चभगणा एका कोटिरेकोनाशीतिलक्षाः सप्तत्रिंशत्सहस्राणि विंशतिश्च, १७९३७०२०। गुरुभगणा लक्षत्रयं चतुःषष्टिसहस्राणि द्वे शते चतुर्विंशतिश्च, ३६४२२४। शुक्रशीघ्रोच्चभगणाः सप्ततिलक्षा द्वाविंशतिसहस्राणि त्रीणि शतान्यष्टाशीतिश्च, ७०२२३८८। शनैश्चरभगणा एकलक्षः षट्चत्वारिंशत्सहस्राणि पञ्चशतानि चतुःषष्टिश्च। १४६५६४॥ ३-५॥

पातस्य षड्द्वियमदन्तयमा विलोमा
गोकुद्विवस्वहियुगानि मृदूच्चमिन्दोः।
अङ्गामरानलनवेषुभुवोऽधिमासाः
खाष्टेषुपक्षवसुखेषुयमाः क्षयाहाः॥ ६॥

पातो राहुः। तस्य प्रत्यग्गतिभगणा लक्षद्वयं द्वात्रिंशत्सहस्राणि द्वे शते षड्विंशतिश्च, २३२२२६। चन्द्रोच्चभगणा लक्षचतुष्टयमष्टाशीतिसहस्राणि द्वे शत एकोनविंशतिश्च[1], ४८८२१९। युगेऽधिकमासाः पञ्चदशलक्षास्त्रिनवतिसहस्राणि त्रीणि शतानि षट्त्रिंशच्च, १५९३३३६। युगे तिथिक्षयाः कोटिद्वयं पञ्चाशल्लक्षा द्व्यशीतिसहस्राणि पञ्चशतान्यशीतिश्च, २५०८२५८०॥ ६॥

[अर्कचन्द्रदिवसाः]

व्योमाक्षिपञ्चविषयेषुभुवोऽयुतघ्नाः
प्रोक्ता युगेऽर्कदिवसाः खगुणोद्धृतास्ते।
मासाः स्युरभ्रवसुखाम्बरखाभ्रवह्नि-
व्योमाङ्गशीतकिरणा दिवसा हिमांशोः॥ ७॥

रविभागा एव रविदिवसाः। [2]रविदिवसा युगे[2] १५५५२००००। युगे चान्द्रदिवसा एते १६०३०००८०॥ ७॥

व्याख्या—1. M_1. M_2. एकोनत्रिंशच्च

2. M_1. om. र—गे। Restored from M_2.

[सावननाक्षत्रदिनानि]

व्योमाभ्रबाणतुरगक्षितिनन्दशैल-
क्ष्माभृच्छिलीमुखभुवः क्षितिवासराः स्युः ।
पूर्णाभ्रसायकशिलोच्चयरामदस्र-
द्वीभेषुशीतकिरणा भपरिभ्रमाः स्युः ॥ ८ ॥[1]

युगे सूर्योदया एव भूदिवसाः, कोट्यः सप्तपञ्चाशदधिकशतमेकोनाशीतिलक्षाः सप्तदशसहस्राणि पञ्चशतानि च, १५७७९१७५०० । ज्योतिश्चक्रभ्रमणान्येव नाक्षत्रदिवसाः, कोट्योऽष्टपञ्चाशदधिकशतं द्वाविंशतिलक्षाः सप्तत्रिंशत्सहस्राणि पञ्चशतानि च, १५८२२३७५०० ॥ ८ ॥

[ग्रहसावनदिनं चान्द्रमासाश्च]

एतेषु यस्य भगणै रहितेषु शेषं
यत्तस्य तज्जगुरहर्निचयं[2] खगस्य ।
तिग्मांशुशीतकरयोर्भगणान्तरं यत्
तच्चान्द्रमासनिचयं प्रवदन्ति सन्तः ॥ ९ ॥

भभ्रमाद् रविभगणै[1]रूनितशेषं सूर्यसावनदिनानि भवन्ति । युगे यावन्त एव सूर्योदयास्तावन्त एव दिवसा इत्यर्थः । तथा चन्द्रभगणै[1]रूनितशेषं चन्द्रस्य[2] सावनदिनानि । युगे तावन्तश्चन्द्रोदया इत्यर्थः । इत्थं भौमादीनां भगणै[1]रूनितशेषं भौमादीनां सावनदिनानि । युगे तावन्तो भौमादीनां स्वस्वोदया[3] इत्यर्थः । चन्द्रभगणेभ्यो रविभगणै[1]रूनितशेषं युगचान्द्रमाससमूहो भवति ॥ ९ ॥

मूलम्— 1. After 8, V_2 has इति भगणाध्यायः । Next verse, however, is numbered 9.

2. Bod. D निचयः

व्याख्या—1. M_1. ०णैरानी०

2-2. M_1. M_2. have lacuna.

3-3. M_1. M_2. have lacuna.

[अधिमासास्तिथिक्षयाश्च]

विश्वघ्नतिग्मकरपर्ययवर्जितेषु
चक्रेषु शीतमहसस्त्वधिमासकाः[1] स्युः ।
चन्द्राहसूर्यभगणैक्यमुडुभ्रमोनं
कृत्वाथवावमसमूहमवेहि शेषम् ॥ १० ॥

चन्द्रभगणेषु रविभगणास्त्रयोदशगुणिताः शोध्याः । शेषोऽधिमासा भवन्ति । रविभगणयुक्तचान्द्रतिथिषु भचक्रभ्रमणानि संशोध्य शेषं युगे तिथिक्षया भवन्ति । इत्येवं वाधिमासास्तिथिक्षयाश्च भवन्ति ॥ १० ॥

[ग्रहयोगसङ्ख्या केन्द्रपर्ययाश्च]

या मण्डलान्तरमितिर्ग्रहयोर्द्वयोः स्यात्
सैवोभयोरपि[2] तयोर्युगयोगसङ्ख्या ।
ये स्वोच्चपर्ययनभश्चरमण्डलानां[3]
विश्लेषजास्त इह केन्द्रजपर्ययाः स्युः[4] ॥ ११ ॥

मूलम्— 1. M_1. M_2. M_3. ०स-सस्त्वधिमासशेषम्
2. A_2. B. Be, BO_1. BO_2. Bod. D. S_2. V_3 सा चोभ०
3. M_1. M_2. M_3 नीचोच्च; A_2. S_2 ये चोच्च
4. After 11, A_2. B. Be. BO_1. BO_2. Bod. D. S_2. V_3 insert,
चन्द्रज्ञभार्गवदिनेशकुजार्यसौरि-
भानि क्षितेः क्रमश ऊर्ध्वगतिस्थितानि ।
लङ्कानगर्युपरितः प्रगुणानि तानि
देशेषु तिर्यगितरेषु परिभ्रमन्ति ॥
नभोनभःपूर्णरसाचलेषुख-
द्विशैलवेदाद्रिजिनेन्दुयोजनैः ।
स्मृता खकक्षायुगमण्डलैरियं
ग्रहस्य भक्ता भवति स्वकक्षिका ॥
हिमांशुकक्षा गुणिता चतुर्घ्ना
नागै रसैर्वारिधिभिर्भुजाभ्याम् ।
(A_2. Be. यमाभ्याम्)
मानं युगानां कथितं चतुर्णां
कृतादिवर्षाण्यथ मानुषाणि ॥

द्वयोर्ग्रहयोर्भगणान्तरसङ्ख्या यावती युगे तयोर्ग्रहयोस्तावन्तो योगा भवन्ति। तद्योगसङ्ख्यया युगभूदिवसा भाज्याः। लब्धानि दिनानि यावन्ति तावद्भिर्दिनैस्तयोर्ग्रहयोः पुनर्योगो भवति।

स्वशीघ्रभगणेभ्यो ग्रहाणां स्वभगणाः शोध्याः। तच्छेषो युगे स्वशीघ्र-केन्द्रभगणाः स्युः। तैः स्वशीघ्र-केन्द्रभगणैर्भूदिवसा भाज्याः। लब्धं स्वकीय-केन्द्रदिनानि भवन्ति।

प्रसङ्गादन्यदुच्यते। युगे रविराहुभगणैक्यं द्विघ्नं युगे ब्रह्मादिपर्वगणो भवति। तत्सङ्ख्यया भूदिवसा भाज्याः। लब्धं सावनदिनानि भवन्ति। तावद्भिस्तावद्भिर्दिनैर्मुहुर्मुहुर्ग्रहणसम्भावना ज्ञातव्या। तस्माद् यावन्ति पर्वाणि तावन्तः पर्वाधिपा भवन्ति। ग्रहणान्यपि तावन्ति भवन्ति। इत्येवं कथमित्युक्ते। कानिचित् सूर्यग्रहणानि रात्रौ। कानिचित् सोमग्रहणानि दिवा। स्वदेशगण [1]·····[1] षेर्गणयोर्ज्ञातव्यानि। तानि स्वदेशक्षितिजादधःस्थितदेशेषु दृश्यन्ते। तद्देशजैस्तद्ग्रहणैः सह सङ्ख्यास्त्येव ॥ ११ ॥

[अहर्गणानयनम्]

नवाद्रिचन्द्रानल[1]संयुतो भवे-
च्छकक्षितीशाब्दगणो गतः कलेः।
दिवाकरघ्नो गतमाससंयुतः
खवह्निनिघ्नस्तिथिभिः समन्वितः ॥ १२ ॥

पृथक् [2]कृतः सङ्गुणितोऽधिमासकै-
स्ततो विभक्तो दिवसैः सहस्रगोः।
फलाधिमासैः सहितौ दिनीकृतैः
पुनः पृथक्स्थो गुणितस्तिथिक्षयैः ॥ १३ ॥

मूलम्— 1. M_1. M_2. M_3 ०नलचन्द्रसंयुतो
2. Bod. D. ततः

व्याख्या—1. M_1. M_2. have lacuna.

निशाकराहैः स हृतः[1] फलावमै-
र्विवर्जितोऽर्काभ्युदयादहर्गणः ।
भवत्ययं भार्गववारपूर्वकः
सदैव[2] लङ्काविषये कलेर्गतः[3] ॥ १४ ॥

इति वृत्तत्रयेऽहर्गणानयनं कथयति । शकनृपाब्दगणः सहस्रत्रयेणैकोनाशीत्यधिकशतेन । ३१७९ । सहितः कलिगताब्दगणो भवति । स एव द्वादशगुणितश्चैत्रादिमाससहितस्त्रिंशद्गुणितो वर्तमानमासे शुक्लप्रतिपदादीष्टतिथिसंयुतः पृथक् कृतोऽधिमासकैर्गुणितो युगसूर्यदिवसैर्भक्तो लब्धं गताधिमासाः । ते त्रिंशद्गुणिताः । तैः सहित उपरितनराशिः । पुनः पृथक्कृतोऽवमतिथिभिर्गुणितो युगचान्द्रतिथिभिर्भक्तो लब्धं कलिगतावमदिनानि । तैर्वर्जितः कार्य उपरितनराशिः । असौ लङ्कासूर्योदये कलिगतसावनद्युगणो भवति ।

स एव पथक् सप्ताप्तशेषः शुक्रादिगतवारः । तस्माद् द्युगणादानीता दृष्टवारादुपरितनवारे सूर्योदयकालिका ग्रहा भवन्ति ॥१२-१४॥

[अहर्गणानयने प्रकारान्तरम्]

अतीतमासैः कलिजैः[4] समाहता
नवाष्टरामाङ्गयमद्विबाहवः ।
खखाभ्रपूर्णाङ्गमहीयमोद्धृता[5]
भवन्ति मासाः शशिनः कलेर्गताः ॥ १५ ॥

मूलम्— 1. V_2. विहृतः
2. M_1. M_2. M_3. तदेव
3. V_2. रवेर्गतः
4. D. इनजैः
5. BO_2. खाभ्राभ्रपू०

दिनीकृतास्ते सदिनाः शराचल-
द्विपेषुनन्दाष्टवसुस्वराहताः ।
कृताभ्रखाभ्रेषुकुखाष्टभाजिताः
फलं सरूपं द्युगणोऽथवा भवेत् ॥ १६ ॥[1]

कलिगताब्दा द्वादशगुणिताश्चैत्रादिमाससहिताः कलिगतरविमासा भवन्ति । युगचान्द्रमासा युगरविमासाश्च पृथक् पृथक् चतुर्विंशत्याप्ताच्चान्द्रमासाल्लब्धं गुणकारः । रविमासाल्लब्धं भागहारः । तत्र गुणकारो द्वाविंशतिलक्षाः षड्विंशतिसहस्राणि त्रीणि शतान्येकोननवतिश्च, २२२६३८९ । भागहारस्त्वेकविंशतिलक्षाः षष्टिसहस्राणि, २१६०००० । कलिगतरविमासाश्चान्द्रगुणकारगुणिताः सौरभागहारभक्ताः । लब्धं कलिगतचान्द्रमासाः स्युः । ते त्रिंशद्गुणिताश्चान्द्रतिथयः । अतो वर्तमानमासे शुक्लप्रतिपदादीष्टतिथिसहिताश्चान्द्रदिनराशिः स्यात् । युगभूदिवसा युगचान्द्रतिथयश्च विंशत्याप्ता भूदिनलब्धं गुणकारः । चान्द्रतिथिलब्धं भागहारः । तत्र गुणकारः सप्तकोट्योऽष्टाशीतिलक्षाः पञ्चनवतिसहस्राण्यष्टशतानि पञ्चसप्ततिश्च, ७८८९५८७५ । भागहारस्त्वष्टकोट्य एकलक्षः पञ्चाशत्सहस्राणि चत्वारि च, ८०१५००४ । तस्माच्चान्द्रदिनराशिः सावनगुणकारगुणितश्चान्द्रभागहारभक्तो लब्धं सैकं सावनद्युगणो भवति । प्रकारान्तरेण द्युगणानयनम् ।

मूलम्—1. After 16, A_2. B. Be. BO_1. BO_2. Bod. D. S_2. V_2. and after 14, V_3 insert :

मासाः पृथक् पक्षहृता अधो नृपच्छिद्राप्तहीनाः शरषड्हृतान्विताः ।
त्रिष्ठो (?द्विष्ठो) द्युराशिः कुलशैललब्ध्युग्वेदाङ्गलब्धोनित इत्यहर्गणः ॥

Then all but V_2. give 17 ; V_2. gives 15, 16, and then insert

गतावमक्ष्माहवधाच्च शेषाद्
युगावमाप्ताद् द्युगणो भवेच्च सः ।
धराहताडितमासघाता
सशेषका वा सुयुगाधिमासैः ॥

समस्तमासाः सदिना गतर्तु-
पञ्चाप्तवर्षाप्तदिनक्षयोनाः ।
जाताधिमासैः खरसाप्तहीना
विवर्जितार्काभ्युदयादहर्गणः ॥ Then occurs 17.

प्रसङ्गाज्जन्मान्तरज्ञानमुच्यते । आयुर्दायो नाक्षत्रदिनानि वर्षाणि वा । तानि युगसूर्यमासैः सङ्गुण्य युगनाक्षत्रमासैर्विभजेत् । लब्धं सूर्यवर्षादिकं स्यात् ।

तथा बृहज्जातके ।

[1]
नृणां कृतायुनक्षित्रं सूर्याब्दैर्गुणयेद्युगे ।
धिष्ण्याब्दैर्विभजेल्लब्धमायुर्जातस्य निर्दिशेत् [2] ॥

इति । तथा दशाप्रवेशकालज्ञानार्थं दशाब्दपिण्डं दिनीकृत्य युगसावनदिवसैः सङ्गुण्य युगनाक्षत्रदिनैर्विभजेत् । लब्धं सावनद्युगणो भवति । असौ जन्मकालिकाद् द्युगणे योज्यः । तस्माद् द्युगणादानीताः सूर्योदये दशाप्रवेशकालिका ग्रहा भवन्ति ॥

[ग्रहानयनम्]

अहर्गणे खेचरमण्डलाहते
क्वहोद्धृते मण्डलपूर्वको ग्रहः ।
[1]
कलीकृतेऽर्के ग्रहचक्रताडिते
[2] [3]
कलाग्रहो वा रविचक्रभाजिते ॥ १७ ॥

द्युगणः सूर्यादिभगणैर्गुणितो युगभूदिवसैर्भक्तो लब्धं भगणादिकोऽर्कादिग्रहो भवति । अथवा भगणादिको रविलिप्तीकृतश्चन्द्रादिस्वस्वभगणैर्गुणितो रविभगणैर्भक्तो लब्धं लिप्तादिकश्चन्द्रादिको ग्रहः स्यात् । असौ लिप्ताराशिश्चक्रकलाभिर्भक्तः । शेषो राश्यादिको ग्रहः कार्यः ॥ १७ ॥

मूलम्— 1. M_1. M_2, M_3 ०कृत०
2. M_1. M_2. M_3 ०होऽसौ
3. V_1 begins with 17

व्याख्या—1. M_1. M_2 गुणाङ्कृ०
2. See mathematical notes.

[ग्रहानयने प्रकारान्तरम्]

रसाद्रिबाणैर्द्युगणेऽथवाहते
नवाष्टरामाम्बरमूर्च्छनोद्धृते ।
फलं सहस्रांशुसितेन्दुनन्दना-
श्चलोच्चमारार्कजशक्रमन्त्रिणाम् ॥ १८ ॥[1]

रविभगणा भूदिवसाश्च पृथक् पृथक् खखशराचलैर्भक्ताः । ७५०० । रविभगणाल्लब्धं गुणकारः । भूदिवसाल्लब्धं भागहारः । तत्र रविभगणस्थाने गुणकारः पञ्चशतानि षट्सप्ततिश्च । ५७६ । भूदिवसस्थाने भागहारो लक्षद्वयं दशसहस्राणि त्रीणि शतान्येकोननवतिश्च । २१०३८९ । तस्माद् द्युगणे गुणकाराभ्यस्ते भागहाराप्ते लब्धं भगणादिका रविबुधशुक्राः स्युः । कुजशनिगुरूणां शीघ्रोच्चं स्यात् ॥ १८ ॥

[चन्द्रानयनम्]

भुजङ्गनन्दाष्टवसुस्वराहृते[2]
शराक्षिषड्बाणशरेन्दुलोचनैः ।
हृते[3] दिनानां निचये[4]ऽथवा भवे-
न्मृगाङ्कमूर्तिर्भगणादिकं फलम् ॥ १९ ॥

चन्द्रभगणा भूदिवसाश्च पृथक् पृथग्दन्ताचलैर्भक्ता लब्धं चन्द्रभगण-स्थाने गुणकारोऽष्टसप्ततिसहस्राण्यष्टौ शतान्यष्टनवतिश्च । ७८८९८ । भूदिवसस्थाने लब्धं भागहार एकविंशतिलक्षाः पञ्चपञ्चाशत्सहस्राणि षट्शतानि पञ्चविंशतिश्च । २१५५६२५ । तस्माद् द्युगणे गुणकाराभ्यस्ते भागहाराप्ते लब्धं भगणादिकश्चन्द्रः स्यात् ॥ १९ ॥

मूलम्— 1. After 18, V_1. V_2. ins :

रूपाग्निनिघ्नं विकलावशेषं षष्ट्याप्तशेषे विकला भवन्ति ।
हरेद्विलिप्ता गुणितेऽवशेषे षष्ट्या विभक्तेऽत्र कलावशेषम् ॥
Then 19.

2. B. Be. BO_1. BO_2. Bod. D, V_3. ०हृतः

3. B. Be. BO_1. BO_2. Bod. D. V_3 हृतो

4. B. Be. BO_1 BO_2 Bod. D. S_2. V_2. V_3 निचयो

[रविचन्द्रानयने प्रकारान्तरम्]

निशाकराब्दैरधिवत्सरैर्हता-
वहर्गणौ कुद्युहतौ फलान्तरम् ।
रविः पृथग्भिश्वहतोऽर्कसङ्गुणै-
र्युतोऽधिवर्षग्रहमण्डलैः शशी ॥ २० ॥

युगे चन्द्रवत्सराश्चतुश्चत्वारिंशल्लक्षा द्विपञ्चाशत्सहस्राणि सप्तशतान्यष्टसप्ततिश्च । ४४५२७७८ । युगेऽधिवत्सरा एकलक्षो द्वात्रिंशत्सहस्राणि सप्तशतान्यष्टसप्ततिश्च । १३२७७८ । द्युगणे युगचन्द्राब्दैर्गुणिते भूदिवसैर्भक्ते लब्धं भगणादीन्दुवर्षग्रहो भवति । पृथग् द्युगणो पुगाधिवत्सरैर्गुणितो भूदिवसैर्भक्तो लब्धं भगणादिकमधिकवर्षग्रहो भवति । तयोर्ग्रहयोरन्तरं भगणादिको रविर्भवति । असौ रविः पृथक् त्रयोदशगुणितः पुनरधिवर्षग्रहभगणादिकैर्द्वादशगुणितैर्युक्तश्चन्द्रः स्यात् ॥ २० ॥

युगाधिमासैरवमैः स्वशेषके
हरेत् फलं तत्तु पृथग्दिनादिकम् ।
षडभ्रदिग्भिः प्रथमं हृतं गृहा-
द्यथेतरत् स्वार्कलवोनितं कलाः ॥ २१ ॥

द्युगणानयनकालिकाधिमासशेषादवमशेषाच्च राश्यादि रविचन्द्रानयनमुच्यते । तत्राधिमासशेषाद्युगाधिमासैर्लब्धं पूर्वतनाधिकमासकालाद् गतदिनादिकं सौरमानं सम्भवति । तस्माद् दिनादिकाद् षडधिकसहस्रेणाप्तं । १००६ । फलं राश्यादिकं स्यात् । ततोऽवमशेषाद्युगावमदिनैर्लब्धं चान्द्रदिनादिकं स्यात् । तच्चान्द्रदिनादिकं स्वकीयद्वादशांशेन रहितं लिप्तादिकं स्यात् । इत्थमधिमासशेषफलं राश्यादिकमवमशेषफलं लिप्तादिकम् ॥ २१ ॥

रविर्मधोर्मासदिनानि भांशका
द्वितीययुक्ताः प्रथमोनिताः पृथक् ।
युतो रविघ्नैस्तिथिभिर्लवैः शशी
कलासु तत्वघ्नफलार्धसंयुतः ॥ २२ ॥

मूलम्— 1. Bod. D ०गुणो

2. After 20, V_1. V_2. ins.
हृतं धराहैरधिमासशेषं क्षयाहशेषं तु युगाधिमासैः ।
तत्संयुतिश्चन्द्रदिनैर्विभक्तैवं स्फुटं स्यादधिमासशेषम् ॥ Then 21.

चैत्रशुक्लादिगतमासा राशयः। वर्तमानमासे शुक्लप्रतिपदादितिथयो भागाः। तत्र प्रागानीतलिप्ताफलं योज्यम्। राश्यादिफलं शोध्यम्। इत्थं राश्यादिकं रविः स्यात्।

वर्तमानमासे प्रतिपदादितिथयो द्वादशगुणिता भागा भवन्ति। पूर्वोक्तलिप्तादिफलस्यार्धं तत्वाभ्यस्तमिति लिप्ताः स्युः। पृथग्विलिप्तादिभिर्युतः प्रागुक्तद्वादशगुणततिथिभागैः संयुक्तश्चन्द्रः स्यात्॥ २२॥

शशाङ्कमासैरधिशेषके हृत-
ऋणं धनं चावमशेषके क्वहैः।
धनाख्ययाताहयुतिः पृथक् त्रिभू-
हृतर्णैर्वार्कविधू[1] लवादिकौ[2] ॥ २३ ॥[3]

अधिमासशेषाद्युगचान्द्रमासैर्हृतं दिनादिकमृणं स्यात्। अवमशेषाद् भूदिनैराप्तं दिनादिकं धनं स्यात्। चैत्रशुक्लप्रतिपदादीष्टदिनपर्यन्ततिथिसमूहः पूर्वोक्तधनसहितः कार्यः। पृथक् स एव त्रयोदशगुणितश्च। द्वावपि पूर्वोक्तर्णरहितौ पृथक् पृथक् कार्यौ। तौ द्वौ क्रमाद् भागादिकौ रविचन्द्रौ भवतः॥ २३॥

अहर्गणाद् भाहृतात् क्वहोद्धृतात्
फलं भचक्रमदिवागणं[4] रविः।
शशाङ्कमासोद्भवखेटमण्डलैः
पृथग्युतोऽसौ मृगलाञ्छनो भवेत् ॥ २४ ॥

मूलम् — 1. M_1. M_2. M_3 हतावृणावर्क०

2. D कलादिकौ

3. After 23, V_1. V_2. ins.
नभोनभः etc. (p. 5); then
अम्बरस्य परिधिः समाहता वासरैः कलिगतैर्विभाजिता।
कक्षया कुदिवसाघ्नयाथ ते मण्डलर्क्षलवलिप्तिकादिकम्॥
चक्रान्तरेण द्युगणात् समाहताद्भूवासराप्ताद् ग्रहयोगजो मितः।
युक्तौ परस्तौ रहितौ विपश्चिता ज्ञेयो क्रमादल्पगशीघ्रगौ ग्रहौ॥
Then 24.

4. A_2. B फलं च चक्राद्यदिवागणं रविः
B_1. B_2 चक्राद्यदिवागणरविः
Be. Bod. D फलं च चक्राद्यदिवागणो रविः

द्युगणो युगनाक्षत्रदिवसैर्गुणितो भूदिवसैर्भक्तो लब्धं कलिगतभचक्रं स्यात्। ततो द्युगणः शोध्यः। तच्छेषं भगणादिकं रविः स्यात्।

पुनः पृथग्द्युगणो युगचान्द्रमासैर्गुणितो भूदिनैर्भक्तो लब्धं भगणादिकं स्यात्। तद्भगणादिरसौ योज्यः। स चन्द्रः स्यात्॥ २४॥

[ग्रहानयने प्रकारान्तरम्]

द्वयोर्द्वयोश्चक्रविशेषसङ्गुणा-
दहर्गणाद्भूदिवसैर्यदाप्यते।
अनल्पगस्तद्रहितोऽल्पगो भवेद्-
युतोऽल्पगस्तेन तयोरनल्पगः॥ २५॥

इष्टद्युगणादभीष्टग्रहावानीय तयोर्युगभगणान्तरेण गुणितात् तस्मादेव द्युगणाद् भूदिनैर्भक्तम्। लब्धं भगणादिकं पृथक् पृथगल्पभगणग्रहे योज्यम्। अधिकभगणग्रहे शोध्यम्। इत्थमल्पभगणग्रहोऽधिकभगणग्रहो भवति। तयोरधिकभगणग्रहोऽल्पभगणग्रहो भवति॥ २५॥

प्रसिद्धलिप्ताहतसाध्यपर्ययाः
प्रसिद्धचक्रापहृताः[1] कलादिकः[2]।
भवेत् प्रसाध्यो मृदुतुङ्गकेन्द्रयोः
समागमो वा चलयोर्ग्रहान्तरम्॥ २६॥

द्युगणादानीतग्रहो भगणादिको लिप्तीकृतोऽभीष्टग्रहयुगभगणैर्गुणितः पूर्वानीतग्रहयुगभगणैर्भक्तो लब्धं कलादिकोऽभीष्टसाध्यग्रहो भवति। इत्यमेकस्मिन् ग्रहेऽभीष्टकालादिके परिज्ञाते तस्माद् ग्रहात् सर्वे ग्रहाः साध्या भवन्ति। असौ लिप्तादिको ग्रहः प्राग्वद्राश्यादिकः कार्यः।

मन्दकेन्द्रे परिज्ञाते तत्केन्द्रमन्दोच्चयोर्योगोऽभीष्टग्रहो भवति। शीघ्रकेन्द्रे परिज्ञाते तत् केन्द्रशीघ्रोच्चयोरन्तरमभीष्टग्रहो भवति। केन्द्रज्ञानात् ग्रहविज्ञानं स्यात्।' २६॥

मूलम्— 1. Bod. D ०चक्रैर्विहृताः कलादिकाः

2. A_2. S_2 कलादिकाः

[वर्षाधिपानयनम्]

गताः समा नन्दकृतेन्दुताडिता
रसाद्रिबाणापहृता[1] दिनादिकम् ।
फलं युतास्तेन समाः समाधिपो
नगाप्तशेषा[2] भृगुनन्दनाद् भवेत् ॥ २७ ॥

सूर्यवर्षान्तिकस्वल्पे युगणानयनार्थमुच्यते । युगरविभगणैर्भूदिवसा भाज्याः । लब्धं सावनदिनादिकं स्यात् । एकस्मिन् सूर्यवर्षे पञ्चषष्ट्यधिकशतत्रयं दिनानि । ३६५ । पञ्चदशघटिकाः । १५ । विघटिका एकत्रिंशत् । ३१ । तत्पराः पञ्चदश । १५ ।

तस्माद्युगभूदिवसा युगरविभगणैर्भाज्याः । लब्धं पञ्चषष्ट्यधिकशतत्रयम् । शेषदिवसा एकादशलक्षाः सप्तदशसहस्राणि पञ्चशतानि च । ११११७५०० । एते सप्तसार्धसहस्रैराप्ता । ७५०० । लब्धमेकोनपञ्चाशदधिकशतम् । १४९ । एतत् प्रतिवर्षं शेषघटिकादेर्गुणकः स्यात् । ततो युगरविभगणाः सार्धसप्तसहस्रैर्लब्धानि षट्सप्तत्यधिक पञ्चशतानि । ५७६ । शेषघटिकाद्यानयने प्रतिवर्षं भागहारः स्यात् । कलिगताब्दा गुणकगुणिता भागहाराप्ता लब्धं दिनादिकं स्यात् । लब्धदिनान्विताः कलिगताब्दाः सप्ताप्ताः । शुक्रवारादिगतवारतदनन्तरवाराधिपो वर्षाधिपः स्यात् ॥ २७ ॥

[शुध्यानयनम्]

गुणाब्धिखाष्टेषुहताः[3] समा हृताः
खखाभ्रनासत्यनगैर्दिनक्षयाः ।
ततोऽवशिष्टं कृतखेन्दुभिर्भजेद्
भवेत् समादावमावशेषकम् ॥ २८ ॥

सावनचान्द्राणामन्तरमुच्यते । युगरविभगणैस्तिथिक्षया भाज्याः । लब्धमवमदिनादिकं स्यात् । एकस्मिन् रविवर्षे दिनानि पञ्च । ५ । घटिका अष्टचत्वारिंशत् । ४८ । विघटिका द्वाविंशतिः । २२ । तत्परा नव । ९ । तस्माद्युगरविभगणान् पञ्चभिः सङ्गुण्य युगतिथिक्षयेषु शोधयेत् । शेषो युगे घटिकादीनां शेषदिवसाः । चतुस्त्रिंशल्लक्षा द्व्यशीतिसहस्राणि पञ्चशतान्य-

मूलम्— 1. Bod. D °बाणैर्विहृता
2. B. BO_1. BO_2. S_2. V_3 सप्तावशेषो
Bod. D सप्तावशेषे
A_2. Be. V_2 नगाप्तशेषो
3. Bod. D गुणाङ्घ्रि०

शीतिश्च । ३४८२५८० । एते षष्ट्याप्ता लब्धमष्टपञ्चाशत्सहस्राणि त्रिचत्वारिंशच्च । ५८०४३ । एतत् प्रतिवर्ष घटिकादेर्गुणकः स्यात् । तथा युगरविभगणाः षष्ट्याप्ता लब्धं द्विसप्ततिसहस्राणि । ७२००० । शेषघटिकादेर्भागहारः स्यात् । तस्मात् कलिगताब्दा गुणकगुणिता भागहाराप्ता लब्धं तिथिक्षयाः स्युः । तच्छेषश्चतुरधिकशतेन । १०४ । लब्धं रविवर्षादेरवमदिनादिकं स्यात् । अवमशेषदिनानि सावनानि । तत् फलं द्विनवतिः शतषट्कम् । ६९२ । अनेन प्रागुक्तभागहारे भक्ते लब्धं चतुरधिकशतं शेषस्य भागहारो जातः । एतदवमशेषदिनादिकं चैत्राद्यहर्गणानयने ज्ञातव्यम् ॥ २८ ॥

दिनावमाशाहतवर्षसंयुतिः
खवह्निभक्तात्र गताधिमासकाः ।
दिनानि शेषाणि तु शुद्धिरुच्यते
यदस्त्यधोऽह्नां खलु नाडिकादिकम् ॥ २९ ॥

कलिगताब्दा दशगुणिताः पूर्वानीतदिनैस्तिथिक्षयैश्च संयुक्तास्त्रिंशद्भक्ता लब्धं कलिगताधिमासकाः स्युः । तच्छेषदिनादि पूर्वानीतदिनाद्यधःस्थितघटिकाविघटिकाभिरधस्तात् सहितानि दिनानि शुद्धिरुच्यते । तस्माच्चैत्रशुक्लप्रतिपदादेरारभ्य परतः शुद्धिदिनघटिकाविघटिकान्ते मध्यादित्यस्य मेषप्रवेश इति ज्ञातव्यः ॥ २९ ॥

[ग्रहध्रुवानयनम्]

समाहताः खेचरमण्डलैर्हता-
श्चतुर्युगाब्दैरथ तैरिनोद्धृतैः ।
खरामभक्तैरनुखाङ्गभाजितै-
र्भवेयुरर्काब्दमुखे ग्रहध्रुवाः ॥ ३० ॥[1]

मूलम्— 1. After 30, A_2. B. Be. BO_1 BO_2. Bod. D. S_2. V_3. ins.
यावन्न मेषं व्रजति प्रभाकरस्तावन्न पूर्वध्रुवकान् परित्यजेत् ।
चैत्रे प्रविष्टेऽपि विलोमकर्म वा शुद्धया विजह्यादगते क्रियं रवौ ॥
भास्वानृणाहर्गणतश्च सूर्यः पात्यो भचक्रात् स्वफलानि चैवम् ।
स्वस्वध्रुवादप्यथ खेचराणां शोध्यानि यत्नात् प्रवदन्ति सन्तः ॥
A_2. S_2 cont. with
शाके नखाब्धिरहिते शशिनोऽक्षदस्रैस्तत्तुङ्गतः कृतशिवैस्तमसः षडङ्कैः ।
शैलाब्धिभिः सुरगुरोर्गुणिते सितोच्चाच्छोध्यं त्रिपञ्चकुहृतेऽभ्रशराश्विभक्ते ॥
स्तम्बेरमाम्बुधिहते क्षितिनन्दनस्य सूर्यात्मजस्य गुणितेऽम्बरलोचनैश्च ।
व्योमाक्षिसागरहृते विदधीत लब्धं शीतांशुसूनुचलतुङ्गकलासु वृद्धिम् ॥
V_1. V_2. ins. यावन्न etc. only. Then 31 in all these MSS.

कलिगताब्दा भौमादीनां भगणैः पृथक् पृथग् गुणिता रविभगणैराप्ता लब्धं कलिगतादिस्वस्वभगणाः स्युः। शेषो लक्षत्रयेण षष्टिसहस्राधिकेन। ३६०००० । भक्तो लब्धं राशयो भवन्ति। तच्छेषो द्वादशसहस्रैराप्तो। १२००० । लब्धं भागाः स्युः। तच्छेषः शतद्वयेन। २०० । लब्धं लिप्ताः स्युः। तच्छेषस्त्रिगुणितो दशभिराप्तो विलिप्ता भवन्ति। इत्यर्कवर्षान्ते भौमादीनां राश्यादिका ध्रुवाः स्युः। एते मध्यार्कस्य मेषप्रवेशकालिका भवन्ति ॥ ३० ॥

[लघ्वहर्गणानयनम्]

मधोः सितादेस्तिथयो विशुद्धयः
पृथड्मृगाङ्काभरणैः समाहताः।
समादियातावमशेषसंयुता
हृतास्त्रिखागैर्द्युगणः फलोनितः ॥ ३१ ॥

चैत्रशुक्लप्रतिपदादीष्टतिथयः शुद्धिदिनघटिकाविघटिकाभिरूनीताः। पृथगेकादशगुणिताः। वर्षाद्यवमशेषदिनादिसंयुक्ताः। त्र्यधिकेन सप्तशतेनाप्ताः। ७०३ । लब्धं तिथिक्षयाः। तैरूनिता द्युगणः स्यात्। असौ रविवर्षान्तिक-सावनदिनादिको भवति। त्रिखागैर्हृतावमशेषोऽत्र प्रतिदिनमवमावशेषः स्यात्। अथवास्मत्कृतवक्ष्यमाणावमशेष एव प्रतिदिनं चन्द्रसिध्यर्थं स्पष्टोऽवमशेषः स्यात् ॥ ३१ ॥

[दिनाधिपानयनम्]

अहर्गणोऽब्दाधिपशुद्धिनाडिका-
युतो यथा स्वं स्वरभक्तशेषकम्[1]।
भवेत् सितादिर्दिनपस्तदह्निजाः
सहस्ररश्मेरुदये नभश्चराः ॥ ३२ ॥[2]

मूलम्— 1. A_2. B. Be. BO_1. BO_2. Bod. D. S_2 ०कः

2. After 32, V_1. V_2. ins.

ग्रहध्रुवाः शुद्धफलेन वर्जिता इनोदये चैत्रसितादिका ध्रुवाः।
ते तच्च शुद्धिश्चरयोर्विवर्जितः क्षयाहशेषादवमादिशेषकाः ॥

V_1 then 33.

V_2 cont. with

सर्वत्र शुद्धिस्त्रिखशैलसंयुता विशोधिता वात्र दिनावशेषकम्।
तदा सरूपास्तिथयः सितादिका अहर्गणः स्याद्दिनरात्रिहानकः ॥

Then 33.

[द्युगणे दिनेऽधःस्थघटिका विघटिकाश्च योज्याः ।] द्युगणदिन-घटिकाविघटिकासु क्रमेण वर्षाधिपदिनानि शुद्धेरधःस्थघटिका [विघटिकाश्च] योज्याः । तद्घटिकाविघटिकाः सम्पूर्णाः षष्टिका भवन्ति । तदुपरि दिनमेकमधिकं भवति । तद्दिवसराशेः सप्तावशेषं शुक्रवारादिगतवारो भवति । तदनन्तरवारः सूर्योदयवारो भवति । वारं ज्ञात्वा वर्षान्तिकप्रागानीतद्युगणा-द्वक्ष्यमाणप्रकारेणानीता ग्रहाः स्वस्ववर्षान्तिकध्रुवयुतास्ततो भौमादिका भवन्ति ॥ ३२ ॥

[लघ्वहर्गणाद् रव्याद्यानयनम्]

अहर्गणः खाद्रिलवेन वर्जितः
खरांशुरंशादिरयं प्रजायते ।
अहर्गणाल्लोचनसङ्गुणाच्छरै-
र्हृताद्विलिप्तादिफलेन वर्जितः ॥ ३३ ॥[1]

पूर्वानीतार्कवर्षान्तिकदिनादिद्युगणेऽर्कादीनामानयनमुच्यते । तत्र रव्यानयनम् । दिनादिद्युगणः पृथक् सप्तत्या लब्धं भागादिकमृणम् । ततो द्युगणाद् द्विगुणात् पञ्चभिराप्तं फलं विलिप्ता ऋणमिति । ऋणद्वयवर्जितो दिनादिद्युगणो भागादिको रविः स्यात् । भागात् त्रिंशता लब्धं राशय इति । राश्यादिको मध्यार्कः स्यात् ॥ ३३ ॥

पृथग्रवौ सूर्यसमाहतास्तिथी-
र्लवेषु दद्यादवमावशेषकम् ।
स्वतत्त्वभागेन समन्वितं क्षिपेत्
कलासु नीहारकरप्रसिद्धये ॥ ३४ ॥[2]

मूलम्— 1. After 33, A_2. B. Be. BO_1. BO_2. Bod. D. S_2. V_3. insert :
दिवागणाद्विश्वगुणात् पृथक् स्थिताद् दिवागणोनाद्वसुषड्भिरुद्धृतात् ।
फलान्वितात् स्याद् हिमगुर्लवादिकोऽथवा मृगाङ्कध्रुवकेण संयुतः ॥
A_2 has then 34; then 35; others contime with
विवर्जितः कलादिना दिवागणात्तु भाजितात् ।
इहान्तरिक्षसाधकक्षपाकरप्रमाणकैः ॥
Then S_2 has 34 and all others 35.

2. After 34, S_2 inserts :
हतात् त्रिभिर्भुक्षयशेषकाद् गुणस्वरेन्दुलब्धांशयुतः पृथग्रविः ।
रविघ्नतिथ्यंशसमन्वितोऽथवा जगुर्बुधाः शीतकरं हि मध्यमम् ॥
Then 35.

एकादशगुणितो द्युगणोऽब्दावमशेषसंयुक्तो द्वयङ्करसैर्भक्तशेषोऽवमशेषः स्यात् । द्वयङ्करसादल्पश्चेत् स्वयमेवावमशेषस्य तत्त्वांशसमन्वितः ।२५। कलादिकं स्यात् । ततो वर्तमानमासे शुक्लप्रतिपदादीष्टतिथयो द्वादशगुणिता भागा भवन्ति । एते भागाः पृथग्ग्रवौ योज्याः । प्रागानीतकलादिकं रविकलासु योज्यम् । इत्थं द्वादशगुणिततिथिभागैः स्वतत्त्वांशयुक्तावमशेषलिप्तादिभिर्युतो रविरेव चन्द्रः स्यात् ॥ ३४ ॥

कुजध्रुवे दस्रहृतं द्युसञ्चयं
लवेषु रूपाद्रिलवेन संयुतम् ।
क्षिपेद् द्युपिण्डाद् गगनेभभाजितात्
कलादि लब्धं च भवेन्महीसुतः ॥ ३५ ॥[1]

द्युगणाद् द्वाभ्यां लब्धं भागादिकम् । तदेव स्वकीयैकविंशत्यंशैर्युक्तं कार्यम् । ततो द्युगणादशीत्या । ८० । लब्धं लिप्तादिकं स्यात् । इत्येतद् भागादिकं लिप्तादिकं च वर्षान्तिकभौमध्रुवे योज्यम् । ततो राश्यादिको मध्यभौमः स्यात् । इष्टदिने दृष्टवारात् परवारे सूर्योदयकालिको भौमो भवति ॥ ३५ ॥

दिने दिने भागचतुस्टयं क्षिपे-[2]
च्छरर्तुभिः षट् च बुधध्रुवे लवम् ।
शरघ्नमब्ध्यद्रिगुणांशवर्जितं
कलादि[3] जीवध्रुवके दिवागणम् ॥ ३६ ॥

द्युगणो दिनादिकश्चतुर्भिर्गुणितो भागादिकः स्यात् । ततः षड्भिर्गुणिताद् द्युगणात् पञ्चषष्ट्याप्तं भागादिकं स्यात् । इत्थं द्विविधं भागादिकं बुधध्रुवे योज्यम् । बुधशीघ्रोच्चं स्यात् ।

मूलम्— 1. After 35, A_2. S_2. insert :
द्युसञ्चयाद् रुद्रहृतात् पृथङ्महीयमोद्धृताद्विद्धि महीसुतांशकान् ।
तथापरात् पञ्चनगाष्टसंहृतान् महीजलिप्ताद्यथवा क्षिपेद् ध्रुवे ॥
Then 36.

2. BO_2. om. this line.

3. B. Be. BO_1. BO_2. Bod. D. V_2. V_3 कलासु

द्युगणः पञ्चगुणितः स्वकीयकृतशराग्न्यंशवर्जितः । ३५४ । कलादिकं स्यात् । तत् कलादिकं गुरुध्रुवे योज्यम् । असौ मध्यबृहस्पतिः स्यात् ॥ ३६ ॥

अहर्गणः कुञ्जरताडितः पृथक्
शरैर्द्विषष्ट्या च हृतोंऽशलिप्तिकाः[1] ।
सितस्य शीघ्रोच्चसमुद्भवे ध्रुवे
क्रमेण देयाः सितशीघ्रसिद्धये ॥ ३७ ॥

द्युगणोऽष्टभिर्गुणितः पृथक् पृथक् शरैः । ५ । द्विषष्ट्या । ६२ । हृतोंऽशलिप्तिकाः । भक्तलब्धं पञ्चाप्तं भागादिकम् । द्विषष्ट्याप्तं लिप्तादिकं स्यात् । तद् द्विविधं भागादिकं लिप्तादिकं च शुक्रशीघ्रोच्चध्रुवे योज्यम् । फलं शुक्रशीघ्रोच्चं स्यात् ॥ ३७ ॥

कलाद्वयघ्नं द्युगणं शनिध्रुवे
शरेन्दुरामांशयुतं[2] विनिक्षिपेत्[3] ।
नवोद्धृता[4] रूपरसोद्धृतास्तथा
शशाङ्कतुङ्गध्रुवकेंऽशलिप्तकाः ॥ ३८ ॥

द्युगणो द्विगुणः स्वशरेन्दुरामांशसंयुतः । ३१५ । कलादिकं स्यात् । तल्लिप्तादिकं शनैश्चरध्रुवे योज्यम् । असौ मध्यशनैश्चरो भवति ।

द्युगणान्नवभिराप्तफलं भागादिकं स्यात् । ततो द्युगणादेकषष्ट्याप्तं फलं कलादिकं स्यात् । तद् द्विविधं भागादिकं लिप्तादिकं च चन्द्रोच्चध्रुवे योज्यम् । तच्चन्द्रोच्चं स्यात् ॥ ३८ ॥

मूलम्—1. M_1. M_2. M_3 हृतांश०

2. B. Be. BO_1. BO_2 Bod. D. V_3. शराङ्करामांश

3. After विनिक्षिपेत् Be gives 39 cd ; then 38 cd.

4. Be. Bod. D. नवोद्धृतात् भूमिरसोद्धृतात् तथा

नवेन्दुभक्ताद् [1] वसुदेवभाजितात्
तमोध्रुवे भागकला विनिक्षिपेत् ।
शशाङ्कतुङ्गे [2] भवनत्रयं क्षिपेत्
तमः सषड्भं भगणाद् विशोधयेत् [3] ॥ ३९ ॥

मूलम्—1. Bod. वसुनेत्रभा०

2. M_1. M_2. M_3 द्वयं

3. After 39, B. Be. BO_1. BO_2. Bod. D. V_3. give 34 ; then they insert हतात् त्रिभिः (p. 17), द्युसञ्चयात् (p. 18); then occur
रविद्विभक्तो रविरहितो नृपैः शराभ्रबाणैर्हृतयुक् कुजोऽथवा ।
रविर्नगघ्नोऽङ्गयुगोद्धृतश्चतुर्गुणार्कयुक्तो भवतीन्दुजा ध्रुवा ॥
रविर्विभक्तो रविभिर्हृतो रवी रदाभ्रचन्द्रैस्त्रिदशाधिपो भवेत् ।
रवेर्दशघ्नादृतुभिर्हृतात् सितः पुनस्ततो रामजिनांशवर्जितः ॥
रवी रसघ्नोऽयुतभाजितो भवेद्धृतो रविः खाग्निभिरर्कजोऽथवा ।
नखोद्धृतो भास्कर इष्वृतुद्विभिर्विभाजितश्चन्द्ररिपुर्विलोमगः ॥
Then 40.

After 39, A_2. S_2. repeat दिवागणात् (p. 17) ; then the three verses above. Then 40.

After 39, V_1 gives श्लोकसप्तकं स्पष्टार्थं विलिख्यते ।

Then V_1 gives and after 39, V_2 gives शाके etc. (p. 15). स्तम्बेरमा etc. (p. 15); then
चैत्रादिखे ध्रुवका भवन्ति चैत्रात् सिताद्या दिवसा अनष्टाः ।
रुद्राहता वह्निखशैलभक्ता लब्धोनितः स्याद् द्युगणो निरग्रः ॥
सप्ताप्तशेषे दिनपोऽथ भोग्य आदिश्यते चैत्रसितादिवारात् ।
प्रत्यब्दमेव गुणयेत् समा यो यथेष्टभागावधि या च दिक् स्यात् ॥
चैत्रादिका बृहदहर्गणखेचरा ये तेषां ध्रुवा अवमशेषकमीशनिघ्नाः ।
स्थूलाः क्षपाहता हृता भवतीति सूक्ष्माः शुद्धिं विनाथ गणयेत् ध्रुवकस्तथैव ॥
त्रयोदशघ्नो द्विगुणः पृथग्दिवागणोनितो वह्नियमाहतो हृतः ।
शराङ्गबाणेन्दुफलान्वितो लवैश्चैत्रादिकः स्याद् हिमगुर्ध्रुवान्वितः ॥

द्युगणादेकोनविंशत्याप्तफलं ।१९। भागादिकं स्यात् । ततो द्युगणोऽष्ट-चत्वारिंशद्भक्तः फलं कलादिकं स्यात् । तद् द्विविधं, भागादिकं लिप्तादिकं च, तमोध्रुवे योज्यम् । असौ विलोमगश्चन्द्रपातो राहुः स्यात् ।

सूर्यादिग्रहाणां कलियुगात् प्राग् भगणशेषा न सन्ति । चन्द्रोच्चशेषो राशित्रयमस्ति । ततश्चन्द्रपातस्यापि शेषो राशिषट्कमस्ति । तस्मादत्रानीते चन्द्रोच्चे राशित्रयं योज्यम् । ततश्चन्द्रोच्चं स्यात् । तथा चन्द्रपातेऽपि राशिषट्कं योज्यम् । ततो विलोमगश्चन्द्रपातो भवति । पुनरसौ भगणा-च्छोध्यः । तच्छेषराश्यादिकश्चन्द्रपातः स्यात् । असावेव राहुरित्युच्यते ।

इत्थं सूर्यादयो ग्रहा बृहद्द्युगणे वर्षान्तिकद्युगणेऽपि दृष्टवारादुपरि-तनवारादौ सूर्योदयकालिका राश्यंशकलिप्तादयस्तुल्या एव भवन्ति । बृहद्द्युगणे ग्रहानयनं सर्वदा सुस्पष्टमेव । वर्षान्तिकद्युगणे तु चैत्रशुक्लप्रतिपद्यपि । ततः परतिथिष्वपि शुद्धिदिनादिकतिथिपर्यन्तमध्यतिथिषु ग्रहानयनं **लल्ला-चार्येण** नोक्तम् । ततः परतोऽपि चन्द्रसिद्ध्यर्थं प्रतिदिनमवशेषोऽपि नोक्तः । तस्माच्छुद्धिदिनादिनादिकतिथिपर्यन्तं ग्रहानयनप्रकारो न ज्ञातः । ततः परतिथिष्वपि वर्षाद्यवमशेषेण [विना] चन्द्रसिद्धिरपि नास्ति । चन्द्रोऽपि तथानीतो बृहद्द्युगणानीतिचन्द्रान्न्यूनाधिकः स्यात् । तस्मादसङ्गत एव चन्द्रः स्यात् । बृहद्द्युगणानीतसूर्यादयोऽपि बीजसंस्कारेण विना **सूर्यसिद्धान्तादानीत**-सूर्यादिग्रहतुल्या न भवन्ति ।

तथा सति किमित्युक्ते—तिथिघटिकाग्रहादयो दृक्तुल्या न भवन्ति । दृक्तुल्यत्वं नास्ति चेद् गणकानामस्मिन् **शिष्यधीमहातन्त्रे** आस्था शिथिला स्यात् । तथा सति किमित्युक्ते—अस्मिन् **शिष्यधीमहातन्त्रे** सम्यक् परिज्ञाते गणकानां गोलाध्यायपर्यन्तं **सूर्यसिद्धान्ते** सम्यक् परिज्ञाते यद्विशेषज्ञानं ततोऽप्य-धिकमेव ज्ञानं स्यात् । तस्मादत्र वर्षान्तशुद्धिदिनादिकमेव द्युगणं परिकल्प्य चैत्रशुक्लप्रतिपदादितिथिषु शुद्धिपर्यन्तं ग्रहानयनम् । अतः परं चन्द्रसिद्ध्यर्थं प्रतिदिनमवमावशेषकं च । **सूर्यसिद्धान्ततुल्या** ग्रहा यथा भवन्ति तथा चन्द्र-चन्द्रोच्चचन्द्रपाता अपि **सोमसिद्धान्तोक्ततुल्याः** सर्वदा यथा भवन्ति तथास्मिन्नपि **शिष्यधीमहातन्त्रे** ग्रहा दृग्गोचराः सन्तस्तत्त्वज्ञैर्ज्ञायन्ते यथा तथानुक्तमेतत् सर्वमस्माभिर्दर्शभिः श्लोकैः कथ्यते ।

चैत्रादिवाररविचन्द्रतदुच्चसिद्धिं ज्ञात्वापरादिनकराब्दमुखे ध्रुवैस्तैः ।

आजन्मनोत्थ(?) गणयेदथ मध्यमेऽर्के मेषंगते सवितरि परिवर्तनीया ॥

Then 40.

After 39, M_3 gives मल्लिकार्जुनविरचिताः श्लोकाः ।

Then चैत्रादौ····· ·····मूर्जितम् (p. 22)

व्याख्यानकारविरचितमूलानि—

चैत्रादौ ग्रहविज्ञानं प्राज्ञोक्तं वक्ष्यतेऽधुना।
अब्देशशुद्धिनाड्यैक्यात् शुद्धिः शोध्या दिनाधिपः ॥ १ ॥
('अब्देन्दुशुद्धिनाड्यैक्यात्' पाठान्तरम्)

शुद्धिदिनगणो ज्ञेयश्चैत्रादावृणसंज्ञिकः।
तस्मादंशादिकः प्राग्वच्चक्राच्छुद्धो रविस्तथा ॥ २ ॥

तस्मात् प्राग्वद् ध्रुवाः शोध्या भौमाद्या व्यत्ययादगुः।
शुद्धिर्भवगुणा शोध्या समाद्यवमशेषतः ॥ ३ ॥

तच्छेषोऽवशेषः स्यादधिकश्चेत्तदन्तरम्।
ऋणाख्योऽवमशेषः स्यात् ततः प्राग्वद् रवौ विधुः ॥ ४ ॥

चैत्रादितिथयोऽल्पाः स्युर्यदा शुद्धिस्तदन्तरम्।
शुद्धिस्तात्कालिकी ज्ञेया शेषं प्राग्वद् ग्रहा अपि ॥ ५ ॥

अब्दाद् वाऽहर्गणः प्राग्वद् गुणितश्चन्द्रभूषणैः।
अब्दाद्यवमशेषाद्यो दिनाद्यवमशेषकम् ॥ ६ ॥

यदि द्व्यङ्करसादल्पमधिकं चेत्तदूनितम्।
इत्येवावमशेषः स्याच्चन्द्रसिद्धचै दिने दिने ॥ ७ ॥

गोऽर्गैकवह्नियुक्छाकाद्विग्गुणाद् भास्करादितः। ३१७९।
९६५२ ६९० २५४ ५१
द्व्यर्थाङ्काङ्कैः खनन्दाङ्कैरब्धितत्त्वैः कुपञ्चभिः ॥ ८ ॥

४९८ १६३ ५०० १७४
गजाङ्काब्धिभि[स्त्र्यंगाब्जैः][1] खखार्थैरब्ध्यगेन्दुभिः।
१४०
खेन्द्वैराप्ता विधूच्चस्य लिप्ताद्यं सूर्यसम्मतम् ॥ ९ ॥

ज्ञशीघ्रार्कजभौमेषु युञ्ज्यादन्येषु शोधयेत्।
नङ्क्षनार्यानुजेनेत्थं शिष्यधीतन्त्रमूर्जितम् ॥ १० ॥

[2]वर्षाधिपदिनघटिकासु सप्ताप्तशेषशुद्धिदिनादिकं संशोधयेत्। तच्छेषश्चैत्रशुक्लादेर्गतवारः स्यात्। तदनन्तरवारः शुक्लप्रतिपदि (शुक्र? सूर्योदये) वारः स्यात्। ततः शुद्धिमेव द्युगणं परिकल्प्य "अहर्गणः खाद्रिलवे"-त्यादिनांशादिरविमानीय चक्रात् संशोध्य तच्छेषो राश्यादिकः कार्यः। असौ शुक्लप्रतिपदि सूर्योदयकालिको रविर्भवति। शुद्धिमेकादशभिः सङ्गुण्य

व्याख्या—1. M_1. M_2. read गुणाङ्कक्ष्माभिः, which is non-metric.
2. M_1. M_2. add before this: शुद्धेरधःस्थघटिकादि।

वर्षाद्यवमशेषात् संशोधयेत् । तच्छेषः स्वतत्त्वभागसमन्वितो लिप्तादिकं स्यात् । तेन युक्तो रविश्चन्द्रो भवति । यद्येकादशगुणिता शुद्धिरब्दाद्यवमशेषादधिका चेत् तदन्तरमृणावमशेषः । असौ स्वतत्त्वभागान्वितो ऋणलिप्तादिकं स्यात् । तद्रवौ शोध्यम् । चन्द्रः स्यात् । ततः शुद्धिमेवाहर्गणं परिकल्प्य "कुजध्रुवे दस्रहृतं द्युसञ्चयमि"त्याद्युक्तप्रकारेण भौमादीनानीय स्वध्रुवेषु योजयेत् । ततो भौमादिका भवन्ति । तथा चन्द्रपातमानीय [स्व] ध्रुवे योजयेत् । चक्राच्छुद्धोऽसौ राहुर्भवति । यदा प्रतिपदादितिथयः शुद्धेरल्पास्तदन्तरमेव तदा शुद्धिः स्यात् । तां शुद्धिं प्राग्वर्षाधिपात् संशोध्य दिनाधिपं ज्ञात्वा तदनन्तरं शेषशुद्धिमेव द्युगणं परिकल्प्यांशादिरविमानीय चक्राच्छोधयेत् । तदासौ रविर्भवति । तच्छेषशुद्धिरेवैकादशगुणिताब्दाद्यवमशेषाच्छोध्या । तच्छेषोऽवमशेषः । स्वतत्त्वांशान्वितो लिप्तादिकं स्यात् । तल्लिप्तादिकं चैत्रादितिथिद्वादशगुणिता भागाश्च रवौ योज्याः । चन्द्रो भवति । तथा तच्छेषशुद्धिमेवाहर्गणं परिकल्प्य भौमादीनानीय स्वध्रुवेषु योजयेत् । चन्द्रपातश्चक्राच्छोधितः । ततस्तं स्वध्रुवे योजयेत् । इत्थं स्वेष्टदिनसूर्योदयकालिकाः सूर्यादयो भवन्ति । चैत्रशुक्लप्रतिपदादितिथयो यदा शुद्धेरधिकास्तदापि चन्द्रसिद्धचर्थं द्युगणमेकादशभिः [संगुण्य][1] तत्राब्दाद्यावमशेषं योजयेत् । द्व्यङ्करसैर्विभज्य । ६९२ । तच्छेषस्तदावमशेषः स्यात् । योजितराशिद्व्यङ्करसादल्पश्चेत् तदा स एवावमशेषः स्यात् । इत्थमब्दाद्यावमशेष एव दिनाद्यावमशेषः स्यात् । स एव स्वतत्त्वभागेन समन्वितः कलादिकं स्यात् ।

प्रतिदिनं सूर्यादीनां बीजलिप्ताद्यमुच्यते । एकोनाशीत्यधिकशतसमन्वितसहस्रत्रयं । ३१७९ । गताब्दसंयुक्तं कलिगतवर्षाणि भवन्ति । तानि कलिगतवर्षाणि दशगुणितानि बीजफलानयनेऽर्कादीनां भाज्यराशिः स्यात् । ततो रवेर्भागहारो नवसहस्राणि षट्छतानि द्विपञ्चाशत् । ९६५२ । ततश्चन्द्रस्य षट्छतानि नवतिश्च । ६९० । ततो भौमस्य शतद्वयं चतुःपञ्चाशच्च । २५४ । ततो बुधशीघ्रस्यैकपञ्चाशच्च ।५१। ततो गुरोः शतचतुष्टयमष्टनवतिश्च । ४९८ । ततः शुक्रशीघ्रस्य शतमेकं त्रिषष्टिश्च । १६३ । ततः सौरेः पञ्चशतानि । ५०० । ततश्चन्द्रपातस्य शतमेकं चतुःसप्ततिश्च । १७४ । ततश्चन्द्रोच्चस्य शतमेकं चत्वारिंशच्च । १४० । इति भाज्यराशेः पृथक् पृथक् स्वभागहारैर्लब्धं कलादि स्वकीयं रविचन्द्रचन्द्रोच्चगुरुशुक्रशीघ्रचक्रशुद्धचन्द्रपातेषु शोध्यत् । भौमबुधशीघ्रसौरिषु योज्यम् ।

अनेन बीजेन संस्कृताः सूर्यभौमबुधशीघ्रगुरुशुक्रशीघ्रशनैश्चराः सूर्यसिद्धान्तोक्ततुल्याः स्युः । चन्द्रचन्द्रोच्चपाताः सोमसिद्धान्तोक्ततुल्याः स्युः । ब्रह्मसिद्धान्तोक्तचन्द्रचन्द्रोच्चराहुभिः सह स्वल्पलिप्तान्तराः स्युः । इत्थं

व्याख्या—1. M_1. M_2. विभज्य

सर्वज्ञ-नङ्गनार्यानुजेन मल्लिकार्जुनसूरिणा प्रणीतश्लोकैर्दशभिः शिष्यधीवृद्धिदं लल्लाचार्यविरचितं महातन्त्रं तज्ज्ञैः सद्भिः परीक्षितं चेत् सर्वदात्यूर्जितं स्यात् ॥ ३९ ॥

[रव्यादीनां दिनगतयः]

दिवाकरादेर्गतिलिप्तिकाः क्रमा-
न्नवेषवः खाङ्कनगाः क्षमाग्नयः ।
शिलीमुखाम्भोनिधिबाहवः शरा-
स्ततः षडङ्का द्वितयं रसा गुणाः ॥ ४० ॥

[1]क्रमाद् विलिप्ता वसवः शरानलाः
[2]षडश्विनोऽयुग्मगुणा नभो गजाः ।
नभः कुवेदाः कुभुवो दिवात्यये
गतेर्ग्रहाः स्युः स्वगतेर्दलोनिताः ॥ ४१ ॥

सूर्यादीनां स्वस्वभगणा युगे पठिताः युगभूदिवसैर्भक्ता लब्धं भगणादिकमेकसावनदिवसे स्वस्वभुक्तिः स्यात् । अर्कादीनां स्वस्वभुक्तिलिप्ता विलिप्ताश्चात्र क्रमेण पठिताः । तत्र मध्यार्कभुक्तिरेकोनषष्टिलिप्ता अष्टौ विलिप्ताश्च । ५९ । ८ । तथेन्दोर्नवत्यधिकसप्तशतानि लिप्ताः पञ्चत्रिंशद्विलिप्ताश्च । ७९० । ३५ । तथा भौमस्यैकत्रिंशल्लिप्ताः षड्विंशतिविलिप्ताश्च । ३१ । २६ । तथा बुधशीघ्रस्य पञ्चचत्वारिंशदधिकशतद्वयलिप्ता द्वात्रिंशद्विलिप्ताश्च । २४५ । ३२ । तथा गुरोः पञ्चलिप्ता विलिप्ता शून्यम् । ५ । ० । तथा शुक्रशीघ्रस्य पण्णवतिलिप्ता अष्टौ विलिप्ताश्च । ९६ । ८ । ततः शनेर्लिप्ताद्व्यमम्बरं विलिप्ता च । २ । ० । तथा चन्द्रोच्चस्य षट् लिप्ता एकचत्वारिंशद् विलिप्ताश्च । ६ । ४१ । तथा राहोर्लिप्तात्रयमेकादशविलिप्ताश्च । ३ । ११ ।

स्वस्वभुक्त्यर्धं लिप्तादिकं प्रागानीतोपरि सूर्योदयकालिकसूर्यादिग्रहेभ्यः[1] शोध्यम् । ततस्ते सूर्यादयः पूर्वतिथेरर्कास्तमयकालिकग्रहा भवन्ति । प्रागानीता

मूलम्— 1. A_2. S_2 तथा०
2. V_2 शशश्वि०

व्याख्या—1. M_1. M_2 have a lacuna here.

एव स्वस्वभुक्तिचतुर्थांशकलादिसंयुक्तः परदिनमाध्याह्निका ग्रहा भवन्ति। तात्कालिकाः स्वेष्टकाले च कर्तव्याः इत्येतदुपलक्षणार्थमुक्तम्। राहोः स्वभुक्त्यर्धं पादादिकं वा गम्यदिने ऋणं, गतदिने धनं कार्यम्। असौ तात्कालिको भवति।

एकादशशतमिते शाके कलिगताब्दाश्चतुःसहस्राण्येकोनाशीत्यधिकद्विशतानि च, ४२७९। तत्फाल्गुनपञ्चदश्याममावास्यायां सोमवारे द्युगणः १५६२९३६। सोमवारो गतः। भौमवारे सूर्योदयकालिको द्युगणोऽयम्। कलिगताधिमासाः १५८। अधिमासशेषः ३३२९०७८४०। अवमदिनशेषः ६८४८८४८८०। अस्माद् बृहद्द्युगणात् सूर्यानयनं स्पष्टमेव प्रत्यब्दशुद्धिविधानादुच्यते। "समा हृता" इत्यादिना दिनादिकम् ११०६। ५३। ३९। साब्ददिनानि ५३८५। नगाप्तशेषाधिपः शुक्रवाराद्यवमानि ३४४९। अब्दाद्यवमशेषः ३६५। २१। २०। आशागुणिताब्दाः ४२७९०। दिनावमाशागुणयुतिः ४७३४५। तदधिमासाः १५७८। शुद्धिदिनादिकम् ५। ५३। ३९।

एकादशशतमिते शाके कलिगताब्दौघा दिग्घ्नाः सूर्यादीनां स्वस्वभागहाराप्तवीजफलं लिप्तादिकं स्यात्। ततः सूर्यफलम् ४। २८ (२६)[1]। चन्द्रफलम् ६२। १। भौमफलम् १६८। २८। बुधशीघ्रफलम् ८३९। १। गुरोः ८५। ५५। शुक्रशीघ्रस्य २६। ३१ (२६२। ३१)। शनेः ५ (८५। ३५)। राहोः ४५। ५५ (२४५। ५५)। चन्द्रोच्चस्य ३०५। ३९।

भौमध्रुवः ०। ९। ९। २९। बुधशीघ्रध्रुवः ९। १२। २२। ५४। गुरुध्रुवः ९। ६। १२। २७ (२९)। शुक्रशीघ्रध्रुवः ८। २६। ३१। १६ (१७)। सौरध्रुवः २। २। १६। ४७। राहुध्रुवः ०। ७। ५५।१६। सषड्भः ६। ७। ५५। १६। चन्द्रोच्चध्रुवः ७। ०। ४५। ३०।

चैत्रशुक्लप्रतिपद्दिनाधिपः सोमः। तदनन्तरे भौमदिनेऽर्कोदयकालिकमध्यरविः ११। २४। ११।२७। चन्द्रः ११। २९।२३।५७ (५९)। भौमः ०। ६।४। १० (१३)। बुधशीघ्रः ८। २८ (१८)। १५। ४० (४१)। गुरुः ९। ५। ४ (४३)। १५ (१)। शुक्रशीघ्रः ८। १७। ४। ४०। सौरिः ०। २। २४। ५७ (२। २। ५। ०) राहुः ६। ७। ३७ (३६)। ३२ (३१)। चक्रशुद्धः ५। ५२। २२(२३)। २८ (२९)। चन्द्रोच्चम् १० (७)। ०। ६। ७।

व्याख्या—1. Results obtained by calculation are given within brackets.

बीजस्फुटा एते। रविः ११। २४। ७। १। चन्द्रः ११। २८। २१। ५६ (५८)। कुजः ०। ८। ५२। ३८ (४१)। बुधशीघ्रः ९। २। १४। ४१ (४२)। गुरुः ९।४।१७।१० (६)। शुक्रशीघ्रः ८। १२। ४२। ९। सौरिः २।३। ० (३०)। ३२ (३५)। राहुः ५। १८। १७। २३ (३४)। चन्द्रोच्चम् ९ (६)। १५। ०। २८।

एते ऋणशुद्धिद्युगणानीताः सूर्यादयः **सूर्यसिद्धान्तोक्ततुल्याः** स्युः। चन्दोच्चराहू **सोमसिद्धान्तोक्ततुल्यौ**। एतयोः **सूर्यसिद्धान्ते** भागाधिक्यम्। अनयोरेव **ब्रह्मसिद्धान्ते** लिप्तान्तरमल्पमेव। **गोलबीजखण्डखाद्यकेऽर्कादिभिरन्विते** पुनः पाठान्तरं—**गाढबिन्दुशतखण्डखाद्यकेऽर्कादिभिः**। एते सर्वे सबीजा अर्कादयो राहुचन्दोच्चसहितास्तुल्या एव ॥ ४१ ॥

[देशान्तरम्]

क्रमेण लङ्कोज्जयिनीहिमाचल-
प्रबद्धरेखाविषयेषु[1] मध्यमाः[2]।
भवन्ति[3] पूर्वापरपत्तनेष्वमी
ततश्च[4] देशान्तरकर्मसंस्कृताः ॥ ४२ ॥

[लङ्कोज्जयिनी] एतन्नगरद्वयं[1] भूमध्योपलक्षणार्थम्। तस्माल्लङ्का काञ्ची[2]कुमारीनगरं वत्सगुल्मकं माहिष्मतीपुरमुज्जयिनी गर्गराट् कुरुक्षेत्रं हिमवत्पर्वतश्च। एतेषामन्तरालप्रसिद्धान्यन्यान्यपि स्थानानि। एतेषु नगरेषु सूर्योदयकालिका गणितागताः सूर्योदयो मध्यमा ग्रहा ज्ञातव्याः। एतेषां नगराणां याम्योत्तरा भूमध्यरेखा स्यात्। भूरेखापूर्वापरप्रसिद्धनगरेषु देशा-

मूलम्—1. Bod. D. V_1. V_2 प्रसिद्ध०
2. M_1. M_2. वलयेषु
3. A_2. B. Be. Bo_1. $Bo._2$ Bod. D. S_2. V_1. V_2. V_3 ततश्च
4. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_1. V_2. V_3. भवन्ति ; (D भवन्ति देशान्तरसंस्कृता ग्रहाः)।

व्याख्या—1. M_1. M_2. add here हिमाचल
2. M_1. M_2. स्वामिकुमारनगरं।

न्तरकर्मणा संस्कृता एते ग्रहाः सूर्योदयकालिका भवन्ति । प्राग्द्युगणानयनकाले लङ्कासूर्योदयकालिका इत्युक्त्वेदानीमेते ग्रहा भूमध्यरेखास्थनगरेषु मध्या इत्युक्ते विरोधो नास्ति । कथमित्युक्ते । लङ्कावासिनां लङ्कायाः साक्षात् प्राच्यां सूर्योदयकाल एव विषुवद्द्वयेऽपि भूरेखास्थनगरवासिनामपि स्वस्वनगरात् साक्षात् प्राच्यामेव सूर्योदयः स्यात् । तस्मादिदानीं भूरेखाविषयेषु मध्यमा इत्युक्तेऽपि पूर्वापरयोर्विरोधोऽप्यपास्तः ॥ ४२ ॥

खखामरा योजनवेष्टनं भुवो
नभःशराभ्रक्षितयोऽस्य विस्तृतिः ।
दिवाकरघ्नं पलकर्णभाजितं
स्फुटं महीगोलकवेष्टनं भवेत् ॥ ४३ ॥

भूपरिधियोजनानि त्रयस्त्रिंशच्छतानि, ३३००। भूमध्ये सूचितभूव्यासयोजनानि पञ्चाशदधिकसहस्राणि, १०५०। भूपरिधियोजनानि द्वादशभिः सङ्गुण्य स्वदेशविषुवत्कर्णेन विभजेत् । लब्धयोजनानि स्वदेशस्फुट-[भू]परिधिर्भवति ॥ ४३ ॥

कुमध्यरेखाविषयं स्वपत्तना-
दवस्थितं तिर्यगवेत्य योजनम्[1] ।
स्वकीयतत्रत्यपलांशकान्तरं[2]
खखामरघ्नं विभजेत् खषड्गुणैः ॥ ४४ ॥

भूरेखास्थनगरस्वदेशनगरयोर्मध्ये योजनानि वृद्धपरम्परया ज्ञातव्यानि। तानि कर्णगतिस्थितयोजनानि भवन्ति । तद्भूरेखास्थनगरेऽक्षांशाः स्वदेशनगरेऽक्षांशा ज्ञातव्याः । ततस्तदन्तरांशान् भूपरिधियोजनैः सङ्गुण्य भगणांशैर्विभजेत् । ३६० । लब्धं भूरेखास्थनगराद् भूरेखानुसारेण स्वदेशनगरात् साक्षात् पूर्वापरप्रदेशयोजनानि भवन्ति ॥ ४४ ॥

मूलम्— 1. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_1. V_2. V_3 योजनैः
2. Bod. D. स्वकीयरेखोत्थ॰

पलकृतिरथ यावद्वर्गतो योजनानां
पदमृजु निजधामत्तमार्धयोरन्तरं स्यात् ।
ग्रहगतिहतमेतत् स्पष्टभूवृत्तभक्तं
धनमृणमपरैन्द्र्योर्लिप्तिकादि स्वमार्धात् ॥ ४५ ॥

तद्योजनवर्गं पूर्वोक्तकर्णगतिस्थित[1]ज्ञातयोजनवर्गात् संशोध्य तन्मूलमानयेत् । तन्मूलमेव भूरेखास्वदेशान्तरयोजनानि भवति । तैर्ग्रहभुक्ति सङ्गुण्य पृथक् पृथक् स्वदेशस्फुटपरिधियोजनैर्विभजेत् । फलं कलादिकं स्यात् । कलादिकं भूमध्यरेखापूर्वदेशेषु स्थितनागरिकैः सूर्यादिग्रहेषु शोध्यम् । पश्चिमदेशेषु योज्यम् । इत्थं सूर्यादयः स्वदेशार्कोदयकालिकग्रहाः[2] स्वदेशजा भवन्ति ॥ ४५ ॥

इति मल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
मध्यग्रहाधिकारो नाम प्रथमोऽध्यायः ॥

मूलम्— 1. Bod. D. ०रैन्द्र्यां०

2. After 45, the first Chapter in A_1. A_2. M_2. M_3. S_1. S_2. V_1. V_2 ends.

After 45, B. Be. Bo_1. Bod. D. V_3 have the verse. शाके etc. (see p. 15) and स्तम्बेरमा etc. (see p. 15). Then the first Chapter ends.

In Be. as a footnote to शाके नखाब्धि etc. the following is written : शाके नखाब्धिरहिते उक्त नाम गुणकारैः क्रमेण गुणिते निष्पन्नकानां अत्र शराब्धिप्रमितो भागहारः सर्वत्र। चन्द्रोच्चराहुगुरुशुक्रचलेभ्यः शोध्यं कलासु भौमशनिबुधचलसु कलासु योज्यं ।

व्याख्या—1. M_1. M_2. add. स्वदेश here.

2. M_1. M_2. read दयतात्कालिकग्रहाः ।

रविचन्द्रस्पष्टीकरणं नाम

द्वितीयोऽध्यायः

अथ सूर्यचन्द्रस्पष्टीकरणाध्यायो व्याख्यायते ।

[जीवा]

क्रमार्धजीवाः शरनेत्रबाहवो
नवाब्धिवेदाः कुशिलोच्चयर्तवः ।
खनन्दनागाः शरशून्यशूलिनः[1]
शरेन्दुविश्वे नखबाणभूमयः ॥ १ ॥

नवेन्दुसप्तद्वितयः कलामया[2]
दिगङ्कचन्द्रास्त्रिनवाभ्रबाहवः ।
शिलोच्चयाङ्गाद्वियमास्ततः परं
शशाङ्करामाम्बुधिबाहवः पुनः[3] ॥ २ ॥

शराष्टतत्त्वानि वसुद्वयगाश्विन-
स्ततस्त्रिवर्गेषु भुजङ्गबाहवः ।
भुजङ्गशैलत्रिकवर्गबाहवः[4]
समुद्रनागाभ्रगुणा भटोदिताः ॥ ३ ॥

मूलम—1. A_1. B. Bc. Bo_1. Bo_2. Bod. D. V_1. V_2. V_3. शरपूर्ण०

2. M_1. M_2. M_3. कलामयो

3. D रामाब्धियमास्तत: परं

4. V_1. V_2. तत: परं नागहयाङ्कबाहव:

शिलोच्चयाद्रीन्दुहुताशनास्ततो[1]
रसेषुदन्ताः कुयमाग्निवह्नयः ।
द्व्यगामरा गोऽभ्रसमुद्रवह्नयः
कुत्र्यब्धिरामा-ऽहिगुणाब्धिवह्नयः[2] ॥ ४ ॥

ततो विलोमास्तुरगा नवाश्विनो
रसर्तवः शैलशिवा द्व्यहीन्दवः ।
कुषड्यमा वेदशिलीगुणाग्नयः
खषड्युगान्यङ्कशिलोच्चयेषवः[3] ॥ ५ ॥

दिगद्रयो राजशिलीमुखा हयः ।
स्वराम्बराशाः शशिशैलशूलिनः ।
शराब्धिविश्वेऽष्टयजेषुभूमय-
स्ततो नवेन्दुस्वरशीतरश्मयः ॥ ६ ॥

भुजङ्गशीतद्युतिनन्दभूमयो
हुताशनाक्षिक्षितिलोचनान्यतः ।
ततो हुताशानलवह्निबाहवो
मतङ्गजाम्भोनिधिसायकाश्विनः ॥ ७ ॥

नगाङ्गभान्यङ्गगजाङ्कबाहव-
स्त्रिभूरदा वस्वनलाब्धिवह्नयः ।
इमां त्रिभज्यामथ चक्रलिप्तिका-
वृतेरपि व्यासदलं वदन्त्यतः[4] ॥ ८ ॥

मूलम—1. V_2 ०न्दुगुणास्ततः पर

2. A_2. B.Be.Bo_1.Bo_2. Bod. D. S_2. V_3. कुरामवेदाज्यभुजोऽथ साद्रयः । V_1. V_2. कुरामवेदाज्यभुजो हयान्विताः

3. After 5, M_1. M_2. M_3. insert wrongly ततो- —बाहवः । Then occur दिगद्रयो etc.

4. A_1. S_1. do not give the प्रतीक of 5-8, 9 ab, but there is the commentary.

अस्यार्थः । पूर्वोक्तगणितागतसूर्यादयो मध्यग्रहाः स्वकीयमन्दोच्च-शीघ्रोच्चाख्यैर्यदा प्रागपाकृष्टास्ता भागादिभिरधिका भवन्ति । त एव मध्यग्रहास्तैरेव मन्दोच्चशीघ्रोच्चाख्यैर्यदा प्रागप(?प्रत्यगप)कृष्टास्तदा भागादि-भिरल्पा भवन्ति । इत्थं गणितागता ग्रहाः कदाचिदधिका भवन्ति, कदा-चिन्न्यूना भवन्ति । तस्मात् स्वमन्दकेन्द्रेण शीघ्रकेन्द्रेण च प्रतिदिनं तैराकृष्ट-भागादिफलेन संस्कृत्य सूर्यादिग्रहान् स्फूटीकर्तुमिच्छताऽऽर्यभटाचार्येण ज्यापिण्ड-काश्चतुर्विंशतिः प्रणीताः । ताश्च प्रतिराश्यष्टाविति त्रयाणां चतुर्विंशति-ज्यापिण्डकाः कलामयाः स्युः । राशित्रयस्य जीवा त्रिज्येत्युच्यते । सा भूव्यासार्धमित्यपि । सैव भचक्रकलिकाव्यासार्धमित्युच्यते । सैवात्रापि लल्लाचार्येण पठिता । चतुर्विंशतिज्यापिण्डकाः क्रमेण पठिताः ।

तत्राद्या जीवा शरनेत्रबाहवः, २२५ । द्वितीया ४४९ । तृतीया ६७१ । चतुर्थी ८९० । पञ्चमी ११०५ । षष्ठी १३१५ । सप्तमी १५२० । अष्टमी १७१९ । प्रथमराशिक्रमजीवाः । नवमी १९१० । दशमी २०९३ । एकादशी २२६७ । द्वादशी २४३१ । त्रयोदशी २५८५ । चतुर्दशी २७२८ । पञ्चदशी २८५९ । षोडशी २९७८ । द्वितीयराशिक्रमजीवाः । सप्तदशी ३०८४ । अष्टादशी ३१७७ । ऊनविंशी ३२५६ । विंशी ३३२१ । एकविंशी ३३७२ । द्वाविंशी ३४०९ । त्रयोविंशी ३४३१ । चतुर्विंशी ३४३८ । राशित्रयजीवा त्रिज्ये-त्युच्यते । इति क्रमजीवाः पठिताः ।

अतो विलोमा इति । भचक्रादस्य राशित्रयस्याद्यात् क्रमजीवोक्ता । तस्यैव राशित्रयस्योत्क्रमेण तृतीयराश्यन्तादारभ्य प्रथमराशिपर्यन्तमुत्क्रमेण कथ्यते । तत्रापि चतुर्विंशति ज्यापिण्डकाः । तत्राद्या जीवा सप्त कलाः, ७ । द्वितीया २९ । तृतीया ६६ । चतुर्थी ११७ । पञ्चमी १८२ । षष्ठी २६१ । सप्तमी ३५४ । अष्टमी ४६० । तृतीयराश्युत्क्रमज्याः । नवमी ५७९ । दशमी ७१० । एकादशी ८५३ । द्वादशी १००७ । त्रयोदशी ११७१ । चतुर्दशी १३४५ । पञ्चदशी १५२८ । षोडशी १७१९ । द्वितीयराश्युत्क्रमज्याः । सप्तदशी १९१८ । अष्टादशी २१२३ । ऊनविंशी २३३३ । विंशी २५४८ । एकविंशी २७६७ । द्वाविंशी २९८९ । त्रयो-विंशी । ३२१३ । चतुर्विंशी ३४३८ । एषा त्रिज्या ।

नतासूनां सत्रिभग्रहस्य च उत्क्रमज्या कर्तव्या । इत्युत्क्रमज्याप्रयोजन-मन्यत्र । अत्र क्रमजीवा कर्तव्या ॥ १-८ ॥

कृताब्धिवस्त्रङ्ककुकुञ्जरेश्वराः
प्रमाणमुक्तं त्रिभशिञ्जिनीकृतेः।
जिनांशजीवा नगगोगुणेन्दवो
दिवाकरोच्चं भुजगाचला लवाः ॥ ९ ॥

त्रिज्यावर्गः कोट्येकाष्टादशलक्षा एकोनविंशतिसहस्राण्यष्टशतानि चतुश्चत्वारिंशच्च, ११८१९८४४ । अस्य त्रिज्यावर्गस्य प्रयोजनमग्रे ज्ञातव्यम् ।

परमक्रान्तिभागाश्चतुर्विंशतिः । तज्ज्या सप्तनवत्यधिकत्रयोदशशतानि १३९७। ग्रहक्रान्त्यानयनार्थमेषाप्यग्रे ज्ञातव्या (? प्रयोक्तव्या) ।

रवेर्मन्दोच्चस्य राशिद्वयमष्टादश भागाश्च, २।१८। एतत् सूर्यस्फुटीकरणार्थमुक्तम् ॥ ९ ॥

ग्रहो मृदूच्चेन चलोच्चमूनितं
ग्रहेण केन्द्रं कथितं तदाह्वयम्।
त्रिभिस्त्रिभिः केन्द्रगृहैः पदं क्रमा-
दयुग्ययुग्मे भुजकोटिसंज्ञिते ॥ १० ॥

स्वेष्टग्रहा[त् त]न्मन्दोच्चं विशोध्यम्। तच्छेषराश्यादिकं स्वमन्दकेन्द्रं स्यात्। स्वशीघ्रोच्चात् स्वेष्टग्रहः शोध्यः। तच्छेषराश्यादिकं स्वशीघ्रकेन्द्रमित्युच्यते। तत्केन्द्रद्वयेऽप्यादिमारभ्य प्रतिराशित्रयं पदमित्युच्यते। ततोऽप्योजपदो भुजः। समपदः कोटिः। तस्मात् प्रथमस्तृतीयश्च भुजः। द्वितीयपदश्चतुर्थपदश्च कोटिरित्युच्यते ॥ ११ ॥

त्रिभाधिके चक्रदलाद्विशोधिते
षड्निते चक्रदलाधिके सति।
नवाधिकेऽस्मिन् पतिते भमन्डलाद्
भुजीकृतं शेषमुशन्ति तद्विदः ॥ ११ ॥

केन्द्रे राशित्रयादूने स एव भुजः स्यात्। अधिके राशिषट्काच्छोधिते तच्छेषो भुजः स्यात्। केन्द्रे राशिषट्कादधिके तत्र राशिषट्कं विशोध्य तच्छेषो भुजः स्यात्। केन्द्रे नवाधिके भचक्राच्छोधिते तच्छेषो राश्यादिकं भुजः स्यात् ॥ ११ ॥

कलीकृते तत्र शराक्षिबाहुभि-
र्हृते गतज्यासु गता च जायते ।
गतागतज्यान्तरनिघ्नशेषका-
दिषुद्विदस्राप्तसमन्विता सती ॥ १२ ॥

अभीष्टकेन्द्रे भुजो राश्यादिको लिप्तीकृतः । असावाद्याप्तः । फलं गतज्याः स्यात् । तत्सङ्ख्यां ज्यां विन्यस्य न्यस्तोत्तरज्ययोरन्तरेण तच्छेष-लिप्तादिकं सङ्गुण्य तत्त्वदस्रैर्विभजेत् । २२५ । लब्धं लिप्तादिकं न्यस्तज्यायां योज्यम् । असौ जीवा स्यात् । इत्थं त्रिप्रश्नाधिकारेष्वपि प्राणगणस्य जीवा कर्तव्या ॥ १२ ॥

विशोध्य जीवां शरदग्[द्]गाहते
हृतेऽवशेषे विवरेण जीवयोः ।
[1]
विशुद्धजीवा यतिथा तदाहतैः
शरद्विदस्रैः सहिता धनुर्भवेत् ॥ १३ ॥

पूर्वं धनुर्भागाज्जीवा प्रोक्ता । इदानीं लब्धेष्टग्रहस्य फलज्ञातसिद्ध-जीवाधनुःकरणमुच्यते । त्रिज्यातोऽल्पाभीष्टज्यायां ततो न्यूना ज्या शोध्या । तच्छेषस्तत्त्वदस्राभ्यस्तः । २२५ । शोधितज्यातदुत्तरज्ययोरन्तरेण भाज्यः । फलं कलादिकं स्यात् । शोधितज्या यावती तत्सङ्ख्यया तत्त्वदस्राः । २२५ । गुणनीयाः । असौ कलाराशिः स्यात् । तत्र लब्धं लिप्तादिकं योज्यम् । इत्थं कलाराशिः षष्ट्याप्तो भागादिकं धनुः स्यात् । प्राणज्याया अप्येवमेव धनुः कार्यम् । तत्प्राणधनुः स्यात् ॥ १३ ॥

[स्फुटचन्द्रानयनम्]

त्रिभिर्नगैः सङ्गुणिते खकुञ्जरैः
[2]
स्वकेन्द्रजीवे विभजेत् फलं कलाः ।
तदूनयुक्तौ स्फुटतामिनोडुपा-
वितः स्वकेन्द्रेऽजतुलादिके क्रमात् ॥ १४ ॥

मूलम्— 1. M_1 जीवा च हृतेश्च सङ्ख्यया; M_2. M_3. जीवा च हृतैश्च सङ्ख्यया
2. A_2. S_2. विहृते

स्वदेशार्कोदयकालिकमध्यमार्काद् राशिद्वयमष्टादश भागाः । २, १८ । शोध्याः । तच्छेषराश्यादिकं स्वमन्दकेन्द्रं स्यात् । तत्केन्द्रभुजजीवा त्रिभिर्गुणिता अशीत्याप्ता लब्धं लिप्तादिकं स्यात् । तत् कलादिकं केन्द्रे मेषादिषट्के रवौ शोध्यम् । तुलादिषट्के योज्यम् । असौ स्फुटार्को भवति ।

तदर्कफलकलादिनार्कादीनां भुक्तीः सङ्गुण्य चक्रकलाभिर्विभजेत् । फलं कलादिकं स्वकीयं भुजान्तरफलं स्यात् । तत्कलादिकेन रविवत् सूर्यादयो ग्रहाः संस्कार्याः ।

तथा देशान्तरार्कदोःफलसंस्कृतमध्यचन्द्राच्चन्दोच्चं विशोध्य तच्छेषकेन्द्रजीवा सप्तभिर्गुणिताशीत्याप्ता लब्धं लिप्तादिकं स्यात् । तत्कलादिकं केन्द्रे मेषादिषट्के चन्द्रे शोध्यम् । तुलादिषट्के योज्यम् । असौ स्फुटचन्द्रः स्यात् ॥१४॥

[रविचन्द्रयोः स्फुटभुक्तिः]

स्वभोग्यखण्डं क्षितिखेन्दुभिर्हृतं
रवेर्विधोर्दिग्गुणितं सुरोद्धृतम् ।
तदूनयुक्ते भवतः स्फुटे गती
क्रमात् [1]स्वकेन्द्रे मृगकर्कटादिके ॥ १५ ॥

स्वमन्दोच्चोनिते रविकेन्द्रे दोर्ज्यान्तरमेकाधिकैकशतेनाप्तं फलं लिप्तादिकं स्यात् । तथा चन्द्रस्यापि स्वमन्दकेन्द्रे दोर्ज्यान्तरं दशभिर्गुणितं त्रयस्त्रिंशद्भक्तफलं लिप्तादिकं स्यात् । तत् स्वफलं लिप्तादिकं स्वकेन्द्राद्यान्तपादयोर्मकरादिषट्के स्वमध्यभुक्तिलिप्तासु शोध्यम् । स्वकेन्द्रद्वितीयतृतीयपादयोः कर्कटादिषट्के स्वफलकलादि स्वस्वभुक्तिकलासु योज्यम् । इत्यर्केन्द्वोः स्वस्वभुक्तिः स्फुटा स्यात् ॥१५॥

[भुजान्तरसंस्कारः, अयनांशश्च]

गतिं ग्रहस्यार्कफलोत्थलिप्तिका-
[2]हतां हरेत् खाम्बरभूपलोचनैः ।
फलं कलाद्यत्र भवेत्तदर्कवद्
विधेयमर्कादिखगेष्वृणं धनम् ॥ १६ ॥[3]

मूलम्— 1. Be. Bod. D च for स्व.
2. Bod. गतिर्ग्रहस्यार्कफलस्य लिप्तिका हता हृता
3. After 16, M_3 has व्याख्याकारेण कृतः । Then त्रिघ्नः, see below, next page, line 6.

अर्कफलकलाभिः सूर्यादीनां स्वस्वभुक्ति सङ्गुण्य खाम्बरभूपलोचनैश्चक्रकलाभिर्विभजेत् । २१६०० । लब्धं लिप्तादिकं रवेरिव सूर्यादिषु संस्कार्यम् । रविफलं रवावृणं चेत् तदपि सूर्यादिष्वृणं, धनं चेद्धनं कुर्यादित्यर्थः ।।

व्याख्यानकारेण कृतं मूलम्—

२००
त्रिघ्नः कलिगताब्दौघः खनखाप्तोंऽशकास्ततः ।
५४
वेदार्थाप्तावशेषाः स्युर्द्वयोरल्पं चलांशकाः ।।

कलिगताब्दगणस्त्रिगुणितः शतद्वयेनाप्तः । २०० । फलं भागादिकं स्यात् । तस्माच्चतुःपञ्चाशद्भक्तं । ५४ । फलम् अंशपर्यायाः । शेषांशादिकं पृथक् चतुःपञ्चाशतः शोध्यम् । तच्छेषांशादिकं गम्यं स्यात् । इति शेषगम्ययोर्यदल्पं भागादिकं तदेव तत्तन्मानकाले चलांशा इत्युच्यते । विषमसमपर्यायक्रमेण ते चलांशा ऋणधनसंज्ञिका भवन्ति । ऋणधनत्वे प्रत्ययोऽपि ज्ञेयः । कथमित्युक्ते—मेषसङ्क्रान्तिदिनमध्याह्नच्छाया तुलासङ्क्रान्तिदिनमध्याह्नच्छायातो यद्यधिका तदा चलांशका धनसंज्ञिकाः स्युः । तस्मिन् काले चलांशाः क्रान्त्यादिसाधनार्थं सूर्यादिग्रहेषु योज्याः । यदा मेषतुलार्कसङ्क्रान्त्योर्मध्याह्नच्छाये तुल्ये तदा चलांशा न सन्ति । सैव विषुवच्छाया स्यात् । यदा पुनर्मेषसङ्क्रान्तिदिनमध्याह्नच्छाया तुलासङ्क्रान्तिदिनमध्याह्नच्छायातो न्यूना तदा चलांशा ऋणसंज्ञिकाः स्युः ।

श्लोको व्याख्यानसहितोऽस्माभिः कृतः । अस्मिन् शिष्यधीतन्त्रेऽप्यग्रे चतुष्प्रकारच्छायार्को वक्ष्यते । तच्छायार्कस्फुटार्कयोरन्तरं चलांशाः स्युः । स्फुटार्कच्छायार्कोऽधिके तदन्तरमयनांशा भवन्ति ।। १६ ।।

[चरानयनम्]

स्फुटार्कदोर्ज्या जिनभागजीवया
हता हता व्यासदलेन जायते ।
अपक्रमज्याथ पलप्रभाहता
भवेत् क्षितिज्या रविभिर्हृता च सा[1] ।। १७ ।।

मूलम्— 1. V_2. सती for च सा

Note :—अंशपर्यायाः in line 8 seems to be wrong. It should probably be अर्धपर्ययाः । Similarly, विषमसमपर्यायक्रमेण in line 10-11 should be विषमसमार्धपर्ययक्रमेण . यद्यधिका in line 13 should be यदा न्यूना and यदा न्यूना in line 17 should be यद्यधिका—*KSS.*

अयनांशसंस्कृतस्फुटार्कस्य प्राग्वद् भुजज्यामानयेत् । तां परमक्रान्तिज्यया सङ्गुण्य । १३९७ । त्रिज्यया । ३४३८ । विभजेत् । लब्धं कलादिकं रवेः क्रान्तिज्या स्यात् । मेषादिषट्क उत्तरा स्यात् । तुलादिषट्केऽर्के दक्षिणा । तां विषुवच्छायया सङ्गुण्य द्वादशभिर्विभज्य लब्धं लिप्तादिकं क्षितिज्या स्यात् ॥ १७ ॥

अपक्रमज्याभवनत्रयज्ययो-
र्यदेव वर्गान्तरजं पदं भवेत् ।
द्युरात्रविष्कम्भदलं तदुद्धृतो
वधस्त्रिमौर्वीकुजयोश्चरज्यका ॥ १८ ॥

अर्कक्रान्तिज्यावर्गं त्रिज्यावर्गात् संशोध्य मूलमानयेत् । तत् स्वाहोरात्रार्धमुच्यते । दक्षिणक्रान्तिज्या चेद् दक्षिणम् । उत्तरक्रान्तिज्या चेदुत्तरम् । असौ भागहारः स्यात् । ततस्त्रिज्या क्षितिज्याभ्यस्ता भागहारेणाप्ता फलं चरजीवा स्यात् ॥ १८ ॥

तदीयधन्वासुमयं चरार्धकं
तदाहता चक्रकलोद्धृता गतिः ।
कला ग्रहेषु स्वमजादिगेऽस्तगे
रवौ तुलादावृणमन्यथोद्गते ॥ १९ ॥

तच्चरज्यायाः धनुः कार्यम् । असौ प्राणागणो भवति । तदेवेदं चरार्धं स्यात् । तच्चरार्धेन सूर्यादीनां भुक्तीः सङ्गुण्य चक्रकलाभिर्विभजेत् । लब्धं लिप्तादिकं स्वफलं सूर्ये मेषादिषट्कस्थे सूर्योदयकालिकार्कादिग्रहेषु शोध्यम् । तुलादिषट्कस्थे सूर्यादिषु योज्यम् । इत्थं प्रतिदिनं स्वदेशार्कोदय-कालिका ग्रहा भवन्ति । ततो मेषादिषट्केऽर्के सूर्यास्तमयकालिकेषु सूर्यादिषु योज्यम् । तुलादिषट्के सूर्यादिषु शोध्यम् । एवं सूर्यादयो ग्रहाः प्रतिदिनं स्वदेश-सूर्यास्तमयकालिका भवन्ति ॥ १९ ॥

[दिनरात्रिमानम्]

षड्धृतः प्राणगणो विनाडिकाः
खषड्विभक्ता घटिका भवन्ति ताः ।
चरार्धनाडीभिरिषुत्तमासमाः
पृथग्युतोना घटिका द्विसङ्गुणाः ॥ २० ॥

तुलादिगे दक्षिणगोलगे रवौ
विभावरीवासरयोर्मिती मते ।
क्रियादिगे तूत्तरगोलसंस्थिते[1]
द्युरात्रिमाने भवतः क्रमेण ते ॥ २१ ॥

कृतधनुः प्राणगणश्चरार्धसंज्ञितः । षड्भिराप्तो लब्धं विनाडिकाः । ताः षष्ट्याप्ता लब्धं नाडिका भवन्ति । तद् घटिकादिकं पञ्चदशघटिकासु । १५ । द्विस्थास्वैकत्र योज्यम् । अन्यत्र शोध्यमित्यर्थः । तद्युक्तं दिनार्धम् । तच्छुद्धं रात्र्यर्धम् । तद्द्विगुणितं द्वयं क्रमाद् दिनरात्रिप्रमाणघटिका भवन्ति । मेषादिषट्कस्थेऽर्के मेषादिषट्कमुत्तरगोलसंज्ञकम् । तुलादिषट्कस्थेऽर्के तुलादिषट्कं दक्षिणगोलसंज्ञकम् । प्रतिदिनं चरार्धेन प्राग्वन्निरूपितदिनरात्रिप्रमाणघटिका व्यत्ययेन रात्रिदिनप्रमाणघटिका भवन्ति ॥ २०-२१ ॥

[तिथ्यानयनम्]

दिनकररहितो मृगाङ्कमूर्ति-
र्विहितकलो गगनाक्षिशैलभक्तः ।
फलमिततिथयो[2] गताऽगते स्यु-
र्गतिविवरेण विभाजिते दिनानि[3] ॥ २२ ॥

स्वदेशार्कोदयकालिकात् स्फुटचन्द्राद् भानुं संशोध्य तच्छेषराश्यादिकं कलीकृत्य विंशत्यधिकसप्तशतैर्विभजेत् । लब्धं गततिथयो भवन्ति । तच्छेषकलादिकं गतम् । तदेव पृथग्विंशत्यधिकसप्तशतेभ्यः शोध्यम् । तच्छेषं गम्यं स्यात् । तद् गतं गम्यं षष्टिघ्नं पृथक् पृथग् रवीन्दुभुक्त्यन्तरलिप्ताभिराप्तं घटिकादिकं स्यात् । तद्गतघटिकादिकं वर्तमानतिथौ सूर्योदयात् प्राग्गतं स्यात् । तद् गम्यमर्कोदयात् पश्चाद् भोग्यघटिकादिकं स्यात् ॥ २२ ॥

मूलम्— 1. V_2 ०गे रवौ स्थिते
2. M_2. M_2. M_3 ०मिति तिथयो
3. Bod. D. दिनादि

[योगानयनम्]

भानि खेचरकलाः खखनागै-
र्भाजिता गतिहृते गतगम्ये ।
वासरा रविनिशाकरयोगे
योग एवमितरे[1] गतियुत्या ॥ २३ ॥

स्वदेशस्फुटार्कादिग्रहो लिप्तीकृतः । शतैरष्टभिराप्तः । ८०० । लब्धमश्विन्यादिनक्षत्रगणो भवति । तच्छेषलिप्तादिकं गतम् । तत् पृथक् शताष्टकाच्छोध्यम् । तच्छेषलिप्तादिकं गम्यं स्यात् । तद्गतं गम्यं च भुक्तिलिप्तादिभिर्विभजेत् । लब्धं दिनादिकं स्यात् । वर्तमाननक्षत्रेऽभीष्ट-दिने गतदिनादिकं गतमेव । गम्यं भोग्यदिनादिकं स्यात् । चन्द्रगतगम्यदिनादिकं षष्टिघ्नं स्वभुक्तिलिप्ताप्तफलं घटिकादि स्यात् । तद् गतमर्कोदयात् प्राग्गतं स्यात् । गम्यं वर्तमाननक्षत्रेऽर्कोदयात् परतो घटिकादिकं स्यात् ।

स्फुटार्केन्द्वोर्योगो लिप्तीकृतोऽष्टभिः शतैराप्तफलं विष्कम्भादि-योगा भवन्ति । तच्छेषलिप्तादिकं गतम् । तच्छुद्धाष्टशतशेषं गम्यं कलादिकं स्यात् । तद् गतं गम्यं च षष्टिघ्नं रवीन्दुभुक्तियोगकलाप्तं फलं घटिकादिकं क्रमाद् वर्तमानयोगेऽर्कोदयाद् गतं गम्यं च भवति ॥ २३ ॥

[करणानयनम्]

व्यर्कशीतकरलिप्तिकागणा-
दाप्यते करणमभ्रषड्गुणैः ।
तद्विरूपमगभक्तशेषकं
विद्धि शेषविधिरत्र यस्तिथेः ॥ २४ ॥

शशिनि कृशशरीरे या चतुर्दश्यवश्यं
शकुनिरपरभागे जायते नाम तस्याः ।
तदनु तिथिदले ये ते चतुष्पादनागे
प्रतिपदि च यदाद्यं तद्धि किंस्तुघ्नमाहुः ॥ २५ ॥

मूलम् — 1. Bod. D. इतरत्

स्वदेशार्कोदयकालिकस्फुटचन्द्रादर्कं विशोध्य तच्छेषराश्यादिको लिप्तीकृतः षष्ट्यधिकशतत्रयेण भक्तः। लब्धं विरूपं सप्ताप्तमवशेषो बबादिचलकरणानि। तथा कृष्णचतुर्दश्यपरभागेऽमावस्यायां शुक्लप्रतिपत्पूर्वभागे च क्रमाच्छकुनिचतुष्पदनागकिंस्तुघ्नाख्यानि स्थिरकरणानि भवन्ति। तद्भुक्तशेषकलादिकं गतम्। तच्छुद्धषष्ट्यधिकशतत्रयशेषकलादिकं गम्यं च षष्टिघ्नं रवीन्दुभुक्त्यन्तरकलाप्तं घटिकादिकं क्रमाद् गतं गम्यं च स्यात्। तद्वर्तमानकरणेऽभीष्टदिनेऽर्कोदयाद् गतं गम्यं च स्यात्॥ २४–२५॥

[दर्शकालः]

गततिथिघटिकाघ्ने[1] सूर्यशीतांशुभुक्ती
गगनरसविभक्ते शोधयेत् तत् कलाभ्यः।
धनमपि च विदध्याद्[2] भोग्यनाडीभिरेवं
समगृहलवलिप्तालिप्तिकौ तौ[3] भवेताम्॥ २६॥

मासान्ते रविशशिनौ समौ भवेतां
पक्षान्ते लवकलिकाविलिप्तिकाभिः[4]।
अन्यस्यामपि च तिथौ[5] तदावसाने
तुल्यौ स्तः खलु कलिकाविलिप्तिकाभिः॥ २७॥[6]

शूलम्— 1. Bod. D घ्न्यौ च

2. B. Bod. D च विधेयं

3. M_1. M_2. M_3 ०प्तालिप्तिकान्तौ

4. A_2. Be. Bo_1. Bo_2 Bod. V_3
मासान्ते लवकलिकाविलिप्तिकाभिः
पक्षान्ते रविशशिनौ समौ भवेताम्।

5. B. Be. Bod. D अन्यस्या अपि च तिथेः सदावसाने

6. After 27, the chapter in A_1. A_2. B. BO_1. BO_2. S_1. S_2. M_2. M_3. V_1. V_2. V_3 finishes. After 27, Be. Bod. D have इति तिथ्याद्यानयनाधिकारः। They continue with the next chapter as a part of this chapter.

स्वदेशार्कोदयकालिकां वर्तमानतिथिघटिकाभिरर्कभुक्तिं चन्द्रभुक्तिं च पृथक् पृथक् सङ्गुण्य षष्ट्या विभजेत् । लब्धं लिप्तादिकं स्वकीयं रवीन्द्वोः पृथक् पृथक् शोध्यम् । तौ वर्तमानतिथेः पूर्वतिथ्यन्तकालिकौ भवतः । तदा भोग्यघटिकाभिर्गुणितषष्ट्याप्तफललिप्तादिकसंयुक्तौ रविचन्द्रौ वर्तमानतिथ्यन्तकालिकौ भवतः । इत्थं कृततात्कालिकावमावास्यान्तश्चेदर्कचन्द्रौ राशिभागलिप्ताविलिप्ताभिस्तुल्यौ भवतः ॥ २६-२७ ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

रविचन्द्रस्पष्टीकरणं नाम द्वितीयोऽध्यायः ॥

अथ कुजादिस्पष्टीकरणं नाम

तृतीयोऽध्यायः

अथ कुजादिस्पष्टीकरणाध्यायो व्याख्यायते ।

[ग्रहाणां मन्दोच्चशीघ्रोच्चांशाः]

११८ २१० १८० ९० २३६
वस्वीशा दशबाहवोऽम्बरधृतिः खाङ्का रसत्र्यश्विनो
१४ ७ ४ ९
मन्दांशा मनुशैलशैलयुगगोसङ्ख्याः स्वमान्द्या गुणाः ।
५३ ३१ १६ ५९
शैघ्र्या रामशराः शशाङ्कदहना भूपास्त्रिवर्गेषवो
९
नन्दाश्च क्षितिजज्ञजीवभृगुजच्छायासुतानां क्रमात् ॥ १ ॥[1]

आर्यभटाचार्यमते भौमादीनां मन्दोच्चपाठभेदाः पृथक् पृथग् विद्यन्ते । ग्रहाणां स्फुटीकरणप्रकारा अपि बहवः । तत्रोक्तैः स्वल्पप्रकारैरपि स्फुटीकृता ग्रहा स्वल्पान्तरा भवन्त्येव । तत् कथमित्युक्ते — ग्रहाणां स्वमन्दोच्चाख्य-शीघ्रोच्चाख्य-ग्रहाकृष्टपूर्वापरदिग्भागादिक - साक्षात्परिमाणस्य दुर्लक्ष्यत्वादनेकप्रकारस्पष्टीकरणेन निश्चयस्याशक्यत्वात् पूर्वशास्त्राण्यालोच्य तदनुसारेणानेकप्रकारा आर्यभटाचार्येणोक्ताः । तस्मादेषां प्रकाराणां मध्य एकप्रकारेण कदाचित् स्पष्टाः, अपरेण प्रकारेणान्यथा । गोलवशात् कालवशान्मन्दोच्चशीघ्रोच्चानामिच्छाकर्षणवशाच्च ग्रहा दूक्तुल्यतां गच्छन्तीति स्पष्टीकरणं बहुधा ज्ञातव्यम् । एवं तत्र मन्द्रोच्चभागानां बहुसम्मत्या द्वितीयपाठोऽस्ति—"वस्वर्का नखबाहवो द्यृगभुवः खाष्टौ वसुत्र्यश्विनो मन्दाशाः"[1] इति ।

आद्यपाठे भौमस्य मन्दोच्चांशा शतमष्टादशाधिकम् । ११८ ।

मूलम्— 1. Be. Bod. D mark this verse as 28, in continuation of the previous chapter.

व्याख्या—1. Vs. has this after 1, with the prefatory words मतान्तरमाह ।

बुधस्य शतद्वयं दशाधिकम् । २१० । गुरोः शतमशीत्यधिकम् । १८० । शुक्रस्य नवतिः । ९० । सौरेः शतद्वयं षट्त्रिंशदधिकम् । २३६ ।

द्वितीयपाठे भौमस्य मन्दोच्चांशाः शतमष्टाविंशतिश्च । १२८ । बुधस्य शतद्वयं विंशतिश्च । २२० । गुरोः शतं द्विसप्ततिश्च । १७२ । शुक्रस्याशीतिः । ८० । सौरेः शतद्वयमष्टत्रिंशच्च । २३८ ।

भौमादीनां मन्दफलशीघ्रफलार्थं सिद्धान्तेषु मन्दपरिध्यंशाः शीघ्रपरिध्यंशाश्च प्रोक्ताः । तत्फलार्थमत्र गुणकाराः पठिताः । भौमस्य मन्दगुणकाश्चतुर्दश । १४ । बुधस्य सप्त । ७ । गुरोः सप्त । ७ । शुक्रस्य चतुष्टयम् । ४ । सौरेर्नव । ९ । ततो भौमशीघ्रगुणकारस्त्रिपञ्चाशत् । ५३ । बुधस्यैकत्रिंशत् । ३१ । गुरोः षोडश । १६ । शुक्रस्यैकोनषष्टिः । ५९ । सौरेर्नव । ९ ॥ १ ॥

४ २ १ २ ४
वेदाक्षीन्दुयमाब्धिभिर्भृदुभवां दोर्ज्यां क्रमेणाहतां
३४३८ 1 2
व्यासार्धेन भजेद् गुणाः फलयुता हीनौ ज्ञभृग्वोः स्फुटाः ।
२ २ १ २ १ 3
द्विद्वीन्दुद्विकुभिर्हतां चलभवां दोर्ज्यां भजेत् त्रिज्यया
सर्वे शीघ्रभवाः फलेन रहिताः स्पष्टाः स्युरेवं गुणाः ॥२॥

भौमादिकाद् ग्रहात् स्वमन्दोच्चं त्यक्त्वा तन्मन्दकेन्द्रे स्वदोर्ज्यां चतुर्भिः । ४ । द्वाभ्यां । २ । एकेन । १ । द्वाभ्यां । २ । चतुर्भिः । ४ । हत्वा क्रमेण पृथक्-पृथक् त्रिज्यया विभजेत् । लब्धं स्वकीयभौमगुरुसौरीणां स्वमन्दगुणकेषु योज्यम् । बुधशुक्रयोः स्वमन्दगुणकयोः शोध्यम् । इत्थं मन्दस्फुटगुणकाः स्युः दोर्ज्यानाम् ।

स्वशीघ्राद् भौमादीन् त्यक्त्वा तच्छीघ्रकेन्द्रस्वस्वदोज्यां द्वाभ्यां । २ । द्वाभ्यां । २ । एकेन । १ । द्वाभ्यां । २ । एकेन । १ । सङ्गुण्य त्रिज्यया विभजेत् । लब्धं स्वकीयं स्वशीघ्रगुणकेषु संशोध्यम् । स्वशीघ्रस्फुटगुणकाः स्युः । स्वदोर्ज्यानां कोटिज्यानां च ॥ २ ॥

मूलम्— 1. Bod हृताः
2. M1. M2. M3 स्फुटात्
3. Bod. D ०र्हता चलभवा दोर्ज्या हृता त्रिज्यया

[मन्दशीघ्रकर्णयोरानयनम्]

दोर्ज्यावर्गविवर्जितत्रिभवनज्यावर्गमूलं भवेत्
कोटिज्या भुजभागवर्जितनवत्यंशोत्थजीवाथवा ।
स्पष्टस्वस्वगुणाहते खवसुभिर्दोःकोटिजीवे हृते[1]
स्यातां दोःफलकोटिसंज्ञकफले ताभ्यां श्रुतिं साधयेत् ॥३॥

त्रिज्यावर्गात् केन्द्रदोर्ज्यावर्गं त्यक्त्वा मूलं कोटिजीवा स्यात् । अथवा केन्द्रभुजभागान् नवतेः संशोध्य तच्छेषभागानां जीवा कार्या । सा कोटिजीवा स्यात् । भुजज्या कोटिज्या पृथक् पृथक् स्फुटगुणकगुणिता अशीत्याप्ता । ८० । लब्धं स्वकीयं भुजस्य कोटेश्च फलं स्यात् । तत् कोटिफलं केन्द्राद्यन्तपादयोस्त्रिज्यया योज्यम् । मध्यमपादयोः शोध्यम् । ततस्तद्वर्गाद् भुजाफलवर्गसंयुक्तान्मूलं मन्दकेन्द्रे मन्दकर्णः स्यात् । शीघ्रकेन्द्रे शीघ्रकर्णः स्यात् ॥३॥

[ग्रहस्फुटानयनम्]

मन्दोच्चभागरहितग्रहबाहुमौर्व्या
संसाध्य बाहुफलमस्य धनुर्दलेन ।
संस्कृत्य मध्यममृणं स्वमवेत्य[2] केन्द्रात्
संशोधयेच्च तदनष्टमतश्चलोच्चात् ॥ ४ ॥

शेषं भवेत्तु चलकेन्द्रमतो भुजज्यां
कोट्याह्वयां च विदधीत तयोः फले च[3] ।
कोटीफलेन रहिता सहिता त्रिभज्या
कार्या कुलीरमकरादिगते स्वकेन्द्रे ॥ ५ ॥

तद्वर्गबाहुफलवर्गसमासमूलं
कर्णो भवेद् भुजफलं गुणितं त्रिमौर्व्या ।
कर्णोद्धृतं कृतधनुः फलमाशुसंज्ञं[4]
स्यात्तद्दलं स्वमथवार्णमनष्टसंज्ञे ॥ ६ ॥

मूलम्— 1. Be. हरेत् 2. M1. M2. समवेक्ष्य; M3 समवेत्य
3. Bod. D तत फलेन 4. Bod. D ०संख्यं

कार्ये क्रियाद्यथ तुलाद्यवगम्य केन्द्रं
प्राग्वत्ततो मृदुफलं सकलं विधेयम् ।
मध्ये पुनश्चलफलेन ततोऽखिलेन
प्राग्वत् सुसंस्कृततनुः[1] स्फुटतामुपैति ॥ ७ ॥

अर्कफलसंस्कृतस्वदेशार्कोदयकालिकान्मध्यमग्रहात् स्वमन्दोच्चं त्यक्त्वा तन्मन्दकेन्द्रदोर्ज्यां स्फुटगुणकगुणितामशीत्या । ८० । विभजेत् । लब्धलिप्ता मन्दफलज्या स्यात् । तद्धनुर्लिप्ताद्यर्धं मेषादिकेन्द्रे स्वमध्यग्रहे शोध्यम् । तुलादिकेन्द्रे योज्यम् ।

अनष्टं पृथक् स्थाप्य स्वशीघ्रोच्चात् त्यक्त्वा तच्छीघ्रकेन्द्रदोर्ज्यां कोटिज्यां च स्वस्फुटगुणकेन सङ्गुण्याशीत्या । ८० । विभजेत् । लब्धं क्रमाद् भुजफलं कोटिफलं च । तत् कोटिफलं केद्राद्यन्तपादयोस्त्रिज्यायां योज्यम् । मध्यमपादयोः शोध्यम् । ततस्तद्वर्गाद् भुजफलवर्गयुक्तान्मूलं शीघ्रकर्णः स्यात् । ततो भुजफलं त्रिज्याभ्यस्तं शीघ्रकर्णाप्तं लिप्तादि शीघ्रफलजीवा स्यात् । तद्धनुषोऽर्धं मेषादिकेन्द्रे धनमनष्टसंज्ञके कुर्यात् । तुलादिकेन्द्र ऋणमनष्टसंज्ञके कुर्यात् ।

तस्मादेव ग्रहात् स्वमन्दोच्चं त्यक्त्वा तन्मन्दकेन्द्रे प्राग्वन्मन्दधनुर्लिप्तादिकमानयेत् । तदानीं तत् फलं सकलं मध्यग्रहे प्राग्वत् संस्कार्यम् । असौ मन्दस्फुटग्रहो भवति ।

तमेव पृथक् शीघ्रात् संशोध्य तच्छीघ्रकेन्द्रे प्राग्वच्छीघ्रफलधनुर्लिप्तादिकमानीय तच्छीघ्रफलं सकलं मन्दस्फुटग्रहे प्राग्वत् संस्कार्यम् । असौ स्फुटग्रहो भौमादिकः स्यात् ॥ ४–७ ॥

शीघ्रोद्भवेन दलितेन फलेन पूर्वं
संस्कृत्य वा ग्रहमतो विदधीत मान्दम् ।
तेनाखिलेन सकलेन च शीघ्रजेन
प्राग्वत् स्फुटो भवति संस्कृतिभाग्ग्रहः सः[2] ॥ ८ ॥

अथवा स्वशीघ्रान्मध्यग्रहं विशोध्य तच्छीघ्रकेन्द्रे प्राग्वत् स्वशीघ्रफलार्धं मध्यग्रहे संशोध्य तमनष्टम् । तस्मान्मन्दोच्चं त्यक्त्वा तन्मन्केन्द्रे

मूलम्— 1. D. सुसंस्कृतधनुः; Bod संस्कृतधनुः
2. B. Be. BO_1. BO_2 संस्कृतिभाग्ग्रहः सः ; A_2. Bod. D. S_2. V_3 संस्कृतिभाग्ग्रहः सः; V_2. संस्कृतिभाग्ग्रहः स्यात्

प्राग्वन्मन्दफलार्धमनष्टग्रहे संस्कृत्य ततस्तस्मान्मन्दोच्चं त्यक्त्वा तन्मन्दकेन्द्रे प्राग्वत् फलमानीय मन्दफलं सकलं मध्यग्रहे संस्कार्यम् । असौ मन्दस्फुटो भवति । तत् पृथक् स्वशीघ्रात् संशोध्य तच्छीघ्रकेन्द्रे प्राग्वच्छीघ्रफल सकलं मन्दस्फुटग्रहे संस्कुर्यात् । असौ स्फुटग्रहो भवति ॥ ८ ॥

केचिद् वदन्ति बुधशुक्रपरिस्फुटत्वं
मध्यान्मृदूच्चरहितान्मृदुना फलेन ।
शीघ्रोच्चमध्यरहिताच्चलसंज्ञितेन
संसाधितेन सकलेन सकृद् विदध्यात् ॥ ९ ॥

भानोः फलेन परमेण दलीकृतेन
स्पष्टो भृगुर्विरहितोऽतिपरिस्फुटः स्यात् ।
सूर्योच्चवर्जितशशाङ्कजशीघ्रतुङ्गा-
[1]
ज्जातेन भास्करफलेन बुधोऽर्कवच्च ॥ १० ॥

मध्यमबुधशुक्राभ्यां पृथक् पृथङ् मन्दोच्चं त्यक्त्वा तत् स्वमन्दकेन्द्रे प्राग्वन्मन्दफलमानीय तत् सकलं स्वकीयं मध्यमबुधशुक्रयोः संस्कुर्यात् । तदा मन्दस्फुटौ भवतः । ततः शीघ्रान्मध्यमावेव बुधशुक्रौ त्यक्त्वा । पुनः पाठान्तरम् । ततः [1] स्वशीघ्रान्मध्यमान्नौ बुधशुक्रौ त्यक्त्वा । ततः स्वशीघ्रकेन्द्रे प्राग्वच्छीघ्रफलमानीय तत् सकलं स्वकीयं प्रागुक्तमन्दस्फुटबुधशुक्रयोः संस्कुर्यादिति । तौ बुधशुक्रौ कर्मद्वयसंस्कृतौ स्फुटौ भवतः ।

ततो भानोः परमफलार्धं लिप्ताचतुःषष्टिविलिप्ताः सप्तविंशतिः । ६४ । २७ । एतद् भानुफलार्धं कर्मद्वयसंस्कृतशुक्रे शोध्यमिति । अतिस्फुटः शुक्रः स्यात् ।

बुधशीघ्रोच्चात् सूर्योच्चं त्यक्त्वा तत् केन्द्रेऽर्कफलमानीय । तत् फलं रवेः फलम् । रवौ यद्वत् तद्वदेव कर्मद्वयसंस्कृते बुधे संस्कार्यम् । इत्यतिपरिस्फुटो बुधोऽपि स्यात् ।

इत्यार्यभटशिष्याः केचिद् वदन्ति । ग्रहाणां स्फुटीकरणम् । ग्रहभुक्तेश्च स्फुटीकरणम् । पृथक् पृथगस्ति । इति सूचितम् ॥ ९-१० ॥

मूलम्— 1. M_1. M_2 M_3 भागविफलेन

व्याख्या -1. Not clear ; मन्दस्पष्टौ, perhaps.

Note :—पुनः पाठान्तरम् । ततः स्वशीघ्रान्मध्यमान्नौ बुधशुक्रे त्यक्त्वा । in lines 15-16 is interpolatory and may be omitted by the reader.—*KSS.*

[मन्दस्फुटभुक्तिः]

ज्याखण्डकेन गुणिता मृदुकेन्द्रजेन
भुक्तिर्ग्रहस्य शरयुग्मयमैर्विभक्ता ।
लब्धा स्फुटेन गुणकेन हृता खनागै-
र्लिप्ता गतेः फलमृणं धनमुक्तवच्च ॥ ११ ॥

स्वमन्दकेन्द्रदोर्ज्यान्तराभ्यस्ता ग्रहभुक्तिस्तत्त्वदस्राप्ता । २२५ । लब्धं भुक्तिज्या स्यात् । स्वस्वमन्दस्फुटगुणकेन गुणिताशीत्याप्ता लब्धलिप्तादिकं स्वभुक्तेः फलं स्यात् । तत् फलं मन्दकेन्द्राद्यन्तपदयोः स्वभुक्तौ शोध्यम्, मध्यपदादयोः स्वभुक्तौ योज्यमिति, मन्दफलसंस्कृतभुक्तिः स्यात् ॥ ११ ॥

[शीघ्रस्फुटभुक्तिः]

तद्वर्जिता स्वचलतुङ्गगतिः स्वभोग्य-
खण्डाहता शरयमाग्निहृता हता च ।
स्वेन स्फुटेन गुणकेन खनागभक्ता
त्रिज्याहता श्रुतिहृताशुफलं गतेः स्यात् ॥ १२ ॥

मन्दस्फुटा ग्रहगतिः स्फुटतामुपैति
युक्तोनिता विरहिता सहितामुना च ।
शीघ्राभिधाननिजकेन्द्रपदक्रमेण
वक्रा गतिर्भवति चेदृणतो[1] विशुद्धा ॥ १३ ॥

४५ ३१ २० ५०
बाणाब्धिभिः शशिगुणैः खयमैः खबाणै-
६ २
रङ्गैर्लवैस्त्रिगृहमाद्यपदं युतं स्यात् ।
[3]ऊनं तृतीयमिति केन्द्रपदोक्तलक्ष्म
बुध्वा गतौ चलफलं स्वमृणं विधेयम् [4] ॥ १४ ॥

मूलम्— 1. M_1. M_2. M_3 वह्वृणतो 2. Bod M_1. M_2. M_3 ०र्भवैः
3. M_3. om. ऊनं ·····विधेयम्
4. A_1 S_1. do not give प्रतीक of 14, but explain it in the commentary.

मन्दफलसंस्कृतभुक्ति स्वशीघ्रभुक्ततस्त्यक्त्वा तच्छेषकेन्द्रभुक्ति शीघ्रकेन्द्रदोर्ज्यान्तरेण सङ्गुण्य तत्त्वदस्रैर्विभजेत् । लब्धं केन्द्रभुक्तिजीवा स्यात् । तां स्वशीघ्रकेन्द्रस्फुटगुणकेन सङ्गुण्याशीत्या लब्धं पुनस्त्रिज्यया संगुण्य स्वशीघ्रकर्णेन विभजेत् । लब्धं लिप्तादिकं स्वभुक्तेः शीघ्रफलं स्यात् । तत् फलं स्वशीघ्रकेन्द्रे कल्पितपदकल्पनया प्रथमादिपादेषु क्रमाद्धनर्णधनं कार्यम् । स्वशीघ्रकेन्द्रे भुक्त्यर्थं पदकल्पनान्यास. कथ्यते ।

तत् कथमित्युक्ते । भौमस्य शीघ्रकेन्द्रे भुक्तिसंस्कारार्थं प्रथमपादे राशिचतुष्टयं पञ्चदशभागाश्च । ४ । १५ । ततः परं द्वितीयपाद एको राशिः पञ्चदशभागाश्च । १ । १५ । ततः परं तृतीयपाद एको राशिः पञ्चदशभागाश्च । १ । १५ । ततः परं राशिचतुष्टयं पञ्चदशभागाश्च । ४ । १५ । इत्याद्यन्तपादयोस्तुल्यत्वं ज्ञेयम् ।

तथा बुधशीघ्रकेन्द्र आद्यपादे राशिचतुष्टयमेको भागः । ४ । १ । द्वितीयपाद एको राशिरेकोनत्रिंशद्भागाः । १ । २९ । तथा तृतीयपाद एको राशिरेकोनत्रिंशद्भागाः । १ । २९ । चतुर्थपादे राशिचतुष्टयमेको भागः । ४ । १ ।

तथा गुरोः शीघ्रकेन्द्र आदयपादो राशित्रयं विंशतिभागाश्च । ३ । २० । द्वितीयपादो राशिद्वयं दशभागाश्च । २ । १० । तद्वत्तृतीयपादः । २ । १० । आदयपादवदन्त्यपादः । ३ । २० ।

तथा शुक्रस्य शीघ्रकेन्द्र आद्यपादो राशिचतुष्टयं विंशतिभागाश्च । ४ । २० । तद्वदन्त्यपादः । ४ । २० । द्वितीयपाद एको राशिर्दशभागाश्च । १ । १० । तद्वत्तृतीयपादः । १ । १० ।

तथा शनैश्चरस्य शीघ्रकेन्द्र आद्यपादो राशित्रयं षड्भागाश्च । ३ । ६ । तद्वदन्त्यपादः ३ । ६ । द्वितीयपादो राशिद्वयं चतुर्विंशतिभागाश्च । २ । २४ । तद्वत्तृतीयः । २ । २४ ।

इत्थं भौमादीनां स्वशीघ्रकेन्द्राद्यन्तपादान्तदिने शीघ्रधनफलं सम्पूर्णं परमफलं स्यात् । तथा द्वितीयतृतीयपादान्तदिन ऋणफलमपि सम्पूर्ण परमफलं स्यात् । परमफलदिने मन्दस्फुटभुक्तिरेव स्फुटभुक्तिः स्यात् । तदितरदिवसेषु मन्दस्फुटा भुक्तिः स्वशीघ्रफलसंस्कृता स्फुटभुक्तिः स्यात् ।

स्फुटभुक्तिरप्येकदिवसे स्फुटग्रह एव । तस्माद् ग्रहवद् ग्रहभुक्तिः स्वमन्दकेन्द्रफलार्धसंस्कृता । पृथक् सैव स्वशीघ्रभुक्तितः शोध्या । तच्छेषं शीघ्रकेन्द्रभुक्तिरित्युच्यते । ततः शीघ्रफलमानीय तदर्धेन पूर्वोक्तक्रमेण स्वशीघ्रकेन्द्राद्यन्तपादयोर्मन्दफलार्धसंस्कृता मध्यमा भुक्तिर्मन्दस्फुटभुक्तिः स्यात् । तां पृथक् पृथक् स्वशीघ्रकेन्द्रभुक्ततस्त्यक्त्वा तच्छीघ्रकेन्द्रभुक्तिफलमानीय तत्फलेन सकलेन प्राग्वच्छीघ्रकेन्द्रादयन्तपादयोर्मन्दस्फुटभुक्तिसहिता कार्या । सा

स्फुटभुक्तिः स्यात् । शीघ्रकेन्द्रे द्वितीयतृतीयपादयोरानीतभुक्तेः शीघ्रफलेन सकलेन लिप्तादिकेन रहिता मन्दस्फुटभुक्तिः कार्या । सा स्फुटभुक्तिःस्यात् ।

शीघ्रकेन्द्रकलिप्तद्वितीयतृतीयपादयोर्भुक्तेः शीघ्रफलिप्तादिकमूणं तथा मन्दस्फुटभुक्तेरधिकं चेत् तदा तदन्तरं लिप्तादिकं वक्राख्या स्फुटभुक्तिः स्यात् ॥ १२-१४ ॥

[चन्द्रभुक्तिः]

मध्यस्फुटान्तरदलेन चलात् समेता-
न्मध्ये स्फुटात् समधिके सति चान्यथोनात् ।
स्पष्टं त्यजेत् कृतषडष्टसु तत्रभेषु
वक्रातिवक्रकुटिला गतयो भवन्ति ॥ १५ ॥

पूर्वोक्तकल्पनाक्रमेण स्वशीघ्रकेन्द्रद्वितीयतृतीयपादसमयादिवसेषु मन्दग्रहस्फुटग्रहयोरन्तरार्धं तदा स्फुटग्रहान्मध्यग्रहेऽधिके स्वशीघ्रे संयोज्यम् । यदि मध्यग्रहात् स्फुटग्रहेऽधिके तयोरन्तरार्धं स्वशीघ्रात् संशोध्यम् । ततस्तथा संस्कृतात् स्वशीघ्रोच्चात् स्फुटग्रहं त्यजेत् । तच्छेषो राशिचतुष्टयं तदा तस्य ग्रहस्य वक्रप्रारम्भः स्यात् । तच्छेषो यदा राशयष्टकं तदा वक्रत्यागः स्यात् । तद्वक्रमध्ये काले वक्राभुक्तिरेव नास्ति । तत् प्रवेशत्यागदिनयोर्मध्यदिवसेषु वक्रभुक्तिरेव । तत् प्रवेशात् भुक्तिरधिका स्यात् । वक्रप्रवेश वक्रत्यागदिनयोर्ग्रहस्य प्रागपि तत् त्यागात् परतोऽपि ऋजुभुक्तिरेव स्यात् ॥ १५ ॥

[चन्द्रोच्चभुक्तिः]

यच्चन्द्रकेन्द्रगतिरेव शरद्विदस्रै-
र्भक्ता फलं जनितमार्यभटस्य शिष्यैः ।
तेन स्फुटा गतिरतीतदिनेन्दुभुक्ति-
मारूपयति कार्यसमया न तु वर्तमाने ॥ १६ ॥

चन्द्रभुक्तितश्चन्द्रोच्चभुक्तिः शोध्या । तच्छेषश्चन्द्रकेन्द्रभुक्तिः । लिप्तास्त्र्यशीत्यधिकसप्तशतानि चतुःपञ्चाशद् विलिप्ताश्च । ७८३ । ५४ । अस्या जीवा साध्या । कथमित्युक्ते- चन्द्रस्फुटीकरणसमये तच्चन्द्रकेन्द्रभुजलिप्ता द्विधा स्थाप्याः । एकत्र त्र्यशीत्यधिकसप्तशतलिप्ताश्चतुःपञ्चा-

Note – Lines 16 to 18 should probably read as follows : स्यात् । तद्वक्रमध्ये काले वक्राभुक्तिरधिका स्यात् । वक्रप्रवेशवक्रत्यागदिनयोः ग्रहस्य भुक्तिरेव नास्ति । वक्रप्रवेशवक्रत्यागदिनयोर्मध्यदिवसेषु वक्रभुक्तिरेव । तत्प्रवेशात् प्रागपि तत्त्यागात् परतोऽपि ऋजुभुक्तिरेव स्यात् । —*KSS*

शद्विलिप्ताः । शेषलिप्तातः प्राग्वज्जीवा साध्या । तथा पृथक्स्थितलिप्ताराशेरपि जीवा साध्या । इत्थं भुजजीवाद्वयं साध्यम् । तयोरन्तरं चन्द्रकेन्द्रभुक्तेर्जीवा स्यात् । तां चन्द्रकेन्द्रभुजज्यां परिकल्प्य चन्द्रगुणकेन सप्तभिः ।७। सङ्गुण्याशीत्या ।८०। विभजेत् । लब्धं चन्द्रभुक्तेः फलं कलादिकं स्यात् । तत् कलादिफलेन प्राग्वत् केन्द्रवशान्मध्यमा भुक्तिः संस्कार्या । सा स्फुटभुक्तिः स्यात् । इत्थमेव कार्येणार्यभटाचार्यशिष्यैश्चन्द्रभुक्तिः स्फुटीकृता तच्चन्द्र ओजपादे यदा स्यात् तदा सा पूर्वदिनस्फुटभुक्तिः स्यात् ॥ १६ ॥

सूर्येन्दुमन्दगुणकौ मृदुकर्णनिघ्नौ
त्रिज्योद्धृतौ भवत एवमिह स्फुटौ तौ ।
ताभ्यां पुनः स्वभुजकोटिफले[1] विधेये
साध्ये श्रुती मुहुरतः[2] स्वगुणौ श्रुती च ॥ १७ ॥

त्रिज्याहता ग्रहगतिर्मृदुकर्णभक्ता
मन्दस्फुटा भवति तद्रहिताशुभुक्तिः ।
त्रिज्याहता स्वचलकर्णहताशुचाप-
भोग्यज्यया विगुणिता विहृतादिमौर्व्या[3] ॥ १८ ॥

लब्धं त्यजेत् स्वचलतुङ्गगतेः सदैव
शेषं स्फुटा भवति च ग्रहभुक्तिरेवम् ।
लब्धं भवेद् यदधिकं चलतुङ्गभुक्ते-
र्व्यस्तं भुनक्ति खचरः प्रतिवासरं तत् ॥ १९ ॥

रवीन्द्वोः स्फुटीकरणसमये स्वकेन्द्रे पूर्वोक्तप्रकारेण भुजकोटिफलाभ्यां स्वमन्दकर्णमानयेत् । तौ स्फुटमन्दगुणकगुणितौ त्रिज्याप्तौ लब्धे पृथक् पृथक् स्वस्वगुणकौ भवतः । ताभ्यां पुनः स्वभुजकोटिफले आनीय ताभ्यां पृथक् कर्णावानयेत् । तौ भूयोऽपि स्वमन्दगुणकगुणितौ त्रिज्यया विभक्तौ । इत्थमविशेषेण स्वस्वगुणकावानीय ताभ्यां पुनर्भुजकोटिफल आनीय ताभ्यां प्राग्वत् कर्णावानयेत् । ताभ्यां पुनर्मन्दगुणकौ । तद्रविचन्द्रयोः स्वकीयस्फुटगुणकौ भवतः ।

मूलम्—1. B. Be. Bo_1. Bo_2. Bod. D. विधाय
2. M_1. M_2. M_3 तयोर्मुहुरतः 3. Bod. D. विहृताद्यमौर्व्या

तथा भौमादीनामपि स्वस्वभुजकोटिफलाभ्यां स्वस्वकर्णमानयेत् । तेन पुनः स्वकीयस्वकीयमन्दस्फुटा गुणका भवन्ति ।

सूर्यादीनां मध्यभुक्तयस्त्रिज्ययाभ्यस्ताः स्वमन्दकर्णैराप्ता लब्धं रवीन्द्वोः स्वकीयस्फुटभुक्तिलिप्तादिकं भवति । भौमादीनां स्वकीयं फलं स्वस्वमन्दस्फुटभुक्तिलिप्ता भवन्ति । ततो भौमादीनां मन्दस्फुटभुक्तयः स्वस्वशीघ्रभुक्तिषु शोध्याः । तच्छेषाः स्वस्वशीघ्रकेन्द्रभुक्तयो भवन्ति । तास्त्रिज्ययाभ्यस्ताः स्वकीयान्त्यकर्णाप्ताः । तत् स्वस्वलब्धानि । तानि पुनः स्वकीयान्त्यशीघ्रफलधनुःकरणकालिकभोग्यज्याखण्डेन सङ्गुण्याद्यमौर्व्या तत्वदस्रैः । २२५ । विभजेत् । लब्धं फलं कलादिकं स्यात् । तत् कलादिकं स्वशीघ्रोच्चभुक्तितः शोध्यम् । तच्छेषकलादिकं स्फुटभुक्तिः स्यात् ।

फलं कलादिकं यदा शीघ्रोच्चभुक्तेरधिकं स्यात् तदा शीघ्रोच्चभुक्तिः कलादिकाच्छोध्या । तच्छेषकलादिकं वक्राख्या स्फुटभुक्तिः स्यात् । इत्थं वा रवीन्द्वोः स्फुटभुक्तिभौमादीनां ग्रहाणां मन्दस्फुटभुक्तिर्भवति । भुक्तीनां स्पष्टीकरणप्रकारः पूर्वोक्तप्रकारादयमतिस्पष्टतरो भवतीति तज्ज्ञैर्विज्ञेयः । तथा पाठप्रकारस्पष्टीकरणे ज्ञातव्यः ।

पाठान्तरपठितैर्मन्दोच्चांशैरपीति त्रिभिः प्रकारैः स्पष्टीकरणप्रकरणं ज्ञातव्यम् । स्फुटग्रहा अपि सम्यग्दृग्गोचरा न भवन्तीति तस्मात् सिद्धान्तेषु तन्त्रेषु करणेषु पूर्वाचार्यैः स्पष्टीकरणं पृथक् पृथगुक्तम् । तत्रापि सोमसिद्धान्तोक्तस्पष्टीकरणं बहुसम्मतम् । सूर्यसिद्धान्तोक्ता मध्यग्रहाः सर्वसम्मताः । तस्मात् खण्डखाद्यकरणे सूर्यसिद्धान्तोक्त-गोलबीजकृतमध्यमाः सोमसिद्धान्तोक्तस्पष्टीकरणेन स्पष्टीकृताः ।

अत्रास्माभिरपि सोमसिद्धान्तोक्तस्पष्टीकरणप्रकारः श्लोकैर्द्वादशभिः कथ्यते । तद्यथा—(व्याख्यानकारमूलानि) :—

भौमादिमन्दतुङ्गांशा नागार्का नखवस्रकाः ।
खात्यष्टिखाष्टखाब्ध्यश्विनः केन्द्रे तुङ्गोनिते ग्रहे ॥ १ ॥

मन्दच्छेदास्त्रिषड्दस्राः श्रुतीशाश्चन्द्रसायकाः ।
गजार्का रविचन्द्राश्च त्रिषड्दस्राः शराचलाः ॥ २ ॥

मन्दे दोर्ज्या दशाभ्यस्ता स्वच्छेदाप्ता कलाः फलम् ।
स्वर्णे केन्द्रे तुलाजाद्ये तेनार्केन्दू स्फुटौ तयोः ॥ ३ ॥

दोर्ज्यान्तरगुणा भुक्तिस्तत्त्वदस्रोद्धृता पुनः ।
दिग्घ्ना छेदहृता लिप्ताः केन्द्रे र्क्षकिमृगादिके ॥ ४ ॥

स्वर्णास्ताभिर्गतिः स्पष्टा गतिर्मन्दा कुजादिषु ।
पञ्चाग्निदशलिप्तोना द्वीषवोऽष्टशरा ग्रहाः ॥ ५ ॥

भौमभार्गवसौरीणां गुणाः शैघ्र्यबुधेज्ययोः।
तिथिरामकलायुक्ता गुणकौ भूगुणा नृपाः ॥ ६ ॥

शीघ्राच्छोच्ये ग्रहे केन्द्रे स्वस्वजीवां च कोटिजाम्।
गुणाभ्यस्तां भजेत् खेभैर्बाहुकोट्योः फले स्वके ॥ ७ ॥

कोटिलब्धोनयुक् त्रिज्या केन्द्रे कर्किमृगादिके।
तद्वर्गादथ दोर्लब्धवर्गयुक्तात् पदं श्रुतिः ॥ ८ ॥

त्रिज्या बाहुफलाभ्यस्ता स्वकर्णाप्ता फलज्यका।
तद्धनुः स्वफलं शैघ्र्यं फलाद्यं भूसुतादिषु ॥ ९ ॥

स्वर्णं तेन ग्रहाः स्पष्टाः केन्द्रे मेषतुलादिके।
आदौ शीघ्रबलं मध्ये मान्दमर्धं ततः परम् ॥ १० ॥

मान्दं सर्वं ग्रहे मध्ये शैघ्र्यं चेति स्फुटा ग्रहाः।
त्रिज्यान्त्यकर्णविश्लेषाद् गत्योर्विश्लेषसङ्गुणात् ॥ ११ ॥

शीघ्रकर्णोद्धृतं लिप्ताः कर्णे त्रिज्याधिकोनके।
स्वर्णास्ताभिर्गतिः स्पष्टा वक्रभुक्तिर्महद्वृणे ॥ १२ ॥

पुनः पाठान्तरम्—वक्रभुक्तिर्महद्धृणे।

अस्मत्कृतबीजार्कोदयकालिकमध्यग्रहाणामिदानीं स्पष्टीकरणमस्माभिरेव कथ्यते।

तत्र भौमादीनां मन्दोच्चांशाः। भौमस्य सप्तविंशत्यधिकं शतम्। १२७। बुधस्य विंशत्यधिकं शतद्वयम्। २२०। गुरोः सप्तत्यधिकं शतम्। १७०। शुक्रस्याशीतिः। ८०। सौरेश्चत्वारिंशदधिकं शतद्वयम्। २४०॥

स्वशीघ्रान्मध्यग्रहं त्यक्त्वा तच्छेषशीघ्रकेन्द्रे दोःकोटिजीवयोः स्वगुणांशा लिप्ताश्च। भौमस्य शीघ्रगुणक एकपञ्चाशदंशाः पञ्चपञ्चाशल्लिप्ताश्च। ५१। ५५। बुधस्यैकत्रिंशत् पञ्चदशकलाश्च। ३१। १५। गुरोः षोडशांशा लिप्तात्रयम्। १६। ३। शुक्रस्य सप्तपञ्चाशदंशाः सप्तपञ्चाशल्लिप्ताश्च। ५७। ५७। शनेरष्टौ भागाः पञ्चाशल्लिप्ताश्च। ८। ५०।

पूर्वोक्तप्रकारेण शीघ्रकेन्द्रभुजज्यां कोटिज्यां च क्रमात् स्वगुणकेन सङ्गुण्याशीत्या। ८०। विभजेत्। लब्धं क्रमाद्दोःकोटयोः स्वफलं स्यात्।

तत् कोटिफलं केन्द्रे मकरादिषट्के त्रिज्यायां योज्यम् । कर्क्यादिषट्के त्रिज्यातः शोध्यम् । ततस्तद्वर्गाद् बाहुफलवर्गसंयुक्तान्मूलं शीघ्रकर्णः स्यात् । ततो दोःफलं त्रिज्यया सङ्गुण्य शीघ्रकर्णेन विभजेत् । लब्धं जीवा कलादिकं स्यात् । तद्धनुः कुर्यात् । तद्धनुर्लिप्तादिकं शीघ्रफलं स्यात् । तत् केन्द्रे मेषादिषट्के ग्रहे धनम् । तुलादिषट्के ग्रह ऋणम् ।

तच्छीघ्रफलार्धं मध्यग्रहे संस्कृत्यानष्टं कृत्वा तस्माद् ग्रहान्मन्दोच्चं त्यक्त्वा तच्छेषं मन्दकेन्द्रं भौमादीनाम् । तथार्काच्चन्द्राच्च स्वमन्दोच्चं त्यक्त्वा तच्छेषं तयोः स्वमन्दकेन्द्रं स्यात् ।

स्वमन्दकेन्द्रे अर्कादीनां मन्दच्छेदाः । तथार्कस्य त्रिषष्टयधिकं शतद्वयम् । २६३ । चन्द्रस्य चतुर्दशाधिकं शतम् । ११४ । भौमस्यैकपञ्चाशत् । ५१ । बुधस्याष्टाविंशत्यधिकं शतम् । १२८ । गुरोर्द्वादशाधिकं शतम् । ११२ । शुक्रस्य त्रिषष्टयधिकशतद्वयम् । २६३ । शनैश्चरस्य पञ्चसप्ततिः । ७५ ।

पूर्वोक्तप्रकारेण स्वमन्दकेन्द्रदोर्ज्यां दशगुणितां स्वमन्दच्छेदेन विभजेत् । लब्धं लिप्तादिकं स्वमन्दफलं स्यात् । तत् केन्द्रे तुलादिषट्के धनम् । मेषादिषट्के ऋणम् । तत् स्वफलसंस्कृतौ रविचन्द्रौ स्फुटौ भवतः । भौमादेः स्वमन्दफलार्धं संस्कृतग्रहेषु संस्कार्यम् ।

ततस्तस्मादेव ग्रहात् स्वमन्दोच्चं त्यक्त्वा स्वमन्दकेन्द्रफलं प्राग्वदानीय तत् स्वमन्दफलं सकलं मध्यग्रहे संस्कुर्यात् । अयौ मन्दस्फुटग्रहो भवति ।

ततः सूर्यादीनां स्वमन्दकेन्द्रदोर्ज्यान्तरेणाप्तभुक्तिम् । चन्द्रकेन्द्र इत्थम् । भौमादीनां स्वस्वभुक्तीः सङ्गुण्य तत्तदस्रैर्विभजेत् । लब्धं स्वस्वभुक्तिजीवा स्यात् । तां पुनर्दशभिः सङ्गुण्य स्वमन्दच्छेदैर्विभजेत् । लब्धं लिप्तादिकं स्वभुक्तेः फलं स्यात् । तत् केन्द्रे कर्क्यादिषट्केऽर्के भुक्तौ धनम् । मकरादिषट्क ऋणम् । तत्फलसंस्कृते रविचन्द्रयोर्भुक्ती स्फुटे भवतः । स्वमन्दफलसंस्कृता भौमादीनां भुक्तयः स्वमन्दग्रहाणां भुक्तयो भवन्ति ।

स्वशीघ्रोच्चात् स्वमन्दग्रहं त्यक्त्वा तच्छेषं चतुर्थशीघ्रकेन्द्रं स्यात् । तच्छीघ्रकेन्द्रे प्राग्वद् दोःकोटिजीवे आनीय ततः शीघ्रफलमानयेत् । तच्छीघ्रफलेन सकलेन संस्कृतो मन्दस्फुटग्रहो भौमादिकः स्फुटो भवति ।

मन्दभुक्तिं स्वशीघ्रभुक्तेः संशोध्य तच्छेषं स्वशीघ्रकेन्द्रभुक्तिः स्यात् । तां स्वशीघ्रकर्णत्रिज्ययोर्विवरेण सङ्गुण्य स्वशीघ्रकर्णेन विभजेत् । लब्धं

लिप्तादिकं स्वभुक्तेः शीघ्रफलं स्यात् । तत् फलं त्रिज्याधिके शीघ्रकर्णे भुक्तौ धनम् । त्रिज्यातोऽल्पे शीघ्रकर्णे ऋणम् । तच्छीघ्रफलसंस्कृता मन्दस्फुटभुक्तिः स्फुटभुक्तिः स्यात् ।

ऋणशीघ्रफलं मन्दभुक्तेर्यदाधिकं तदा मन्दभुक्तिं शीघ्रफलतः शोधयेत् । तच्छेषकलादिकं वक्रभुक्तिः स्यात् ।

ग्रहवदेव भुक्तिरपि स्वशीघ्रफलार्धेन ततो मन्दफलार्धेन संस्कृता तत-स्तृतीयस्य सकलमन्दफलेन संस्कृता मन्दभुक्तिः । सा मन्दस्फुटभुक्तिः स्यात् । चतुर्थशीघ्रसकलफलसंस्कृता सा मन्दस्फुटभुक्तिः स्फुटभुक्तिः स्यात् ।

इति व्याख्यानसहिताः श्लोका द्वादशास्मत्प्रणीताः । अनेन प्रकारेण स्फुटीकृताः सूर्यादयः सोमसिद्धान्तोक्ततुल्या भवन्ति । खण्डखाद्यकेऽपि कृतबीज-स्फुटग्रहाः सोमसिद्धान्ततुल्या भवन्ति ॥ १७-१९ ॥

[ग्रहवक्रम्]

१६३ १४५ १२५
गुणनृपतिभिर्वाणाब्ध्येकैः[1] शराक्षिनिशाकरैः[2]
१६५ ११३
शशरसकुभिर्विश्वद्दस्राभिर्लवैश्चलकेन्द्रजैः ।
भवति नियतं वक्रारम्भः[3] कुजादिनभःसदां
पुनरपि भवेद्वक्रत्यागश्च्युतैस्तु भमण्डलात् ॥ २० ॥

अन्त्यशीघ्रकेन्द्रांशा यदा त्रिषष्ट्यधिकशतं । १६३ । तदा भौमस्य वक्रारम्भः । यदा सप्तनवत्यधिकशतं । १९७ । तदा वक्रत्यागः स्यात् । तथा बुधस्य यदा पञ्चचत्वारिंशदधिकशतम् । १४५ । तदा वक्रारम्भः । यदा पञ्च-दशाधिकशतद्वयम् । २१५ । तदा वक्रत्यागः स्यात् । तथा गुरोर्यदा पञ्चविंश-त्यधिकशतं । १२५ । तदा वक्रप्रारम्भः । यदा पञ्चत्रिंशदधिकशतद्वयं । २३५ । तदा वक्रत्यागः स्यात् । तथा शुक्रस्य यदा पञ्चषट्यधिकं शतं । १६५ । तदा वक्रप्रारम्भः । यदा पञ्चनवत्यधिकं शतम् । १९५ । तदा वक्रत्यागः ।

मूलम्— 1. B. Be. Bo_1. Bo_2. Bod. D व्ध्यब्जैः

2. A_2. B. Be. Bo_1. Bo_2. BoD. D. S_2. V_1. V_2. V_3. शिलीमुख-भास्करैः

3. V_1. V_3. ०यथां

तथा सौरेर्यदा त्रयोदशाधिकं शतं । ११३ । तदा वक्रारम्भः । यदा सप्तचत्वारिंशदधिकं शतद्वयं । २४७ । तदा वक्रत्यागः स्यात् ।। २० ।।

६६ २१
रसरसाः क्रमशः शशिबाहवो
११२
यमनिशाकरशीतमरीचयः ।
५२ १३४
यमशरा युगपावकभूमयोऽ-
1 2
नृजुगतेर्दिवसाः कथिताः कुजात ॥ २१ ॥

वक्रप्रारम्भवक्रत्यागभागानामन्तरं स्वस्ववक्रभागाः स्युः । ते त्रिप्तीकृताः स्वमन्दशीघ्रोच्चभुक्त्यन्तरलिप्ताभिराप्ताः । लब्धं स्वस्ववक्रदिवसाः स्युः । इति भौमस्य वक्रदिनानि षट्षष्टिः । ६६ । बुधस्यैकविंशतिः । २१ । गुरोर्द्वादशाधिकं शतम् । ११२ । शुक्रस्य द्विपञ्चाशत् । ५२ । शनैश्चरस्य चतुस्त्रिंशदधिकं शतम् । १३४ । ॥ २१ ॥

२८ २०५
वसुयमैः शरपूर्णविलोचनै-
१४ १८३
र्मनुभिरग्निभुजङ्गनिशाकरैः ।
२०
खनयनैरुदयो[3] दिशि वज्रिणो
भवति यश्चलकेन्द्रभवैर्लवैः ॥ २२ ॥

अन्त्यशीघ्रकेन्द्रांशा यदाष्टाविंशतिः । २८ । तदा भौमः प्राच्यामुदेति । यदा द्वात्रिंशदधिकशतत्रयं । ३३२ । तदा प्रतीच्यामस्तमेति । तथा बुधो वक्रकाले यदा केन्द्रभागाः पञ्चाधिकं शतद्वयं । २०५ । तदा प्राच्यामुदेति । यदा पञ्चपञ्चाशदधिकशतं । १५५ । तदा प्रतीच्यामस्तमेति । तथा

मूलम्— 1. M_1. M_2. M_3 ऋजु
2. B. Bod. D गदिताः
3. M_1. M_2. M_3 ०दयाद्दिशि

बृहस्पतिर्यदा केन्द्रांशाश्चतुर्दश । १४ । तदा प्राच्यामुदेति । यदा षट्चत्वारिंशदधिकशतत्रयं । ३४६ । तदा प्रतीच्यामस्तमेति । तथा शुक्रो वक्रकाले यदा केन्द्रभागास्त्र्यशीत्यधिकं शतं । १८३ । तदा प्राच्यामुदेति । यदा सप्तसप्तत्यधिकं शतम् । १७७ । तदा प्रतीच्यामस्तमेति । तथा शनैश्चरो यदा केन्द्रांशा विंशति- । २० । स्तदा प्राच्यामुदेति । यदा चत्वारिंशदधिकशतत्रयं । ३४० । तदा प्रतीच्यामस्तमेति ॥ २२ ॥

३६०
गगनषट्कहुताशपरिच्युतैः
१
ककुभि पाशभृतोऽस्तमयो भवेत् ।
५१
शशिशरैस्त्रियमैर्बुधशुक्रयो-
र्जलपतेरुदयो दिशि जायते ॥ २३ ॥

३६०
निगदितैः पतितैश्च भमण्डलाद्-
दिशि सहस्रदृशोऽस्तमयो भवेत् ।
३२ ७१
यमगुणैर्दिवसैः शशिभूधरै-
र्भवति चाभ्युदयोऽस्तगयोस्तयोः ॥ २४ ॥

१२० २ १६ ३०
व्योमार्काः क्षितिपा नभोहुतभुजो नागास्तथा षड्गुणा
वारुण्यां क्रमशः स्युरस्तदिवसा भौमादिकानां दिनैः ।
६६० ३७ ३७२
आकाशाङ्गरसैस्तुरङ्गदहनैर्नासत्यशैलानलै-
२५१ ३४२ ३
रूपाब्ध्यब्धिभिरश्विसागरगुणैरस्तं प्रयान्त्युद्गताः ॥२५॥

मूलम्— 1. M_1. M_2. M_3. Om. ककुभिः ..... भमण्डलाद्, three line below.
2. Bod. D अभ्रार्काः
3. B. Be. Bo_1. Bo_5. Bod. D, ०सायकगुणैरस्तं

ऋजुगतिकालेऽर्कतो भुक्त्या भागादिभिश्चाधिकयोर्बुधशुक्रयोः । बुधस्य स्वान्त्यशीघ्रकेन्द्रांशा यदैकपञ्चाशत् । ५१ । तदा बुधः प्रतीच्यामुदेति । यदा नवाधिकशतत्रयं । ३०९ । तदा प्राच्यामस्तमेति । तथा शुक्रस्य स्वान्त्यकेन्द्रांशा यदा त्रयोविंशति- । २३ । स्तदा शुक्रः प्रतीच्यामुदेति । यदा सप्तत्रिंशदधिकशतत्रयं । ३३७ । तदा प्राच्यामस्तमेति ।

रवेर्भुक्त्याधिको भागादिभिरल्पो बुधः प्राच्चामस्तं गच्छतो द्वात्रिंशद् दिवसैः । ३२ । प्रतीच्यामुदेति । तथैव प्राच्यामस्तंगतः शुक्र एकसप्ततिर्दिवसैः । । ७१ । प्रतीच्यामुदेति ।

ततो वक्रकाले प्रतीच्यामस्तंगतो बुधः षोडशभिर्दिवसैः । १६ । प्राच्यामुदेति । ततो वक्रकाले प्रतीच्यामस्तंगतः शुक्रोऽष्टभिर्दिनैः प्राच्यामुदेति ।

वक्रकाले भौमगुरुसौरीणामस्तमयोदयौ न स्तः । कथमित्युक्ते । रवेर्भुक्त्यल्पत्वादेतेषां सदा प्रतीच्यामेवास्तमयः, प्राच्यामेवोदयः स्यात् ।

इत्थं प्रतीच्यामस्तंगतो भौमो विंशत्यधिकशतदिवसैः । १२० । प्राच्यामुदेति । उदयात् परतः षष्ट्यधिकषट्शतदिवसैः । ६६० । पुनः प्रतीच्यामस्तमेति ।

तथा बुधस्य कथमित्युक्ते । वक्रकाले प्रतीच्यामस्तंगतो बुधः षोडशभिः । १६ । दिवसैः प्राच्यामुदेति । उदयात् परतः सप्तत्रिंशद्दिवसैर्भूयः प्राच्यामेवर्जुगतिकालेऽस्तमेति । ततोऽस्तमयात् परतो द्वात्रिंशद्दिवसैः । ३२ । प्रतीच्यामुदेति । उदयात् परतः सप्तत्रिंशद्दिवसैर्भूयः प्राच्यामेवास्तमेति ।

तथा बृहस्पतिर्भौम इव प्रतीच्यामस्तंगतस्त्रिंशद्दिवसैः । ३० । प्राच्यामुदेति । उदयात् परतो द्विसप्तत्यधिकशतत्रयदिवसैः । ३७२ । प्रतीच्यामेवास्तमेति ।

तथा शुक्रो वक्रकाले बुध इव प्रतीच्यामस्तंगतोऽष्टभिर्दिवसैः प्राच्यामुदेति । उदयात् परत एकपञ्चाशदधिकशतद्वयदिवसैः । २५१ । भूयः प्राच्यामेवर्जुगतिकालेऽस्तमेति । ततोऽस्तमयात् परत एकसप्ततिर्दिवसैः । ७१ । प्रतीच्यामुदेति । उदयात् परत एकपञ्चाशदधिकशतद्वयदिवसैः । २५१ । भूयः प्राच्यामेवास्तमेति ।

ततः शनैश्चरो भौम इव प्रतीच्यामेवास्तंगतः षट्त्रिंशद्दिवसैः । ३६ । प्राच्यामुदेति । उदयात् परतो द्विचत्वारिंशदधिकशतत्रयदिवसैः । ३४२ । प्रतीच्यामेवास्तमेति ॥ २३-२५ ॥

[ग्रहाणां उदयास्तमयदिनानि]

उदयास्तविलोमयानसीम्ना-
मधिकोनाः कलिका हृता दिनानि ।
मृदुसंस्कृतया ग्रहस्य गत्या
रहिताशूच्चजभुक्तिलिप्तिकाभिः ॥ २६ ॥[1]

भौमस्याष्टाविंशतिः । २८ । उदयसीमा, द्वात्रिंशदधिकशतत्रयं । ३३२ । अस्तमयसीमा । ततः केन्द्रांशास्त्रिषष्टयधिकशतं । १६३ । वक्रारम्भसीमा, सप्तनवत्यधिकशतं । १९७ । वक्रत्यागसीमा इति । उदयास्तमयवक्रारम्भत्यागमर्यादांशान् ज्ञात्वाभीष्टदिने केन्द्रभागा यदा स्वोदयभागेभ्योऽधिकास्तदा तदधिकमात्रांशकलास्तृतीयमन्दस्फुटभुक्तिशीघ्रभुक्तिविश्लेषकलाभिर्भज्याः । लब्धं भौमस्योदितदिनानि इति । उदयभागेभ्यः केन्द्रभागा यदाल्पास्तदा तदन्तरं प्राग्वद् भुक्त्यन्तरलिप्तालब्धं दिनानि । तावद्भिर्दिनैः परतो भौम उदेष्यतीति ज्ञातव्यम् इति । एवमभीष्टदिने केन्द्रांशाः स्वास्तसीमाधिकाश्चेत् प्राग्वत् तदन्तरकलालब्धदिनानि भौमस्यास्तदिनानि । केन्द्रांशा यदाल्पास्तदन्तरकलाभिर्भुक्त्यन्तरकलाप्तदिनानि यावन्ति तावद्भिर्दिनैः परतो भौमोऽस्तमेष्यतीति ज्ञातव्यम् इति । एवमभीष्टदिने केन्द्रांशा वक्रसीमाधिकाश्चेत् प्राग्वद् भौमस्य वक्रदिनानि । तदा केन्द्रांशा यद्यल्पास्तल्लब्धदिनैः परतो भौमो वक्रो भविष्यतीति ज्ञातव्यम् इति । एवमभीष्टदिनेऽन्त्यशीघ्रकेन्द्रांशा वक्रत्यागसीमाल्पाश्चेत् तदन्तरकलालब्धदिनानि यावन्ति तावद्भिर्दिनैः परतो भौमस्य वक्रत्यागः स्यात् । केन्द्रांशा यद्यधिकास्तदन्तरकलाभुक्त्यन्तरकलाप्तदिनानि यावन्ति तावन्ति भौमस्य प्राग्गतिदिनानि ज्ञातव्यानि । इत्थमेव बुधगुरुशुक्रशनैश्चराणामन्त्यशीघ्रकेन्द्रेषु स्वोदयास्तमयवक्रवक्रत्यागसीमांशान् ज्ञात्वा तत्तत्समीपकालिकाः स्वेष्टदिनकेन्द्रभागानां स्वोदयाद्युक्तभागानामन्तरभागाः कलीकृता मन्दशीघ्रभुक्त्यन्तरकलाप्ता लब्धदिनानि । तैस्तैर्दिवसैर्भौमस्येव बुधगुरुशुक्रशनैश्चराणां स्वोदयाद्या ज्ञातव्याः ॥ २६ ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
कुजादिस्पष्टीकरणं नाम तृतीयोऽध्यायः ॥

मूलम्— 1. After 26, the chapter in A_1. A_2. B. Be. Bo_1. Bo_2. Bod. D. M_2. M_3. S_1. S_2. V_1. V_2. V_3 ends.

अथ त्रिप्रश्नाधिकारो नाम

चतुर्थोऽध्यायः

[द्वादशाङ्गुलशङ्कोश्छायातो दिग्ज्ञानम्]

अथ त्रिप्रश्नाध्यायो व्याख्यायते ।

वृत्ते समक्षितितलेऽन्तरसंस्थितस्य
तुल्याग्रमूलपरिधेः प्रगुणस्य शङ्कोः ।
भा द्वादशाङ्गुलमितेः प्रविशत्यपैति
यत्र क्रमाद् वरुणशक्रदिशौ मते ते ॥ १ ॥[1]

छायात्रयाग्रभ्रुषयोर्मुखपुच्छरज्ज्वो-
र्योगो यमस्य दिगुदग् द्यूदलप्रभाग्रे ।
यत्र ध्रुवो धनपतेर्दिगमौ भवेद्वा
तन्मत्स्यपुच्छमुखरज्जुरसिद्धसिद्धौ । २ ॥

यो मत्स्यपुच्छमुखनिर्गतरज्जुयोग-
स्तस्मात् प्रभात्रितयचिह्नशिरोऽवगाहि ।
वृत्तं लिखेन्न विजहाति हि तस्य रेखां
छाया कुलस्थितिमिवामलवंशजा स्त्री ॥ ३ ॥

सलिलसमीकृतभूमौ मध्ये विन्दुं दत्वा प्रातश्चतुःपञ्चघटिकासमये-ऽवसरे तन्मध्यविन्दुं मध्ये कृत्वा चतुर्विंशत्यङ्गुलप्रमाणसूत्रेण वृत्तं विलिखेत् । तन्मध्ये द्वादशाङ्गुलशङ्कुं वर्तुलमाद्यन्तस्थूलमृजुं संस्थापयेत् । तच्छङ्को-

मूलम्— 1. Bod. D. V_3 भवेताम् for मते ते ।

च्छायाग्रं वृत्ते यत्र प्रविष्टं तत्र बिन्दुं दद्यात्। तत्र प्रत्यग्बिन्दुः स्यात्। ततोऽपराह्णे छायाग्रं वृत्ते यत्र निर्गतं तत्र बिन्दुं दद्यात्। तत्र प्राग्-बिन्दुः स्यात्।

ततो वृत्तमध्ये तद्दिवसमध्याह्नच्छायाग्रे बिन्दुं दद्यात्। तन्मध्यबिन्दुः स्यात्। ततस्तत्पूर्वापरबिन्द्वोरन्तरालसूत्रं यावन्त्यङ्गुलानि तदर्धप्रमाणसूत्रेण प्राग्बिन्दुं मध्यं कृत्वा वृत्तमेकं विलिखेत। ततो मध्यबिन्दुं मध्यं कृत्वा वृत्तमेकं विलिखेत्। ततः पश्चिमबिन्दुं मध्यं कृत्वा वृत्तमेकं विलिखेत्। इत्थं वृत्तत्रयं विलिखेत्। तत्र मत्स्यद्वयमुत्पद्यते। तत् प्रत्यङ्मत्स्यमध्ये मुखपुच्छसक्तमेकं सूत्रमर्वाक् प्रसारयेत्। तथा प्राङ्मत्स्यमध्येऽपि मुखपुच्छसक्त-मपरं सूत्रमर्वाक् प्रसारयेत्। तयोर्द्वयोः सूत्रयोरपाकृष्यमाणयोः स्वगत्या दक्षिणदिशि यत्र योगः स्यात् तत्र बिन्दुं दद्यात्। वृत्तमध्ये स्थापितशङ्को-स्तात्कालिकी छाया याम्यकोणाभिमुखी चेत् सौम्यगेऽर्के तद्दक्षिणबिन्दुः स्यात्। तन्मध्याह्नच्छायाग्रबिन्दुर्ध्रुवस्थितदिश्युदग्बिन्दुः स्यात्। ततस्तत्-पूर्वापरबिन्द्वोः साक्षान्मध्यरेखा कर्तव्या। ततो दक्षिणोत्तरबिन्द्वोः साक्षान्मध्ये-ऽन्या रेखा कर्त्तव्या। सा दक्षिणोत्तरा स्यात्, इत्युत्तरगोले मेषादिषट्केऽर्के दिशो ज्ञातव्याः।

ततो दक्षिणगोलगे तुलादिषट्केऽर्के प्राग्वदेव वृत्तत्रयं विलिख्य मत्स्यद्वयमुत्पाद्य तन्मत्स्यद्वयमुखपुच्छसक्तमध्यसूत्रद्वयमुदक् प्रसार्य तयोः स्वगत्यादियोगस्थाने बिन्दुं दद्यात्। तदुत्तरबिन्दुः स्यात्। ततस्तन्मध्याह्न-च्छायाग्रबिन्दुस्तदा दक्षिणबिन्दुः स्यात्। ततः प्राग्वदेव पूर्वापरबिन्द्वोर्मध्यगा रेखा पूर्वापरा स्यात्। ततो दक्षिणोत्तरबिन्द्वोर्मध्यगा रेखा दक्षिणोत्तरा स्यात्।

ततो दक्षिणगोले चोत्तरगोले च स्थिते रवौ पूर्वोक्तमत्स्यद्वयमुखपुच्छ-सक्तमध्यप्रसारितसूत्रयो स्वगत्या योगस्थानस्थितबिन्दु मध्यं कृत्वा तन्मध्या-ह्नच्छायाग्रबिन्दुस्पृक्परिमाणसूत्रेण वृत्तं विलिखेत्। तद्वृत्तरेखापि छाया-त्रयाग्रस्थितबिन्दुत्रयस्पृगेव स्यात्।

इत्थं सलिलसमीकृतभूमौ यावद्भिरङ्गुलैर्वृत्तं लिखितं सा पूर्वाह्ण-च्छाया। सैवापराह्णेऽपि। पूर्वाह्णे यावती छाया अपराह्णेऽपि तावत्येव, यदस्मात्तन्मध्यकालिकच्छायाग्रं प्रत्यग्बिन्दुपर्यन्तं लिखितबिन्दुत्रयाग्रवृत्तरेखां न त्यजति। वृत्ते प्रविष्टच्छायाग्रकालान्निर्गमकालपर्यन्तकालिकच्छायाग्रं प्रत्यग्बिन्द्वग्रप्राग्बिन्द्वग्रपर्यन्तं वृत्तरेखायामेव भ्रमतीत्यर्थः। अत्र दृष्टान्तमाह। अमलकुलवंशजा स्त्री यथा स्वाचारं न त्यजति तथा तच्छायापि वृत्तरेखां न त्यजति॥ १-३॥

[विषुवच्छाया]

भानौ गते क्रियतुलादिमहर्दले ये
छाये तयोर्युतिदलं विषुवत्प्रभा स्यात् ।
१४४
छायाकृतीनकृतियोगपदं तु कर्णः
१२
कर्णेनवर्गविवरस्य पदं प्रभा स्यात् ॥ ४ ॥

स्फुटार्कस्य मेषसङ्क्रान्तेर्मध्याह्नच्छाया तुलासङ्क्रान्तेर्मध्याह्नछाया च समभूमौ। सम्यक्साधितयोस्तयोर्योगार्धमङ्गुलादिकम् । यावत् स्वदेशे द्वादशाङ्गुलशङ्कुः कल्पनीयः तद् विषुवच्छायाङ्गुलादिका स्यात् ।

विषुवच्छायाङ्गुलवर्गद्वादशाङ्गुलशङ्कुवर्गैक्यान्मूलमङ्गुलादिकं विषुवत्कर्णः स्यात् । तथा स्वेष्टच्छायावर्गशङ्कुवर्गैक्यान्मूलमिष्टकर्णः स्यात् । इष्टकर्णवर्गाच्छङ्कुवर्गं त्यक्त्वा मूलं स्वेष्टप्रभा स्यात् ॥ ४ ॥

[स्वदेशाक्षो लम्बश्च]

१२
अक्षप्रभा-रविहते पलकर्णभक्ते
३४३८
त्रिज्ये फले पलगुणस्त्ववलम्बकश्च ।
६०
तत्कार्मुके गगनषट्कहृते तदंशा
1
याम्यः पलो रविवशाद्दिगपक्रमस्य ॥ ५ ॥

त्रिज्यां पृथक्पृथग् विषुवच्छायया द्वादशभिश्च सङ्गुण्य विषुवत्कर्णेन विभजेत्। लब्धं लिप्तादिकं क्रमादक्षज्या लम्बज्या च स्यात् । तयोः पृथक्पृथग् धनुः कलाद्यं षष्टचाप्तमंशादिकं क्रमात् स्वदेशाक्षांशा लम्बांशाश्च । तत्राक्षांशादीनां दिक् सदा दक्षिणैव । क्रान्त्यंशानां दिगुत्तरगोलेऽर्के तूत्तरा, दक्षिणगोलेऽर्के दक्षिणैव स्यात् ॥ ५ ॥

[सममण्डलशङ्कुः तद्धृतिश्च]

क्रान्तिज्यया विगुणितौ पृथगत्रकर्णौ
शङ्क्वङ्गुलैर्विषुवतः प्रभया च भक्तौ ।
अग्राप्तमाद्यमितरत् समवृत्तशङ्कु-
स्तद्वर्गयोगजपदं खलु तद्धृतिः स्यात् ॥ ६ ॥

मूलम्— 1. M_1. M_2. M_3. याम्ये फले

अक्षकर्णौ क्रान्तिज्यया सङ्गुण्य पृथग् द्वादशभिः । १२ । विषुवच्छायया विभजेत् । लब्धं लिप्तादिफलं स्यात् । तत्र द्वादशाप्तमर्काग्रा स्यात् । विषुवच्छायाप्तं सममण्डलशङ्कुः स्यात् । तयोर्वर्गयोगान्मूलं सममण्डलशङ्कोः श्रुतिः [? तद्धृतिः] स्यात् । एतेषां प्रयोजनं वक्ष्यमाणसूत्रेषु विज्ञेयम् ॥ ६ ॥

[चरखण्डाः]

सूर्यं क्रियोक्तमिथुनान्त्यलवं प्रकल्प्य
संसाधयेच्चरदलानि पृथक् क्रमेण ।
विश्लेषितान्यजवृषाह्वयवैणिकानां
तानि स्युरिष्टविषये चरखण्डकानि ॥ ७ ॥

मेषान्तेऽर्कस्य क्रान्तिज्याकलाः सार्धाष्टनवत्यधिकषट्शतानि । ६९८ । ३० । तथा वृषान्ते क्रान्तिज्याकला दशाधिकद्वादशशतानि द्वाविंशतिविकलाश्च १२१० । २२ ।[1] ततो मिथुनान्तेऽर्कस्य परमक्रान्तिकलाः सप्तनवत्यधिकत्रयोदशशतानि । १३९७ । क्रान्तिज्यावर्गान् पृथकपृथक् त्रिज्यावर्गाद् विशोध्य मूलानि क्रमात् स्वाहोरात्रार्धानि । तत्र मेषस्य द्युरात्यर्धं षट्षट्यधिकं त्रयस्त्रिंशच्छतानि । ३३६६ । वृषभस्याष्टादशाधिकद्वात्रिंशच्छतानि । ३२१८ । मिथुनस्य स्वद्युज्यैकचत्वारिंशदधिकैकत्रिंशच्छतानि । ३१४१ । ततो मेषादिराशिक्रान्तिज्याः स्वदेशविषुवच्छायया भ्यस्ता द्वादशाप्ताः क्रमक्षितिज्याः । तास्त्रिज्याभ्यस्ताः स्वाहोरात्रार्धाप्ताः क्रमान्मेषादीनां चरजीवाः स्युः । तद्धनूंषि स्वस्वचरदलप्राणा भवन्ति । तत्र मेषस्य स्वदेशाद्यचरखण्डकं स्यात् । ततो मेषवृषभधनुषोरन्तरं द्वितीयचरखण्डकं स्यात् । ततो वृषभमिथुनधनुषोरन्तरं तृतीयचरखण्डकं स्यात् । इत्थं स्वदेशमेषादिराशीनां त्रयाणां क्रमाच्चरदलप्राणाः साध्याः ॥ ७ ॥

[लङ्कोदयप्राणाः]

मेषस्य गोः पृथगतो मिथुनस्य मौर्व्या
ज्ञुएणो गृहत्रयभवो द्युगुणो विभक्तः ।
स्वद्युज्यया फलधनूंषि विशेषितानि
लङ्कोदयासव इति प्रवदन्ति सन्तः ॥ ८ ॥

व्याख्या—1. Should be । १२१० । ५ ।

१६७०
ते चासवो गगनभूधरषट्कचन्द्राः
१७९५ १९३५
पञ्चाङ्कसप्तशशिनोऽक्षगुणाङ्कचन्द्राः ।
व्यस्तास्तथा निजचरार्धविहीनयुक्ताः
षण्णां क्रमात् स्वविषये पुनरुत्क्रमाच्च ॥ ९ ॥

आद्यमेषराशिजीवैकोनत्रिंशत्यधिकसप्तदशशतानि । १७१९ । द्वितीयवृषभज्या अष्टसप्तत्यधिकैकोनत्रिंशच्छतानि । २९७८ । तृतीयमिथुनजीवा त्रिज्यैव, अष्टत्रिंशदधिकचतुस्त्रिंशच्छतानि । ३४३८ । एता ज्याः पृथक् पृथङ् मिथुनद्युज्ययाभ्यस्ताः स्वस्वमेषादिद्युज्ययाप्ताः स्वस्वफलज्याधनुर्लङ्कायां मेषोदयादिप्राणाः स्युः । ततो मेषवृषभधनुषोरन्तरं लङ्कायां वृषभोदयप्राणाः स्युः। ततो वृषभमिथुनधनुषोरन्तरं लङ्कायां मिथुनोदयप्राणाः स्युः।

इत्थंसाधिता लङ्कायां मेषोदयासवः सप्तत्यधिकषोडशासवः । १६७० । वृषभोदयासवः पञ्चनवत्यधिकसप्तदशशतानि । १७९५ । मिथुनोदयासवः पञ्चत्रिंशदधिकैकोनविंशतिशतानि । १९३५ ।

एतान् क्रमेण संस्थाप्य तदधः पुनरुत्क्रमेण संस्थापयेत् इति लङ्कायां मेषवृषमिथुनकर्कटसिंहकन्यानां स्वोदयाः स्युः । एता एवोत्क्रमेण तुलादिषट्कस्य स्वोदयाः स्युः ।

तथा लङ्कामेषाद्युदयासवः क्रमेणोत्क्रमेणापि संस्थाप्याः । तेषु स्वदेशसाधितमेषादिचरखण्डकानि क्रमेण शोध्यानि, पुनरुत्क्रमेण योज्यानि इति स्वदेशमेषवृषभमिथुनकर्कटसिंहकन्यानां स्वोदयाः स्युः । त एव पुनरुत्क्रमेण तुलादिषटकस्य स्वदेशोदयप्राणा भवन्ति ॥ ८-९ ॥

[तत्काललग्नम्]

उद्गच्छतः परिमितिर्भवनस्य या स्या-
दस्तंगते जलपतेर्दिशि सास्तराशेः[1] ।
कृत्वेष्टकालिकमिनं द्युगते विधेयं
काले विलग्नमथ भार्धयुतं रजन्याम् ॥ १० ॥

भचक्रस्य प्राच्यामुद्गच्छतो राशेर्यदा स्वेष्टकाले यावतिथांश उदेति

मूलम् — 1. Bod. D हस्तराशेः

तथा प्रतीच्यामस्तंगच्छतो राशेरपि तावतिथैव भागोऽस्तमेति । तस्मादुदय-कालिकरवेर्भागकलादि यद्गतं तदेवोदयलग्नं स्यात् । ततःपरं घटिकादशके त्रिंशत्यादौ वा स्वेष्टकाले लग्नमानेतव्यं चेत् तदिष्टघटिकाभिरर्कं तात्कालिकं कृत्वा पुनस्तदिष्टघटिकाकालिकलग्नमानयेत् ॥ १० ॥

[इष्टकाललग्नम्]

भोग्यान् सहस्रकिरणेन गृहस्य भागान्
३०
सन्ताडयेत् तदुदयेन हरेत् खरामैः ।
लब्धं त्यजेदसुसमूहमभीप्सितेभ्यो-
ऽसुभ्यः क्षिपेद् दिनकरेऽपि च राशिभुक्तम् ॥ ११ ॥

यावन्त एवमुदया निपतन्त्यसुभ्यो
राशीन् क्षिपेत् तदनु तावत एव सूर्ये ।
३०
शेषात् खरामगुणितादविशुद्धलब्धं
भागादिकं च भवतीष्टविलग्नमेवम् ॥ १२ ॥

तात्कालिकरवेरयनांशसंस्कृतस्य भोग्यभागादिकं तद्राश्युदयासुभिः सङ्गुण्य त्रिंशता विभजेत् । लब्धं रवेर्भोग्यासवः । तानभीष्टकालिकद्युगता-सुभ्यस्त्यक्त्वार्करराशि सम्पूर्य ततस्तद्द्युगतस्थितासुभ्यस्तदुपरितनराश्युदयां-स्त्यक्त्वा तान् राशीन् रवौ संयोज्य ततस्तच्छेषांस्त्रिंशता सङ्गुण्याऽशुद्धराशिना विभजेत् । लब्धं भागादिकं रविराशीनामधः संस्थाप्य तत्र चलांशान् व्यस्तं संस्कुर्यात् । ततस्तद्राश्यादिकमभीष्टलग्नं स्यात् ॥ ११-१२ ॥

[द्युगतकालः]

चक्रार्धयुक्तमिदमस्तविलग्नमाहु-
र्लग्नोदयेन गुणितास्तनुभुक्तभागाः ।
३०
खाग्न्युद्धृताः स्युरसवो रविभोग्यकाले
तन्मध्यगोदययुताः समयो विलग्नात् ॥ १३ ॥

स्वेष्टकालिकलग्नं राशिषट्कयुतं चेत् तात्कालिकास्तलग्नं स्यात् ।

लग्नात् कालज्ञानार्थं लग्नस्यायनांशसंस्कृतस्य भुक्तभागादिकं

लग्नोदयासुभिः सङ्गुण्य त्रिंशता विभजेत् । लब्धं लग्नभुक्तासवो भवन्ति । ततः प्राग्वदर्कस्यायनांशसंस्कृतस्य भोग्यासवः साध्याः । ततो रविलग्नयोर्मध्यगतासव इति, लग्नभुक्तासवो रविभोग्यासुभिर्मध्योदयासुभिश्च संयुक्ताः षड्भिराप्ता विघटिका भवन्ति इति, घटिकादिकमिष्टलग्नकालिकं द्युगतं स्यात् ॥ १३ ॥

भानोरभुक्तसमयाल्पतरेष्टकालात्
त्रिंशद्गुणात् तदुदयाप्तलवान्वितोऽर्कः ।
लग्नं तदर्कविवरांशहृतोदयात् स्वात्
त्रिंशोद्धृतात् समय एकगृहेऽर्कतन्वोः ॥ १४ ॥

रवेर्भोग्यासुभ्योऽल्पाः स्वेष्टकालासवश्चेत् तानेवासून् त्रिंशता सङ्गुण्य रविराश्युदयासुभिर्विभजेत् । लब्धं भागादिकं रवौ योज्यम् । तदेव तत्कालिकलग्नं स्यात् ।

यदा रविर्लग्नं चैकराशिस्तदा तल्लग्नार्कयोरन्तरं भागादिकं रविराश्युदयासुभिः सङ्गुण्य त्रिंशता विभजेत् । लब्धं तल्लग्नकालासवः । ते प्राग्वद् घटिकाः कार्याः । तल्लग्नकालद्युगतं स्यात् ॥ १४ ॥

[नतिः]

क्रान्तिलम्बधनुषोरुदग्रवौ
संयुति,र्विंयुतिरन्यगोलके ।
उन्नतिस्त्रिभविशेषिता नतिस्
तिग्मभासि नभसोऽन्तरागते ॥ १५ ॥

क्रान्तिचापपलयोः समागमो
याम्यगोलयुजि तिग्मदीधितौ ।
सौम्यभाजि विवरं भवेन्नतिः
सोन्नतिस्त्रिभविशेषिताथ वा ॥ १६ ॥

विन्ध्यस्योत्तरभागे स्वाक्षभा सल्यंशपञ्चाङ्गुलाधिका । ५ । २० । यस्मिन् देशे रवेरुत्तरक्रान्तिस्तस्या भागानां लम्बधनुर्भागानामैक्यं स्वदेशखमध्याद् दक्षिणपार्श्वे मध्यादुन्नता भवन्ति । ते मध्याह्नकाले रवेरुन्नतांशाः स्युः ।

विन्ध्यस्य दक्षिणभागे मध्ये च स्वदेशेषु तथार्कस्योत्तरक्रान्तिलम्बांशयोग उन्नतभागाः स्युः । ते नवतेरल्पाश्चेद् दक्षिणपार्श्वे मध्यादुन्नता भवन्ति । परमोत्तरक्रान्तिलम्बांशैक्यं नवतेरधिकं स्यात् तदा तस्मान्नवतिः शोध्या । तच्छेषांशास्तद्देशे खमध्यादुत्तरपार्श्वे मध्याह्नकाले रवेर्नतभागाः स्युः । तच्छुद्धनवतिस्तदा रवेरुन्नतांशाः स्युः ।

दक्षिणगोलेऽर्कक्रान्तिभागाः स्वदेशलम्बांशकेषु शोध्याः । तच्छेषा विन्ध्यस्योभयपार्श्वयोर्विन्ध्येऽपि सर्वेषु देशेषु खमध्याद् दक्षिणभागे मध्याह्नकाले रवेरुन्नतभागा भवन्ति । ते पृथङ् नवतेः शोध्याः । तच्छेषांशा रवेस्तदा नतभागा भवन्ति ।

अथवा रवेर्दक्षिणक्रान्तिभागस्वदेशाक्षांशानामैक्यं सर्वेषु देशेषु खमध्याद् दक्षिणपार्श्वे मध्याह्नकाले रवेर्नतभागा भवन्ति । तथैव रवेरुत्तरक्रान्तिभागानां स्वाक्षांशानामन्तरांशा रवेर्नतांशाः स्युः । ते स्वाक्षांशेभ्यो रवेरुत्तरक्रान्त्यंशा यदाल्पास्तदा दक्षिणनतांशाः स्युः । यदा स्वाक्षांशेभ्यो रवेरुत्तरक्रान्तिभागा अधिका भवन्ति तदा तदन्तरांशाः खमध्यादुत्तरपार्श्वे मध्याह्नकाले रवेर्नतभागा भवन्ति इति, तेन नतभागाः पृथङ् नवतेः शोध्याः । तच्छेषास्तदा रवेरुन्नतभागा भवन्ति ॥ १६ ॥

[मध्याह्नच्छाया मध्याह्नकर्णश्च]

१२
भानुभिर्विनतभागशिञ्जिनी
३४३८
सङ्गुणाथ भवनत्रयस्य च ।
उन्नताख्यलवजीवया भजेद्
भाश्रुती गगनमध्यगे रवौ ॥ १७ ॥

उत्तरेतरभषट्कगे रवौ
कुज्यया दिनगुणो युतोनितः ।[1]
त्रिज्यका च चरखण्डजीवया
तत् क्रमाद् दिनदलान्त्यकान्त्यके[2] ॥ १८ ॥

छेदहारकसमाह्वये च ते
हारकोऽथ गुणितो द्युजीवया ।
छेदकोऽथ भवति त्रिभज्यया
भाजितोऽयमथवान्यथा हृतिः ॥ १९ ॥

रवेर्नतांशजीवा भुजज्या । सा दृग्ज्या स्यात् । उन्नतांशजीवा कोटिजीवा । सा शङ्कुः स्यात् । सा भुजज्या त्रिज्या च पृथक् पृथग् द्वादश । १२ । गुणिता कोटिज्यया भाज्या । लब्धमङ्गुलादिका । रवेर्मध्याह्नच्छाया क्रमान्मध्याह्नकर्णः स्यात् ।

उत्तरेतरभषट्कगे रवौ कुज्ययेति । इष्टदिनक्रान्तिज्यावर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं द्युज्या स्यात् । ततः क्रान्तिज्या विषुवच्छाययाभ्यस्ता द्वादशाप्ता लब्धं क्षितिज्या स्यात् । क्षितिज्या त्रिज्ययाभ्यस्ता द्युज्याप्ता लब्धं चरजीवा स्यात् । मेषतुलादिगेऽर्के द्युज्या क्रमात् क्षितिज्यया युक्तोनितान्त्या स्यात् । तथैव त्रिज्याप्युत्तरदक्षिणगोलयोश्चरदलजीवया युतोनितान्त्यका स्यात् । इत्थं प्रतिदिनं मध्याह्नकालेऽन्त्या चान्त्यका च क्रमाच्छेदहारकसंज्ञौ भवतः ।

असौ **हारको** द्युज्ययाभ्यस्तस्त्रिज्ययाप्तश्छेदः । छेदो वा त्रिज्याभ्यस्तो द्युज्याप्तो हारकः स्यात् ।

छेदो नामान्त्या । सा प्रतिदिनं दक्षिणगोलगेऽर्के [निरक्षदेशे] मध्याह्नकालिकरवेः स्वदेशदक्षिणक्षितिजस्य चान्तरालज्यासूत्रं स्यात् । तत उत्तरगोलगेऽर्के सान्त्या प्रतिदिनं निरक्षदेशे मध्याह्नकालिकरवेरुत्तरक्षितिजस्य चान्तरालसूत्रं स्यात् ।

मूलम्— 1. M_1. M_2. M_3. युतो नतिः

2. M_1. M_2. M_2. दिनदलान्त्यकां त्यजेत्

तथा हारको नामान्त्यका। सा मध्याह्नसूर्य-पूर्वापरक्षितिजयोरन्तरालज्यासूत्रं स्यात्। दक्षिणोत्तरगोलयोरपि। तस्मादन्त्यकाया धनुःप्राणाः षड्भिराप्ता विनाडिकाः। ताः षष्ट्याप्ता घटिकाः स्युः इति प्रतिदिनं घटिकादि मध्याह्नप्रमाणम् ॥ १८-१९ ॥

[मध्याह्नशङ्कुः]

१२
लम्बकार्कसमशङ्क्वपक्रमैश्
छेदकः पृथगथाहतो हृतः।
व्यासखण्डपलकर्णतद्धृती-
नाग्रकाभिरिह सन्ति शङ्कवः ॥ २० ॥

अक्षज्या भुजः। लम्बज्या कोटिः। त्रिज्या कर्णः स्यात्। तथा विषुवच्छाया भुजः। द्वादशाङ्गुलशङ्कुः कोटिः। विषुवत्कर्ण एव कर्णः। तद्वदर्काग्रा भुजः। सममण्डलशङ्कः कोटिः। तद्धृतिः कर्णः। क्षितिज्या भुजः। क्रान्तिज्या कोटिः। अर्काग्रा कर्णः।

स्वस्वभुजकोटिवर्गयोर्योगान्मूलं स्वस्वकर्णः स्यात्। तस्माच्छङ्क्वानयनार्थं पूर्वोक्तच्छेदो लम्बज्याभ्यस्तस्त्रिज्याप्तो मध्याह्नशङ्कुः स्यात्। अथवासौ छेदो द्वादशाभ्यस्तोऽक्षकर्णाप्तः [मध्याह्न] शङ्कुः स्यात्। अथवा स एव च्छेदः सममण्डलशङ्कुनाभ्यस्तस्तद्धृत्याप्तः [मध्याह्न] शङ्कुः स्यात्। अथवा स एव च्छेदः क्रान्तिज्याभ्यस्तोऽर्काग्राप्तः स्वेष्टदिनमध्याह्नशङ्कुः स्यात्।

इत्थं चत्वारः प्रकाराः प्रदर्शिताः। ततोऽभीष्टप्रकारेणभीष्टच्छेदोऽभीष्टशङ्कुः स्यात् ॥ २० ॥

[मध्याह्नच्छाया कर्णश्च—प्रकारान्तम्]

शङ्कुचापरहितत्रिभज्यका
१२
दृग्गुणः, स विहतोऽर्कसङ्गुणः।
शङ्कुनैव भवति प्रभाऽथवा
तिग्मरोचिषि खमध्यसंस्थिते ॥ २१ ॥

पूर्वोक्तमध्याह्नशङ्कुजीवां धनुः कृत्वा तद्धनुर्लिप्ता राशित्रयलिप्ताभ्यः । ५४०० । शोध्याः । तच्छेषकलानां क्रमजीवां कुर्यात् । सा दृग्ज्या स्यात् । तद् द्वादशभिः सङ्गुण्य पूर्वोक्तशङ्कुनैव विभजेत् । लब्धं मध्याह्नच्छायाङ्गुलादिकं स्यात् ॥ २१ ॥

१२ १
युग्मचन्द्रविहृतेन शङ्कुना
भाजिता त्रिभवनस्य शिञ्जिनी ।
लब्धमङ्गुलमयं दिनार्धगे
२
कर्णमाहुरथ तिग्मदीधितौ ॥ २२ ॥

शङ्कुजीवा द्वादशभिर्हृत्वा तत्फलेन त्रिज्या भाज्या । लब्धं मध्याह्नकर्णोऽङ्गुलादिकं स्यात् इति साधितशङ्कुभिर्वा पूर्वोक्तप्रकारेण वा मध्याह्नच्छायाकर्णौ साध्यौ ॥ २२ ॥

[नतकालः]

प्राक्कपालमथ पूर्वमम्बरं
पश्चिमं च तदुशन्ति पश्चिमम् ।
प्राचि यातमगतं तु पश्चिमे
कालमुन्नतमतोऽपरं नतम् ॥ २३ ॥

मध्यरात्रान्मध्याह्नं यावत् **पूर्वमम्बरम्** । तत् प्राक्कपालमुच्यते । मध्याह्नान्मध्यरात्रिपर्यन्तमपरमम्बरमपरकपालम् । उदयान्मध्याह्नपर्यन्तं गतघटिका भुक्तोन्नतमित्युच्यते । मध्याह्नादस्तमयपर्यन्तं दिवाशेषघटिका भोग्योन्नतमित्युच्यते । मध्याह्नद्युगतयोरन्तरघटिका नतमित्युच्यते । तदपि मध्याह्नाद् द्युगतमल्पं चेत् प्राङ्नतं, अधिकं चेदपरनतं स्यात् ॥ २३ ॥

मूलम्— 1. B. Be. Bo_1 Bod. D. V_3. निहता च; Bo_2. निहिता च

2. B. Be. Bo_1. Bo_2. Bod. D. रिह

[इष्टकालच्छाया]

उन्नताच्चरदलेन वर्जितात्
संयुतादुदगसौम्यगोलयोः ।
शिञ्जिनी द्युगुणसङ्गुणा हृता
त्रिज्यया कुगुणयुक्तवर्जिता[1] ॥ २४ ॥

छेद इष्टसमये भवेत् ततः
शङ्कुभाश्रवणसिद्धिरुक्तवत् ।
व्यासखण्डकृतिशङ्कुवर्गयो-
र्दृग्गुणो भवति चान्तरात् पदम् ॥ २५ ॥

इष्टकालोन्नतघटिकाः षष्टिघ्नाः, ता एव विनाडिकासहिताः, ततः षड्गुणाः स्वेष्टकालोन्नतासवो भवन्ति । तत्रोदग्गोलचरदलासवः शोध्याः । दक्षिणगोलचरदलासवो योज्याः । ततः क्रमजीवा कार्या । सा द्युज्यया भ्यस्ता त्रिज्ययाप्ता । लब्धमुत्तरगोले क्षितिज्यया योज्या । दक्षिणगोले क्षितिज्यायाः शोध्या । ततोऽसौ स्वेष्टोन्नतघटिकाकालिका ज्या स्यात् । सैव स्वेष्टकालिकच्छेदः स्यात् । असौ लम्बज्याभ्यस्तस्त्रिज्ययाप्तः । लब्धं स्वेष्टशङ्कुर्भवति इति ।

प्रागुक्तैश्चतुर्भिरपि प्रकारैरिष्टशङ्कुः स्यात् । ततः शङ्कुवर्गत्रिज्यावर्गविश्लेषान्मूलं स्वेष्टकालदृग्ज्या स्यात् । दृग्ज्या द्वादशाभ्यस्ता स्वेष्टशङ्कुभक्ता । लब्धमिष्टकालिकच्छाया स्यात् । त्रिज्या द्वादशाभ्यस्ता स्वेष्टशङ्कभक्ता । लब्धमिष्टकर्णः स्यात् ॥ २४-२५ ॥

उत्क्रमेण नतकालशिञ्जिनी
साधिता दिनगुणाहता हृता ।
त्रिज्यया फलवियुक्तखमध्यज-
श्छेद इष्टसमयेऽथवा भवेत् ॥ २६ ॥

मूलम्— 1. V_3. om. संयुता to वर्जिता.

इष्टकालोन्नतघटिका दिनार्धच्छोध्याः। तच्छेषं नतघटिका भवन्ति। ताः षष्टिघ्नाः, तद्विघटिकासहिताः, ततः षड्गुणाः, नतासवः स्युः। तदुत्क्रमज्या द्युज्याभ्यस्ता त्रिज्याप्ता, लब्धं मध्याह्नहृत्यां शोध्यम्। तच्छेषतात्कालिकच्छेदः। असौ स्वेष्टकालिकच्छेद इत्थमपि स्यात्। प्राग्वत् तं शङ्कुं कृत्वा छायाकर्णावानेतव्यौ ॥ २६ ॥

उत्तरे द्युगतशेषयोर्विना
दक्षिणे चरदलेन युक्तयोः।
ज्या चरार्धगुणयुक्तवर्जिता
हारकस्तदितरोऽथ उक्तवत् ॥ २७ ॥

प्राग्वदिष्टकालिकोन्नतासव उत्तरचरदलासुभिः शोध्याः। दक्षिणचरदलासुभिर्युक्ताः। ततस्तत्क्रमजीवा। सैवोदक्चरार्धज्यायुक्ता, दक्षिणचरार्धज्योना, स्वेष्टकालान्त्यका। सैव हारकः। पुनर्द्युज्ययाभ्यस्ता त्रिज्याप्ता छेदः स्यात् ॥ २७ ॥

ज्यां नतासुषु विधाय चोत्क्रमा-
च्छोधयेद् गगनमध्यहारकात्।
शेषमिष्टसमयोद्भवं जगु-
र्हारमुक्तविधिनान्यसाधनम् ॥ २८ ॥

अथवा प्राग्वदिष्टकाले नतासूनामुत्क्रमज्या मध्याह्नहारकाच्छोध्या। तच्छेषः स्वेष्टकालिकहारकः स्यात्। असौ द्युज्ययाभ्यस्तस्त्रिज्ययाप्तः छेदः स्यात्। स लम्बज्ययाभ्यस्तस्त्रिज्यया भक्तः शङ्कुः। तद्वर्गयोर्विशेषान्मूलं दृग्ज्या स्यात्। ततः स्वेष्टकालिकच्छायाकर्णावपि ॥ २८ ॥

अल्पीयांसो भवेयुः सवितृचरदलादिष्टकालासवश्चेत्
सौम्ये गोले तदानीं चरदलसमयात् पातयित्वेष्टकालम्[1]।
कार्या शेषस्य जीवा चरशकलगुणस्तद्विहीनोऽन्त्यका[2] स्यात्
त्रिज्याभक्ताथ सैव द्युगुणविगुणिता छेद इष्टः प्रदिष्टः ॥ २९ ॥

मूलम्— 1. Be. Bo_1. Bo_2 Bod. D पातयेदिष्टकालम्

2. A_2. B. Be. Bo_1. Bo_2. Bod. M_1. M_2. M_3. S_2. V_1. V_2. V_3. हृतिः for ऽन्त्यका

उत्तरगोलचरदलासुभ्यः स्वेष्टकालोन्नतासवो यदाल्पास्तदा उन्नतासवश्चरदलाच्छोध्याः। तच्छेषस्य क्रमजीवा चरार्धजीवायां शोध्या। तच्छेषो हारकः स्यात्। असौ द्युज्याभ्यस्तस्त्रिज्याप्तो लब्धं तदिष्टकालिकच्छेदः। असौ लम्बज्ययाभ्यस्तस्त्रिज्याप्तः शङ्कुः। तद्वर्गत्रिज्यावर्गान्तरान्मूलं दृग्ज्या। ततस्तात्कालिकच्छायाकर्णौ ॥ २९ ॥

दिनदलभवकर्णच्युएणगात्रौ विभक्तौ
द्युदलसमयजातौ छेदहारौ क्रमेण।
अभिमतसमयोत्थच्छेदकेनाथ हृत्वा[1]
श्रवणयुगलमेवं वा भवेदिष्टभायाः ॥ ३० ॥

इष्टदिनमध्याह्नच्छेदो मध्यकर्णेनाभ्यस्तः स्वेष्टकालिकच्छेदेन भक्तो लब्धमिष्टकर्णः स्यात्। तथा मध्याह्नहारको मध्याह्नकर्णेनाभ्यस्तः स्वेष्टकालिकहारेणाप्तो लब्धमिष्टकर्णः स्यात्। तत्कर्णवर्गशङ्कुवर्गविश्लेषान्मूलमिष्टच्छाया स्यात् ॥ ३० ॥

[छायातः कालानयनम्]

पलश्रवणताडिता त्रिभवनोत्थजीवाकृतिः
प्रभाश्रवणताडितद्युगणभाजितात् तत्फलात्।
चरासुगुणसंयुतादनुदगुत्तरे वर्जिताद्
धनुश्चरदलोनयुग्दिनगतावशेषासवः ॥ ३१ ॥

फलाच्चरज्या न विशुद्धिमेति
यदा तदास्यां फलमेव जह्यात्।
शेषस्य चापेन चरार्धमूनं
शेषं गतं वा दिवसस्य शेषम् ॥ ३२ ॥

त्रिज्यावर्गो विषुवत्कर्णेनाभ्यस्तस्तदिष्टच्छायाकर्णगुणितद्युज्यया भक्तः, फलं जीवा स्यात्। तस्यां दक्षिणचरज्या योज्या। उत्तरचरज्या शोध्या। ततस्तद्धनुरसुषु दक्षिणचरज्यासवः शोध्याः, उत्तरचरज्यासवो

मूलम्—1. Mss. छेदकेन हारकेण

योज्याः। तत् स्वेष्टच्छायाकालिकोन्नतासवो भवन्ति। तन्नाड्यो मध्याह्नात् प्राक् चेत् द्युगतं स्यात्। मध्याह्नात् परतश्चेद् दिनार्धाच्छोध्याः। तच्छेषस्तदा द्युगतघटिकाः स्यात् ॥

फलज्याया यदोत्तरचरज्याधिका तदा तद्विश्लेषज्याया धनुरसवः कार्याः। ते पुनरुत्तरचरार्धासुषु शोध्याः। तच्छेषासवः प्राग्वत् प्रातश्चेद् द्युगतं स्यात्, सायं चेद् दिनशेषासवो भवन्ति ॥३१-३२॥

दिनदलश्रवणेप्सितकर्णयो-
र्विवरसङ्गुणितामथवान्त्यकाम्।
अभिमतश्रवणेन भजेत् फलाद्
धनुरथोत्क्रमतो विनतासवः ॥ ३३ ॥

त्रिज्यायामुत्तरचरज्या योज्या। दक्षिणचरज्या शोध्या। सा अन्त्यका स्यात्। तां मध्याह्नकर्णस्वेष्टकर्णयोरन्तरेण सङ्गुण्य स्वेष्टकर्णेन विभजेत्। लब्धमुत्क्रमज्या स्यात्। तामुत्क्रमेण धनुः कुर्यात्। नतासवो भवन्ति। तन्नतघटिकाः पूर्वाह्णे दिनार्धाच्छोध्याः। अपराह्णे दिनार्धाद् योज्याः। द्युगतं स्यात्। इष्टं वा स्वेष्टच्छायातो द्युगतमानयेत् ॥ ३३ ॥

[कर्णशङ्कुः]

सूर्याग्राया इष्टसंयोजिताया
वर्गे त्रिज्यावर्गतो[२] लोचनघ्ने।
त्यक्ते मूलं यत् स शङ्कुर्विदिक्स्थ-[1]
स्तत्राक्षाभासङ्गुणे सूर्यभक्ते[१२] ॥ ३४ ॥

लब्धमिष्टमसुना सहिताग्रा
प्राग्वदेवमसकृन्नरसिद्धिः।
दक्षिणे सवितुरुत्तरगोले-
ऽग्रज्ययेष्टवियुताद् विधिरेषः ॥ ३५ ॥

मूलम्— 1. B. Be. Bo_1. Bo_2. Bod D. V_1. V_3. विदिक्षु
2. Bod. तत् स्वाक्षा०; D यत् स्वाक्षा०

अर्ककान्तिज्या विषुवत्कर्णाभ्यस्ता द्वादशाप्ता सूर्याग्रा स्यात्। तद्वर्गं द्विगुणीकृतं त्रिज्यावर्गाच्छोध्यम्। तन्मूलं विषुवच्छाययाभ्यस्तं द्वादशभिराप्तमाद्यमिष्टं स्यात्। तदिष्टं दक्षिणक्रान्तिश्चेदर्काग्रायां योज्यम्। उत्तरक्रान्तिश्चेदर्काग्रायां शोध्यम्। इष्टमर्काग्रातोऽधिकं चेत् तदन्तरम्। ततस्तद्वर्गं द्विगुणीकृत्य त्रिज्यावर्गाच्छोध्यम्। तन्मूलं कोणशङ्कुः स्यात्।

तमेव विषुवच्छायया सङ्गुण्य द्वादशभिर्विभजेत्। लब्धं द्वितीयमिष्टं भवति।

तद् द्वितीयाद्येष्टयोर्योगार्धमिष्टं परिकल्प्य प्राग्वदर्काग्रायां दक्षिणगोले योज्यम्। उत्तरगोले शोध्यम्। ततस्तद्वर्गं द्विगुणीकृत्य त्रिज्यावर्गात् त्यक्त्वा मूलं कोणशङ्कुः स्यात्। तं पृथग् विषुवच्छायया सङ्गुण्य द्वादशभिर्विभजेत्। लब्धमिष्टं स्यात्।

तदिष्टं प्राग्वदर्काग्राया संस्कृत्य तद्वर्गं द्विगुणीकृत्य त्रिज्यावर्गात् त्यक्त्वा मूलं कोणशङ्कुः स्यात्।

इत्थमसकृत्कर्मणा पुनः पुनः कोणशङ्कुरानीतः। सः पूर्वतुल्यश्चेत् कोणशङ्कुः स्पष्टो भवति।

अथवार्काग्रावर्गं त्रिज्यावर्गार्धात् त्यक्त्वा तच्छेषं शङ्कुवर्गेण। १४४। सङ्गुण्य विषुवच्छायावर्गसंयुक्तया द्विसप्तत्या विभजेत्। लब्धवर्गः करणीसंज्ञः स्यात्। तां करणीं पृथक् स्थापयेत्।

ततो विषुवच्छायाद्वादशाभ्यां पुनरर्काग्रया संगुण्य प्रोक्तद्व्यगयुतेन विषुवच्छायावर्गेण विभजेत्। लब्धं फलमक्षफलसंज्ञं स्यात्। पृथक् फलवर्गयुक्तात् करणीसंज्ञकान्मूलं दक्षिणगोलेऽक्षफलशुद्धमुत्तरगोलेऽक्षफलयुक्तं प्रतिदिनं स्फुटकोणशङ्कुः स्यात्।

इत्थं दक्षिणगोलगेऽर्के पूर्वाह्णे आग्नेयकोणशङ्कुः स्यात्। अपराह्णे नैर्ऋतकोणशङ्कुः स्यात्। उत्तरगोलेऽर्के विन्ध्यस्योत्तरभागे यत्र स्वाक्षांशाश्चतुर्विंशतेरधिकास्तत्राग्नेयनैर्ऋतकोणयोरेव शङ्कुः स्यात्। विन्ध्यस्य दक्षिणभागे मध्ये वा दक्षिणगोलगेऽर्के प्राग्वदाग्नेयनैर्ऋतकोणयोरेव शङ्कुः स्यात्। तत्रैवोत्तरगोलेऽर्के यदोत्तरक्रान्तिः स्वदेशाक्षांशेभ्योऽल्पा तदा ह्याग्नेयनैर्ऋतकोणयोरेव शङ्कुः स्यात्। यदोत्तरा क्रान्तिः स्वाक्षांशेभ्योऽधिका तदा प्राग्वत् पूर्वाह्णे ऐशान्यकोणशङ्कुः स्यात्। अपराह्णे वायव्यकोणशङ्कुः स्यात्॥ ३४-३५॥

[कोणशङ्कुच्छाया]

यदा भवेत् क्रान्तिरुदक् पलाल्पा
विशेत् तदानीं समवृत्तमर्कः ।
तदुत्थशङ्कोरथ[1] कोणजाद्वा
छाया च कर्णश्च यथेष्टशङ्कोः[2] ॥ ३६ ॥

विन्ध्यस्योत्तरभागे यस्मिन् देशे स्वाक्षांशाः चतुर्विंशत्यधिकास्तस्मिन् देशे रवेरुत्तरक्रान्तिज्या विषुवत्कर्णाभ्यस्ता विषुवच्छाययाप्ता, लब्धं सममण्डलशङ्कुः स्यात् । विन्ध्यस्य दक्षिणे मध्ये वा रवेरुत्तरक्रान्तिस्तद्देशाक्षांशेभ्यो यदाल्पा तदा क्रान्तिज्या विषुवत्कर्णगुणिता विषुवच्छायया आप्ता, लब्धं सममण्डलशङ्कुः स्यात् । तद्वर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं दृग्ज्या स्यात् । सा द्वादशाभ्यस्ता सममण्डलशङ्कुभक्ता, लब्धं सममण्डलच्छाया स्यात् । सा प्रतिदिनं पूर्वाह्णे यावती छाया तावत्येवापराह्णे सममण्डलच्छाया स्यात्, तदा सूर्यः सममण्डलरेखां प्रविशति । तस्मात् तात्कालिकच्छाया साक्षात् पूर्वापररेखायां स्यात् ।

त्रिज्या द्वादशाभ्यस्ता सममण्डलशङ्कुभक्ता, लब्ध सममण्डलकर्णः स्यात् । तथैव कोणशङ्कुवर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं दृग्ज्या स्यात् । सा दृग्ज्या त्रिज्या च द्वादशाभ्यस्ता कोणशङ्कुभक्ता क्रमात् स्वफलं प्रतिदिनं पूर्वापराह्णयोः कोणशङ्कुच्छायाकर्णः स्यात् । ततोऽभीष्टच्छायातो नतघटिकानयनं पूर्वोक्तम् । तत्रापि सममण्डलच्छायातः कोणशङ्कुच्छायातोऽपि प्रतिदिनमुन्नतघटिका आनेतव्याः ॥ ३६ ॥

[मध्याह्नच्छायातो रविस्फुटः]

मध्यस्थे नभसः सहस्रकिरणे शङ्कोर्भवेद् या प्रभा
कल्प्या सैव पलप्रभोक्तविधिना साध्यस्तथेष्टः पलः ।
तत्स्वस्थानपलान्तरं यदपमस्तत् स्याद्युतिर्दक्षिणे
छायाग्रेऽस्य गुणेन भत्रयगुणः त्रुण्णः परक्रान्तिहृत् ॥ ३७ ॥

मूलम्— 1. M_1. M_2. M_3. तदुक्त

2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_1. V_2. V_3 छयाथ

फलमिनभुजजीवा तद्भनुस्तिग्मरश्मिः
प्रथमचरण एवं वत्सरस्य प्रदिष्टः ।
हृतमथ भगणार्धाद्विद्धि भार्धेन युक्तं
भगणनिपतितं स्याच्चान्त्यपादेषु चापम् ॥ ३८ ॥

या मध्याह्नेऽर्कस्य द्वादशाङ्गुलशङ्कुच्छाया सैव प्रतिदिनं विषुवच्छायेति कल्पनीया । तां त्रिज्यया सङ्गुण्य मध्याह्नकर्णेन विभजेत् । लब्धं तस्मिन् दिनेऽक्षज्या स्यात् । तद्धनुर्भागास्तस्मिन् दिनेऽक्षांशाः स्युः । एतेषां स्वदेशाक्षांशानामन्तरांशा रविक्रान्तिभागा भवन्ति । तस्मिन् दिने मध्याह्नच्छायाग्रं शङ्कुमूलाद् दक्षिणे स्थितं चेत्तदानीं तद्दिवसाक्षांशानां स्वदेशाक्षांशानां च संयुतिरर्कक्रान्तिः स्यात् । तत्क्रान्तिभागानां जीवां कुर्यात् । तां त्रिज्यया सङ्गुण्य परमक्रान्तिज्यया विभजेत् । लब्धं रवेर्भुजजीवा स्यात् । ततस्तद्धनुर्लिप्तादिकं राश्यादिकं कुर्यात् । तदेव मध्याह्नेऽर्कस्य भुजः स्यात् । सूर्ये मेषाद्याद्यपादस्थे तदा स एव भुजः स्फुटार्कः स्यात् । कर्क्यादिद्वितीयपादेऽर्के स भुजो भषट्काच्छोध्यः । अवशिष्टराश्यादिकोऽर्कः स्यात् । ततस्तृतीयपादेऽर्के स भुजो भषट्कान्वितोऽर्कः स्यात् । मकरादिचतुर्थपादेऽर्के तदा स एव भुजश्चक्राच्छोध्यः । तच्छेषराश्यादिकस्तस्मिन् दिने माध्याह्निकस्फुटार्कः स्यात् । असौ छायार्कस्तद्दिवसस्फुटार्कादधिकश्चेत् तदा तयोरन्तरांशा अयनांशाः स्युः ।

कलिगताब्दसप्तसहस्राणि शतद्वयाधिकानि । ७२०० । ततः परतश्छायार्को गणितागतस्फुटार्कान्न्यूनः स्यात् । इति गुरुसम्प्रदायः । तदा तयोरन्तरमयनांशाः स्युः ॥ ३७-३८ ।

[छायातोऽपक्रमः]

छायाग्रपूर्वापररेखयोर्यत्
स्यादन्तरं तत् पलभावियोगः ।
सौम्ये युतिर्दक्षिणगे च लम्ब-
ज्या तद्वधः कर्णहृतोऽपमज्या ॥ ३९ ॥

पूर्वं मध्याह्नच्छायातश्छायार्कानयनमुक्तम् । इदानीमिष्टकालच्छायातश्छायार्कानयनमुच्यते । तत् कथमित्युक्ते—दिक्साधितपूर्वापररेखाया उत्तर-

भागे शङ्कुच्छाया चेत् पूर्वाह्णे दिङ्मध्यात् प्राग्रेखायां नतशङ्कुं संस्थापयेत् । नतशङ्कुश्छायायन्त्रेषूक्तः द्वादशाङ्गुलो ज्ञातव्यः । स्थूलमूलवालाग्रशङ्कुवेधयोः लम्बसूच्यैव नत इत्युक्तः । [तच्छायाग्रं दक्षिणोत्तररेखासंस्पृष्टं कृत्वा शङ्कुं संस्थाप्य तत्र बिन्दुं कुर्यात् ।]

पूर्वाह्णे दिङ्मध्यात् प्राग्रेखायां नतशङ्कुं संस्थाप्य तच्छायाग्रसंस्पृष्टदक्षिणोत्तररेखायां बिन्दुं दद्यात् । अपराह्णे दिङ्मध्यात् प्रत्यग्रेखायां नतशङ्कुं संस्थाप्य तच्छायाग्रसंस्पृष्टदक्षिणोत्तररेखायां बिन्दुं दद्यात् ।

इत्थमिष्टकालिकच्छायाग्रबिन्दुदिङ्मध्यबिन्द्वोर्मध्ये दक्षिणोत्तररेखाङ्गुलादिको भुज इत्युच्यते । सोऽपीष्टकालिकविषुवच्छाया स्यात् ।

असौ भुजो दिङ्मध्यादुत्तरश्चेत् स्वदेशे विषुवच्छायातोऽधिका यदा तदा तयोरन्तरमङ्गुलादिकं दक्षिणाग्रा स्यात् । [विषुवच्छायातोऽल्पा चेत्तयोरन्तरमुत्तराग्रा स्यात् ।] स एव भुजो दिङ्मध्याद् दक्षिणश्चेत् तद्भुजस्वदेशविषुवच्छाययोर्युतिरेवोत्तराग्रा स्यात् । यदा स्थापितशङ्कुच्छाया साक्षात् पूर्वापररेखास्था तदा भुजाभावे स्वदेशविषुवच्छायैवोत्तराग्रा स्यात् ।

इत्थं मेषादिषट्क उत्तराग्रा । तुलादिषट्के दक्षिणाग्रा । साग्रा लम्बज्ययाभ्यस्ता तात्कालिकच्छायाकर्णेन भक्ता लब्धं दक्षिणक्रान्तिज्या स्यात् । तत उत्तराग्रा लम्बज्याभ्यस्ता तात्कालिकच्छायाकर्णेन भक्ता लब्धमुत्तरक्रान्तिज्या स्यात् ।

क्रान्तिज्या त्रिज्ययाभ्यस्ता परमक्रान्तिज्यया भक्ता लब्धं रवेर्भुजजीवा स्यात् । तद्धनुर्लिप्ताः प्राग्वद्राश्यादिको रवेर्भुजः स्यात् । परदिनेऽपि तथा रवेर्भुजः साध्यः । असौ पूर्वदिनभुजाधिकश्चेत् क्रान्तिरप्युत्तरा चेत् स एव भुजः [स्फुटार्कः] स्यात् । तयोरन्तरं स्फुटभुक्तिः स्यात् । परदिनभुजोऽल्पश्चेदसौ राशिषट्काच्छोध्यः । तच्छेषराश्यादिकः स्फुटार्कः स्यात् ।

यदा दक्षिणक्रान्तिस्तदापि परदिनभुजोऽधिकश्चेदसौ सषड्भः स्फुटोऽर्कः स्यात् । परदिनभुजोऽल्पश्चेदसौ चक्राच्छोध्यः । तच्छेषराश्यादिकः स्फुटार्कः स्यात् ।

इति रविमज्ञात्वा छायातः स्फुटार्कज्ञानम् । रवौ परिज्ञातेऽप्यानीतो भुजः प्राग्वन्मेषादिपदक्रमेण स्फुटार्कः स्यात् । इति द्वितीयप्रकारेण छायार्कानयनम् ॥ ३९ ॥

[कोणच्छायातो रविस्फुटः]

विदिक्च्छायावर्गाद्दलपदमुदक्स्थे नरतले
पलच्छायायुक्तं रहितमनुदक्थे भवति यत् ।
फलं तल्लम्बघ्नं श्रुतिहृतमिनापक्रमगुणो
२४
भवेत् त्रिज्याघ्नोऽसौ जिनलवगुणाप्तो रविगुणः[1] ॥ ४० ॥

पूर्वोक्तकोणशङ्कुच्छायां वर्गीकृत्य तद्वर्गार्धान्मूलमानीय तन्मूलाङ्गुलादिकायां स्वदेशविषुवच्छायाङ्गुलादिका योज्या यदि स्वाक्षांशेभ्यो रवेरुत्तरक्रान्तिरधिका यत्र तत्रैव । स्वाक्षांशेभ्यो रवेरुत्तरक्रातिर्यदि न्यूना दक्षिणक्रान्तिर्वा यत्र तत्र तत्कोणशङ्कुच्छायावर्गार्धमूलविषुवच्छाययोरन्तरं कार्यमिति । तद्योगमन्तरं वा लम्बज्ययाभ्यस्तं तत् कोणशङ्कुकर्णेनाप्तं, फलं क्रान्तिज्या स्यात् । तां त्रिज्यया सङ्गुण्य परमक्रान्तिज्यया विभजेत् । लब्धं रवेर्भुजजीवा स्यात् । तद्धनुः प्राग्वदेव रवेर्भुजो राश्यादिकः स्यात् । तमिनभुजं प्राग्वन्मेषादिपदैः स्फुटच्छायार्कं कुर्यात् ॥ ४० ॥

[मध्याह्नच्छायातो रविस्फुटः]

सममण्डलकर्णभाजिता
त्रिभजीवार्कगुणाऽक्षजीवया ।
२४
निहता जिनजीवयोद्धृता
भुजजीवा सवितुर्धनू रविः ॥ ४१ ॥

स्वाक्षांशेभ्यो रवेरुत्तरक्रान्तिभागा यदि न्यूनास्तदार्कः प्रतिदिनं पूर्वाह्णेऽपराह्णे च सममण्डलरेखां प्रतिशति । तत्कालसममण्डलच्छायाकर्णेन त्रिज्या द्वादशगुणिता भाज्या । सममण्डलशङ्कुः स्यात् । तमक्षज्यया सङ्गुण्य परमापक्रमज्यया विभजेत् । लब्धं रवेर्भुजजीवा स्यात् । अथ द्वादशगुणिताक्षज्यया त्रिज्यां सङ्गुण्य [परमापक्रमज्यागुणित]सममण्डलकर्णेन विभजेत् । लब्धं रवेर्भुजजीवा स्यात् । तद्धनुः प्राग्वदेव राश्यादिको रवेर्भुजः

मूलम्— 1. After 40, B. Be. Bo_1. Bo_2. insert :
स्वदेशभागाधिका यदोत्तरक्रान्तिभागास्तदा दक्षिणच्छायाग्रम् अन्यथोक्त
Then verse 41.

स्यात् । स एव भुजो मेषाद्यपादेऽर्के स्वयं स्फुटार्कः स्यात् । द्वितीयपादस्थेऽर्के भुजो राशिषट्काच्छोध्यः । तच्छेषोऽर्कः स्यात् । तृतीयपादस्थेऽर्के भुजो राशिषट्कयुतोऽर्कः स्यात् । चतुर्थपादस्थेऽर्केऽसौ भुजः चक्राच्छोध्यः । तच्छेषराश्यादिको मध्याह्ने स्फुटच्छायार्कः स्यात् । इति चतुर्भिः प्रकारैश्छायार्कानयनमुक्तम् । करणागतस्फुटार्कयोरन्तरमयनांशाः स्युः ॥ ४१ ॥

क्रान्तेर्जीवां श्रवणगुणितां लम्बमौर्व्या विभक्ता-
मद्यच्छायाविरहितयुतां गोलयोर्बाहुमाहुः ।
छायावर्गादपभुजकृतेर्यत्पदं तद्धि कोटिः
केन्द्राच्छायावलयजतले सा च पूर्वापरा स्यात् ॥ ४२ ॥[1]

इष्टदिनेऽर्कक्रान्तिज्या स्वेष्टकालिकच्छायाकर्णेन गुणिता लम्बज्यया भक्ता । लब्धमुत्तरगोल उत्तराग्राङ्गुलादिकं स्यात् । सा विषुवच्छायातोऽधिका चेत् तयोरन्तरमुत्तरभुजः स्यात् । उत्तराग्रा विषुवच्छायातोऽल्पा चेत् तदन्तरं दक्षिणभुजः स्यात् ।

दक्षिणगोलेऽर्के लब्धं दक्षिणाग्रा स्यात् । सा विषुवच्छायासंयुक्ता दक्षिणभुजोऽङ्गुलादिकः स्यात् ।

तद्भुजवर्गं स्वेष्टकालिकच्छायावर्गात् त्यक्त्वा मूलं कोटिः स्यात् । असौ तलशङ्कुरित्युच्यते । अज्ञातदिग्वृत्ततलशङ्कुः स्वेष्टच्छायाग्रात् साक्षात् पूर्वापररेखा स्यात् । तत् कथमित्युक्ते—स्वेष्टच्छायाङ्गुलप्रमाणसूत्रेण वृत्तं विलिखेत् । तद्वृत्तमध्यबिन्दुतो व्यस्तदिशि भुजाङ्गुलानि प्रसार्य तदन्ते बिन्दुं दद्यात् । तद्बिन्दुतः पूर्वापरयोस्तलशङ्कुः वृत्तपर्यन्तं प्रसारयेत् । सा पूर्वापररेखा स्यात् । तत्प्रसाधितभुजाङ्गुलान्येव दक्षिणोत्तररेखा स्यात् ।

अथवा छायाग्राद् भुजं स्वदिशि प्रसार्य तदग्रात् कोटिं तद्वृत्तमध्यपर्यन्तं प्रसारयेत् । सा कोटिः पूर्वापरा स्यात् । भुजा दक्षिणोत्तररेखा स्यात् ।

इतीष्टकाले दिक्साधनार्थं दिङ्मध्यात् स्वेष्टच्छायया वृत्तं विलिख्य तन्मध्यात् पूर्वापरा सा कोटिरिति ।

अथ पूर्वमेव दिक्साधितं तदा दिङ्मध्यबिन्दुतः स्वेष्टछायाङ्गुलप्रमाणसूत्रेण वृत्तं विलिखेत् । तद्वृत्तमध्यबिन्दुतः प्राक् प्रत्यगपि प्रागानीतकोटिं प्रसार्य सैव पूर्वापरा स्यात् ॥ ४२ ॥

मूलम्— 1. M_1. M_2. M_3. क्रान्तिच्छाया

[छायाभ्रमणम्]

ततो भुजौ व्यस्तदिशौ विधेयौ
केन्द्रात् प्रभाग्रे च भुजाग्रसक्ते ।
मध्यप्रभा चेष्टफलेतरा सा
याम्योत्तरा दिग्गणयोगचिह्नात् ॥ ४३ ॥

अग्रेषु चिह्नानि विधाय वृत्तै-
र्मिथोऽवगाहैर्लिखितैस्तु तेभ्यः ।
तिमी भवेतां मुखपुच्छसक्ते[1]
रज्जू प्रसार्ये त्वनयोर्युतिर्या ॥ ४४ ॥

ततश्च चिह्नत्रयसङ्गि[2]वृत्तं
यल्लिख्यते भाग्रपरिभ्रमः सः ।
अतोऽन्यथा बाहुखमध्यभासां
या सा भवेच्छङ्कुपरिभ्रमः सः ॥ ४५ ॥

स्पष्टार्थम् । अत्रापि स्वेष्टच्छायादिक्रमः कथ्यते । स्वेष्टदिने सूर्योदयात् परतो घटिकात्रये चतुष्टये पञ्चके वाभीष्टघटिकाकालिकशङ्कुच्छायाङ्गुलप्रमाणसूत्रेण दिङ्मध्यविन्दुतो वृत्तं विलिखेत् । तत्कालच्छायाकर्णक्रान्तिलम्बज्याभिः पूर्वोक्तप्रकारेण भुजाङ्गुलानि कोटिं चानीय तां कोटिं दिङ्मध्यविन्दुतः प्राग्रेखायां प्रसार्य तदग्रे विन्दुं दद्यात् । तद्विन्दुतो भुजाङ्गुलानि व्यस्तदिशि प्रसार्य तद्वृत्तपरिधौ विन्यस्य तद्भुजाग्रे विन्दुं दद्यात् । दिङ्मध्यस्थापितशङ्कोश्छायाग्रं पूर्वाह्णे स्वेष्टच्छायाकाले प्रत्यग्भुजाग्रविन्दुस्पृग् भवति । ततोपराह्णे तावति दिनशेषे पूर्वभुजाग्रविन्दुस्पृग् भवति । तन्मध्यविन्दुरेव दिग्गणयोगचिह्नमुच्यते ।

मध्याह्नकर्णगुणिता क्रान्तिज्या लम्बज्याप्ता मध्याह्नकालिकाग्रा स्यात् । सा यद्युत्तराग्रा विषुवच्छायातोऽधिका तदा तयोरन्तरमुत्तरभुजः स्यात् । साग्राल्पा चेत् तदन्तरं दक्षिणभुजः स्यात् । दक्षिणगोले सा मध्याह्नाग्रा दक्षिणाग्रा स्यात् । तदा सा विषुवच्छायासंयुक्तो दक्षिणभुजः

मूलम्— 1. Bod. B. पुच्छयोस्ते
2. Bod. वृत्तत्रयस्पृङ्गि वृत्तं; D. चिह्नत्रयसक्तवृत्तं

स्यात् । स एव माध्याह्निको भुजो नित्यं मध्याह्नच्छाया स्यात् । सैव मध्याह्निकविषुवच्छायेत्युच्यते ।

मध्याह्नभुजो यद्युत्तरस्तदा तद्दिङ्मध्यविन्दुतो दक्षिणरेखायां प्राक् प्रसार्य तदग्रे विन्दुं दद्यात् । यदि दक्षिणभुजस्तदा तं भुजं दिङ्मध्यविन्दुत उत्तररेखायामुदक् प्रसार्य तदग्रे विन्दुं दद्यात् । इति पूर्वाह्नापराह्णमध्याह्न-च्छायाग्रे विन्दवः कार्याः ।

पृथक् पृथक् तद्विन्दून् मध्यं कृत्वा तलशङ्क्वग्रप्रमाणसूत्रेण त्रीणि वृत्तानि विलिखेत् । तत्सङ्गं तत्र मत्स्यद्वयमुत्पद्यते । तन्मत्स्यद्वयमुखपुच्छ-सक्तसूत्रद्वयमपि पूर्वापरभुजाग्रविन्दुद्वयदक्षिणभागस्थे दक्षिणं प्रसारयेत् । उत्तरभागस्थे तूत्तरं प्रसारयेत् । तत्प्रसारितसूत्रयोर्द्वयोः स्वस्वगत्या यत्र संयोगस्तत्र विन्दुं दद्यात् । विन्दुतो मध्याह्नच्छायाग्रविन्दुपर्यन्तप्रमाणसूत्रेण छायात्रयाग्रविन्दुत्रयस्पृग्वृत्तं विलिखेत् । असौ छायाभ्रमणरेखा स्यात् ।

इत्थमेव शङ्कुभ्रमणरेखापि साध्या । तत् कथमित्युक्ते—ततः प्राग्वद् तद्वृत्ते दिङ्मध्यविन्दुतः पूर्वापररेखायां प्राक्प्रत्यक्प्रसारितकोट्यग्रविन्दुभ्यां पूर्वापरभुजाङ्गुलानि स्वदिशि प्रसार्य तद्वृत्तपरिधौ विन्यस्य तत्र विन्दू कर्तव्यौ । तौ पूर्वापरभुजाग्रविन्दू भवतः । ततो माध्याह्निकभुजाङ्गुलानि दिङ्मध्यविन्दुतो दक्षिणोत्तररेखायां स्वदिशि प्रसार्य तदग्रे विन्दुं दद्यात् । असौ मध्याह्नच्छायाग्रविन्दुः स्यात् । तद्विन्दुषु त्रिषुतलशङ्कुप्रमाणसूत्रेण वृत्तत्रयं विलिख्य तन्मत्स्यद्वयमुखपुच्छसक्तसूत्रद्वययोगस्थविन्दुतो मध्य-भुजाग्रविन्दुपर्यन्तप्रमाणसूत्रेण पूर्वापरविन्दुस्पृग् वृत्तं विलिखेत् । असौ शङ्कोर्भ्रमणरेखा स्यात् ॥ ४३-४५ ॥

शङ्कोर्दिशां मध्यगतस्य भाग्रं
रेखां न जह्यात् खलु भाभ्रमेण ।
शङ्कुभ्रमेण भ्रमतश्च शङ्को-
श्छायाग्रमाशागणयोगचिह्नम् ॥ ४६ ॥

[नलकयन्त्रम्]

कोट्यग्रात् स्वदिशि भुजं निधाय सम्यक्
तस्याग्रे नरमथ केन्द्रशङ्कुप्रभाग्रे ।
कृत्वा ना नयनमुदग्रकर्णगत्या
शङ्क्वग्रे ग्रहमवलोकयेन्निविष्टम् ॥ ४७ ॥

पूर्वाह्णे स्वेष्टकालिकच्छायाङ्गुलप्रमाणलिखितवृत्ते तदा तन्मध्यस्थापितशङ्कोश्छायाग्रं तद्वृत्तप्रत्यग्भुजाग्रबिन्दुतो लिखितच्छायाभ्रमणरेखामध्ये मध्याह्ने मध्यभुजाग्रबिन्दुं स्पृष्ट्वा ततोऽपराह्णे तावति शेषे पूर्वभुजाग्रबिन्दुस्पृक् स्यात् । इति छायाभ्रमणम् ।

शङ्कुभ्रमणं तु—पूर्वाह्णेऽभीष्टकालिकप्रागुक्तनतघटिकातुल्याऽपराह्णेऽपि भोग्या नतघटिकाश्च दिनप्रमाणाच्छोध्याः । तच्छेषघटिकाभिः शङ्कुभ्रमणरेखामङ्गुलीकृतां विभजेत् । लब्धमङ्गुलादिकं प्रतिदिनादिकं छेदः स्यात् । शङ्कुभ्रमणरेखाया आदिः पूर्वभुजाग्रबिन्दुरेव । तदन्तं प्रत्यग्भुजाग्रबिन्दुः स्यात् । शङ्कुभ्रमणरेखार्धमङ्गुलात्मकं छेदाङ्गुलात्मकं लब्धघटिका यावत्यस्तावतीभिर्घटिकाभिरर्को मध्याह्नगः स्यात् । शङ्कुभ्रमणरेखाया आदिमारभ्य छेदेन विमाय यावन्तश्छेदास्तत्र प्रतिच्छेदमाद्यन्तरेखायां बिन्दवः कार्याः । तत्रक्रमेण शङ्कुभ्रमणरेखादिपूर्वभुजाग्रबिन्दौ शङ्कुं व्यसेत् । तच्छायाग्रं दिङ्मध्यबिन्दुस्पृक् स्यात् । ततस्तमेव शङ्कुं प्रतिदिनादिकं क्रमाच्छेदबिन्दौ स्थापयेत् । मध्याह्ने मध्यभुजाग्रबिन्दौ विन्यसेत् । ततः परं तावति दिनशेषे पश्चिमभुजाग्रबिन्दौ स्थापयेत् । इत्थंस्थापितशङ्कोश्छायाग्रं दिङ्मध्यबिन्दावेव । 'कोट्यग्रात् स्वदिशि भुजम्' इति श्लोको व्याख्यातः ॥ ४६-४७ ॥

विपुलनलकं कर्णस्थित्या दृगुच्छ्रितदीर्घया
स्फुटतरककुप्सिद्धि[1]र्बध्वा यथाविधि वंशयोः ।
ग्रहणमुदितं शीतांशुं वा ग्रहं च विलोकये-
न्नभसि नलकच्छिद्रेणैवं जले च विलोमतः ॥ ४८ ॥

दिवा भानोः प्राग्वच्छायाकर्णभुजकोट्यावप्यानयेत् । रात्रौ चन्द्रभौमादीनां वक्ष्यमाणप्रकारेण दृक्कर्मद्वयं कृत्वा स्फुटक्रान्तिज्यामानीय ततः प्राग्वत्तदिष्टकालिकच्छायाकर्णभुजकोट्यावप्यानयेत् । ततः समभूमौ दिक्साधितमध्यबिन्दुतोऽभीष्टकालिकच्छायाङ्गुलप्रमाणसूत्रेण वृत्तं विलिखेत् । पूर्वाह्णे चेत् तद्वृत्त[मध्य]बिन्दुतः कोटिं प्राग्रेखायां प्रसार्य तदग्रे बिन्दुं दद्यात् । तद्बिन्दुतो भुजाङ्गुलानि स्वदिशि प्रसार्य तद्वृत्तपरिधौ विन्यस्य तत्र बिन्दुं दद्यात् । अपराह्णे चेद् दिङ्मध्यबिन्दुतः कोटिं प्रत्यग्रेखायां प्रसार्य तदग्रे बिन्दुं दद्यात् । बिन्दुतो भुजाङ्गुलानि स्वदिशि प्रसार्य तद्वृत्तपरिधौ विन्यस्य तत्र

मूलम्— 1. M_1. M_2. M_3. सिद्ध

बिन्दुं दद्यात् । तद्बिन्दौ पञ्चहस्तोच्छ्रितमधो हस्तनिखानितं स्तम्भमृजुकृतं संस्थाप्य तमेव शङ्कुं परिकल्प्य तद्द्वादशभागमङ्गुलं कल्पनीयम् । तात्कालिकच्छायाङ्गुलानि कल्पनीयानि इति कल्पिताङ्गुलप्रमाणसूत्रेणैव पूर्वं दिङ्मध्यबिन्दुतो वृत्तं विलिखेत् । तद्भुजकोटच्यङ्गुलान्यपि तत्तुल्यान्येव कल्पनीयानि । इत्थमभीष्टकाले तत्स्तम्भच्छायाग्रं तद्बिन्दुमध्यबिन्दुलग्नं स्यात् । तद्दिङ्मध्यबिन्दौ स्वल्पशलाकां संस्थाप्य तत्र सूत्राग्रमेकं बध्नीयात् । ततः सूत्रमूर्ध्वं प्रसार्य तदपरमग्रं तत्स्तम्भाग्रे बध्नीयात् । तत् तदा छायाकर्णाङ्गुलप्रमाणसूत्रं स्यात् । एतत् सर्वमभीष्टकालात्प्रागेव कर्तव्यम् । तस्मिन् काले तत्कर्णसूत्रानुस्यूतदृष्ट्या खस्थं ग्रहं स्तम्भाग्रे निविष्टं दिवार्कग्रहणं, रात्रौ चन्द्रग्रहणं भौमादिकमभीष्टं भं च पश्येत् ।

अथवा अम्बुपूर्णं पात्रं दिङ्मध्ये संस्थाप्य तत्स्थकर्णसूत्रगत्या तत्काले तज्जलमध्यस्थं पश्येत् । रात्रौ ताराणां छाया न दृश्यते । तथापि रात्राविष्टकालिकच्छायाकर्णसूत्रेण भौमादिस्पष्टं प्रकारान्तरं आचार्येण विकल्पितम् ।

तत् कथमित्युक्ते—यथाशास्त्रं समभूमौ समदिक्साधनादिकं सर्वं निर्वर्त्यम् । दिङ्मध्यबिन्दुतः सूत्रं प्रसार्य तत् स्तम्भमूले बध्नीयात् । तदासौ ताराग्रहच्छाया स्यात् । दिङ्मध्यात् स्तम्भाग्रबद्धसूत्रं छायाकर्णेन स्यात् । तद्दिङ्मध्यात् कर्णसूत्रगत्या स्तम्भाभिमुखं गच्छतः पुरुषस्य कर्णसूत्रं दृष्टितुल्यमुच्छ्रितं तत्र स्यात् । तत्र तत्प्रमाणं वेणुदण्डं संस्थाप्यम् । पुनः कर्णगत्या स्तम्भाभिमुखं गच्छतः पुरुषस्य शीर्षस्यार्धवितस्तिमात्रेण कर्णसूत्रोच्छ्रितं यत् तस्यापि तत्प्रमाणं वेणुदण्डं संस्थाप्य तद्वेणुदण्डद्वयोरपि तिर्यक्कर्णसूत्रगत्या विपुलनलकं तद्वेणुद्वयाग्रयोः संलग्नं बध्नीयात् । विपुलनलकमिति विस्तीर्णान्तःसुषिरं वर्तुलं सुश्लक्ष्णं भ्रमय[न्त्रजनितं स्थूलवेण्वसुषिरो वा काष्ठादिकं वा] कथितं प्रसिद्धम् । नलकमिति [वर्तुलं दीर्घान्तस्सुषिरमेव] । तत् स्तम्भाग्रबद्धकर्णसूत्रं तन्नलकाभ्यन्तरादाकृष्य तच्छायाग्रे दिङ्मध्यस्थितशलाकायां बध्नीयात् । तद्बद्धकर्णसूत्रगत्या तद्बद्धनलकच्छिद्रेण तदा स्तम्भाग्रे स्थितमभीष्टभौमादिकमाकाशे पश्येत् ।

ततोऽश्विन्यादि नक्षत्रादि स्वकीयाभीष्टकालिकच्छायाकर्णगत्या स्तम्भाग्रे पश्येत् । अथवा नलकात् साक्षादवस्थापितपात्रजलेऽत्र कर्णसूत्रगत्याऽधःपात्रजलस्थं भौमादिकं पश्येत् ।

अथवा तच्छायावृत्तं भुजकोटिस्तम्भाद् व्यत्ययदिक्षु संस्थापयेत् । कथमित्युक्ते—पूर्वाह्णे कोटिं दिङ्मध्यात् प्रत्यक् प्रसार्य तदग्रे बिन्दुं दत्वा ततो भुजाङ्गुलानि व्यस्तदिशि प्रसार्य वृत्तपरिधौ विन्यस्य तत्र बिन्दुं दद्यात् । ततः स्तम्भशङ्कुं दिङ्मध्ये संस्थापयेत् । तदा छायाग्रं भुजाग्रबिन्दुस्पृक्

स्यात्। तत्रात्पां शलाकां संस्थाप्य तद्वद्धसूत्रमूर्ध्वं प्रसार्य स्तम्भाग्रे बध्नीयात्। तच्छायाकर्णसूत्रं स्यात्। तत्कर्णगत्या प्राग्वद् वेणुद्वयाग्रयोर्बध्वा नलकच्छिद्रेण कर्णसूत्रगत्या स्तम्भाग्रे भौमाद्यभीष्टग्रहतारकं पश्येत्। नलकाधश्छायाग्रस्थितजले वापि पश्येत्। इतीष्टदिने रात्रौ वैवाहिकं लग्नकालमभीष्टताराग्रहच्छायया साधयेत्। इत्थं रात्रौ कालज्ञानमम्बुयन्त्रकालज्ञानमतिस्पष्टं स्यात्॥ ४८॥

इष्टच्छायाशङ्कुरत्नप्रभाघ्नः

१२

शङ्क्वग्रं स्याद् दक्षिणं सूर्यभक्तः।
रात्रौ सौम्यं व्यस्तगोलात् तथान्त्या
स्वच्छायाग्रे दक्षिणे चोत्तराग्रः॥ ४९॥

इष्टकालच्छेदो लम्बज्या[घ्नस्त्रिज्यया] भक्तो लब्धमिष्टच्छायाशङ्कुः स्यात्। असौ विषुवच्छायाभ्यस्तो द्वादशाप्तो लब्धं लिप्तादिकमुदयास्तमयशङ्क्वग्रं स्यात्। तदेव शङ्कुतलमित्युच्यते।

अपराह्णे भोग्योन्नतमस्तमनपर्यन्तं सदार्कस्योदयान्मध्याह्नपर्यन्तं दक्षिण एव स्यात्। तस्मात् स्वोदयस्थानादिष्टोन्नतकालस्थानपर्यन्तं दक्षिणापसर्पण एव तच्छङ्कुतलमित्युच्यते।

अपराह्णे भोग्योन्नतमस्तमनपर्यन्तं सूर्यास्तमयस्थानादेतद्दक्षिणे शङ्कुतलं स्यात्। तस्मादुदयास्तमयस्थानाद् दक्षिणे सूर्यस्थितस्थानपर्यन्ताग्रा स्यात्। असौ तात्कालिको भुजः स्यात्, इष्टच्छायाशङ्कुः कोटिः स्यात्। इष्टच्छेदः कर्णः।

यथा विषुवत्कर्णस्य विषुवच्छाया भुजो द्वादशाङ्गुलशङ्कुः कोटिः, [तथा कलात्मकत्रिज्याकर्णस्य लम्बज्या कोटिः] स्वाक्षज्या भुजः स्यात्। इतीष्टशङ्कुं कोटिं परिकल्प्य भुजकर्णौ ज्ञातव्यौ। एतद् दक्षिणशङ्क्वग्रं रात्रौ भानोरुत्तराग्रं स्यात् [तथान्त्या रात्रौ दिग्व्यस्ता स्यात्]। यत्र स्वदेशाक्षांशाश्चतुर्विंशतेरल्पास्तत्रोत्तरक्रान्तिभागा यदा स्वाक्षांशेभ्योऽधिकास्तदा मध्याह्नेऽर्कच्छायाग्रं शङ्कमूलाद् दक्षिणे तिष्ठति। तस्मान्मध्याह्नेऽर्कः खमध्यादुत्तरगः। तद्वशात्तेषु दिवसेषु उत्तरेऽक्षांशाः स्युः॥ ४९॥

[नतभागाः नतकालश्च]

५४००
खखाब्धिविषयाधिका दिनदलान्नतस्यासव-
स्ततः क्रमगुणान्विता त्रिगृहशिञ्जिनी स्यान्नता ।
गृहत्रयगुणाधिकं यदपि तस्य कार्यं धनुः
५४००
क्रमेण खखवारिधिश्वसनयुग्विलोमं भवेत् ॥ ५० ॥

उत्तरगोले स्वेष्टनतघटिकाः पञ्चदशभ्योऽधिकाश्चेत् तदन्तर-घटिकासूनां क्रमजीवां कृत्वा त्रिज्यया युञ्ज्यात् । तन्नतघटिकोत्क्रमज्या स्यात् ।

तथा नतोत्क्रमज्या त्रिज्यातोऽधिका तदुत्क्रमज्यातस्त्रिज्यां त्यक्त्वा तच्छेषज्यां क्रमेण धनुः कृत्वा तद्धनुरसवस्त्रिज्याधनुरसुषु योज्याः । ते तन्नतो-त्क्रमज्याधनुःप्राणा भवन्ति ॥ ५० ॥

[लघुक्रियाः]

६०
विकलस्य कृतिं खषड्हृतां
स्वकलघ्ने विकले द्विसङ्गुणे ।
६०
विनियोज्य हरेन्नभोरसैः
फलयुक् पूर्वकृतिः कृतिर्भवेत् ॥ ५१ ॥

लिप्तादिराशेर्वर्गः कथमित्युक्ते—लिप्तादीनामधो विलिप्ता द्विधा स्थाप्याः । तन्मध्यस्थविलिप्ता द्विघ्नाः । तल्लिप्ताभिः पुनर्गुणयेत् । तदुपरि लिप्तानां [अधो] विलिप्तानां च पृथक् पृथग्वर्गमानीय तद्विलिप्तावर्गोऽध-स्तृतीयस्थानस्थः षष्टया भक्तः । तल्लब्धं मध्यस्थराशौ संयोज्यम् । तन्मध्यराशिः षष्टया भक्तो लब्धमुपरिष्टाल्लिप्तावर्गराशौ युञ्ज्यात् इति लिप्तादिवर्गराशिः स्यात् । इत्थमेवांशादिराशेरङ्गुलादिराशेश्च वर्गः स्यात् ॥ ५१ ॥

पदमुक्तवदानयेत् ततः

६०

शशियुक् शेषकमभ्रषड्गुणम् ।

विकलासहितं विभिन्नजं

द्वियुतं छेदहृतं फलं भवेत् ॥ ५२ ॥[1]

कलादिवर्गराशेर्वर्गमूलोक्तप्रकारेण मूलमानीय तच्छेषं सैकं षष्टिघ्न-मधस्तद्विकलान्वितं कृत्वा तं राशिं प्रागानीतमूलद्विगुणेन द्विकान्वितेन भजेत् । लब्धं प्रागानीतमूलतले न्यसेत् । इत्येतद्भिन्नवर्गमूलं स्यात् । इत्थमानीत-मूलमल्पान्तरं स्यात् । कथमित्युक्ते—तन्मूलात् पुनरानीतवर्गस्तत्पूर्ववर्गात् स्वल्पन्यूनाधिकः स्यात् ।

तस्मात् स्फुटवर्गमूलानयनार्थम् **अस्मदीयश्लोकः** । तद्यथा[1]—

३६००

अंशवर्गः खखर्त्वग्निगुणो लिप्ताकृतिर्भवेत् ।

६०

लिप्तावर्गात् पदं खर्तुहृतमंशपदं भवेत् ॥

अंशादेर्वर्गराशिः षष्टिघ्नस्तदधस्थकलान्वितः पुनः षष्टिगुणितस्तद्-विलिप्तान्वितोऽसौ विलिप्तावर्गः स्यात् । तस्मान्मूलं विलिप्तावर्गमूलं स्यात् । तत् [षष्ट्याप्तं लिप्तावर्गमूलं स्यात् । तत्] पुनः षष्ट्याप्तमंश-वर्गमूलं स्यात् । पुनस्तद्वर्गः तत्पूर्ववर्गांशादिकः स्यात् ॥ ५२ ॥

अकला विकलास्त्वसद्गुणा

६०

खरसाप्ता विकलाकृतिर्भवेत् ।

६०

अकला विकला खषड्गुणाः

कृतिमूलं विकलापदं स्फुटम् ॥ ५३ ॥

मूलम्— 1. After 52, V_1. adds प्रकारान्तरम् अंशवर्गः·····भवेत् , 7 lines below after 52, V_2. adds अंशवर्गः···भवेत् । Then V_1. V_2. have verse 53.

व्याख्या—1. The mss. add. here व्याख्यानकारविरचितश्लोकः ।

केवललिप्ताः स्वाभिरेव गुणिताः षष्ट्याप्तास्तद्विलिप्तावर्गः स्यात् । तद्विलिप्तावर्गात् षष्टिगुणितान्मूलं तद्विलिप्तावर्गमूलं स्यात् ॥ ५३ ॥

राशिः पृथगिष्टसंयुतो
गुणितः स्वेष्टविवर्जितेन सः ।
पुनरीप्सितवर्गसंयुतः
कृतवर्गो लघुकर्मणा भवेत् ॥ ५४ ॥

इष्टराशिः क्रमात् कल्पितेनेष्टेन युतो वियुतश्च । तत्रेष्टयुक्तराशि-मिष्टोनितेनाभ्यस्य तत्र कल्पितेष्टवर्गं युञ्ज्यात् । असौ पूर्वेष्टराशिवर्गो भवति । इति लघुप्रक्रियाचित्रगणितमुक्तम् ॥ ५४ ॥

इति श्री-मल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
त्रिप्रश्नाधिकारो नाम चतुर्थोऽध्यायः ॥

सोमग्रहणाधिकारो नाम

पञ्चमोऽध्यायः

सोमग्रहणाधिकारो व्याख्यायते ।

[ग्रहणसम्भावना पर्वाधिपाद्याश्च]

[1]चन्द्रार्कयोर्ग्रहणप्रसङ्गात् तद्ग्रहणपर्वाधिपसावनवर्षमासाधिपप्रभवाद्यब्दपरिज्ञानार्थं व्याख्यानसहिताः श्लोका दश अस्माभिः प्रोक्ताः । तेऽत्र विलिख्यन्ते :—

कल्पादेर्द्युगणाद्राहुः सबीजो भगणादिकः ।
भगणाद्यर्कसंयुक्तः सषड्भोंऽशीकृतस्ततः ॥ १ ॥

१८० ७
खधृत्याप्तः पर्वगणो नगैः शेषास्तु पर्वपः ।
केन्द्वुशक्रधनाधीशवरुणाग्नियमाः क्रमात् ॥ २ ॥

१८०
एते ग्रहणपर्वेशाः खधृत्याप्तस्य तद्गतम् ।
१८ १४
गम्यं वा धृतिशक्रोनं तदा ग्रासोऽर्कचन्द्रयोः ॥ ३ ॥

३७३ ३० ३६०
द्युगणात् व्यगवह्न्यूनात् खाग्निभिः खर्तुवह्निभिः ।
७
लब्धं द्वित्रिगुणं सैकं सूर्याद्यमगहृत् क्रमात् ॥ ४ ॥

शेषौ सावनमानस्य विज्ञेयौ मासवर्षयौ ।
८०
प्राक् प्रत्यगध्वनः खेभैराप्तं देशान्तरं घटी ॥ ५ ॥

1. In the beginning of the chapter M_2. adds चन्द्रार्कयोः·····मया, next page verse 10.

१५
स्वदेशमध्यरात्रोऽर्धे शरेन्दुघटिकाक्षणे ।
प्राग्देशान्तरनाड्याद्ये लङ्कायां भास्करोदयः ॥ ६ ॥

तद्देशान्तरनाडीभिः प्रत्यगूने तु तत्क्षणे ।
५
तदूर्ध्व इष्टघटी द्विघ्ना होरेशाः स्युः शरोद्धृताः ॥ ७ ॥

आद्यो वाराधिपः स्वेष्टस्तत् तत्षष्ठास्तथापरे ।
द्वादशघ्ना गुरोर्याता भगणास्तद्गृहान्विताः ॥ ८ ॥

३४
अब्ध्यग्न्यूना हृताः षष्ट्या शेषाब्दाः प्रभवादयः ।
३०
बार्हस्पत्यात् ततो भागाः सूर्याभ्यस्ता नभोगुणैः ॥ ९ ॥

आप्ता लब्धं गुरोर्मासास्तच्छेषा दिवसादिकाः ।
इत्युक्तं शिष्यधीतन्त्रे पर्वज्ञानादिकं मया ॥ १० ॥

चन्द्रार्कयोर्ग्रहणसम्भावना पर्वसन्धावेव, पौर्णमास्यां अमावास्यायां च । कलियुगादिद्युगणाद् भगणादिकौ रविराह्वानीय तत्र राहौ बीजकलाः शोध्याः । रवौ बीजकला योज्याः । ततस्तमसः सषड्भमित्युक्तम् । राशिषट्कं च योज्यम् । ततश्चक्राच्छोधितराहुर्भगणादिकः स्यात् । (१)

ततो भगणादिकरविराहुसंयोगं कृत्वा तद्भगणैक्यं द्वादशगुणितं तद्राशियुक्तं त्रिंशद्गुणितं तत्तद्भागान्वितमित्यंशीकृत्य अशीत्यधिकशतेनाप्तम् । १८० । लब्धं ब्रह्मादिपर्वगणः स्यात् । कलियुगादि तस्मात् पर्वगणात् ब्रह्मादिपर्वयोगाः । तच्छेषो ब्रह्मादिपर्वेशः स्यात् । ते पर्वेशा ब्रह्मादिपर्वेशः स्यात् । ते पर्वेशा ब्रह्मशशीन्द्रकुबेरवरुणाग्नियमा इति सप्तदेवता ग्रहणपर्वणामधिपा इति । इष्टग्रहणं यस्मिन् पर्वणि जातं तद्ग्रहणफलं वराहसंहितायां राहुचारे विज्ञेयम् । (२)

खधृत्याप्तशेषांशो वर्तमानपर्वाधिपगतम् । खधृत्यन्तरं । १८० । गम्यम् । तद्गतं गम्यं वा चतुर्दशांशेभ्योऽल्पं चेत् तस्यां पौर्णमास्यां सोमग्रहणसम्भावना विद्यते । तथा तद्गतं गम्यं वाष्टादशांशेभ्योऽल्पं चेत् तस्याममावस्यायां

सूर्यग्रहणसम्भावना विद्यते । तद्गतं गम्यं वा शक्र- । १४ । -तुल्यमधिकं वा यदि स्यात् तदा पौर्णमास्यां सोमग्रहणशङ्कापि नास्ति । तद्गतं गम्यं वा धृति- । १८ । -तुल्याधिकं वा यदि स्यात् तस्याममावस्यायां सूर्यग्रहणशङ्कापि नास्ति । (३)

ग्रहाणां कालबलज्ञानार्थं जातकादिषु स्वेष्टदिने कलियुगद्युगण-मानीय तत्र त्रिसप्तत्यधिकशतत्रयेण । ३७३ । त्यक्तं पृथक् त्रिंशता । ३० । षष्ट्यधिकशतत्रयेण । ३६० । [च] विभजेत् । लब्धं क्रमाद् द्विघ्नं त्रिघ्नं च सैकं सप्ताप्तशेषौ सावनमानेन मासवर्षाधिपौ भवतः । मासशेषतस्तन्मासे गतदिनानि । वर्षशेषतस्तद्वत्सरे गतदिनानि स्युः । (४)

ततो जन्मादिषु स्वेष्टदिनेऽभीष्टद्युगतघटिकाक्षणे क्षणवारज्ञानार्थं प्राक्प्रत्यग्योजनानि अशीत्या । ८० । विभजेत् । लब्धं घटिकादिकं देशान्तरम् । असौ भूरेखास्वदेशयोरन्तरकालो नियतं स्यात् ।

इष्टदिने मध्याह्ने त्रिंशद्योजिते मध्यरात्रिप्रमाणं स्यात् । मध्यरात्रि-प्रमाणे पञ्चदशसंयुक्ते सत्यसौ लङ्कोदये ध्रुवः स्यात् । तस्मिन् ध्रुवे प्राग् देशान्तरघटिका योज्याः । प्रत्यग्देशान्तरघटिकास्त्याज्याः । ततोऽसौ साक्षाल्लङ्कासूर्योदयः स्यात् । असौ स्वदेशसूर्योदयकालात् [कदाचित् प्रागपि भवति] कदाचित् पश्चादपि भवति । (६)

इत्थं तत्सूर्योदयात् परतोऽभीष्टकालद्युगतघटिका द्विगुणिताः पञ्चभिराप्ता लब्धं क्षणं वाराधिपतयो भवन्ति । क्षणवारो नाम कालहोरैव । प्रमाणं लङ्कासूर्योदयकालात् सार्धघटिकाद्वयं स्यात् । इत्येतस्मिन्नहोरात्रे चतुर्विंशतिहोरा भवन्ति । (७)

स्वेष्टदिनवाराधिपतिरेव प्रथमहोराधिपः स्यात् । द्वितीयहोराधि-पतिस्तत्षष्ठः स्यात् । तृतीयहोराधिपतिरपि तत्षष्ठाधिपतिर्भवति । इति रविशुक्रबुधचन्द्रशनैश्चरगुरुभौमा रविवारपर्यायेणोदिताश्चतुर्विंशतिहोराणां क्रमादधिपतयः । इत्येतेषां पञ्चविंशः सोम एव सोमदिने प्रथमहोराधिपः स्यात् । इत्युक्तक्रमेण पञ्चविंशो भौमो द्वितीयदिने होराधिपः । तथा बुधादयः स्वस्वहोराद्यहोराधिपा भवन्ति । (८a)

बृहस्पतिज्ञाने प्रभवादिज्ञानार्थं स्वेष्टदिने कलियुगादि द्युगणान्मध्यम-गुरुभगणादिकमानीय [तत्र] तद्बीजलिप्तास्त्यक्त्वा तद्भगणाद् द्वादशगुणिताद्

राशिसंयुक्तात् तत्र चतुस्त्रिंशद्राशयः । ३४ । शोध्याः । ततः षष्ट्याप्त-शेषा प्रभवादयो भवन्ति । (८b-९a)

ततस्तद्गुरोर्भागलिप्ताविलिप्ताश्च षष्ट्या भक्ताः । तद्विलिप्तालब्धं लिप्तासु, तल्लिप्तालब्धं भागेषु योज्यम् । तद् भागस्थानं त्रिंशता भक्त-लब्धं गुरोर्मासाः । तच्छेषभागा लिप्ताविलिप्ता गुरुदिनघटिकाविघटिकाः क्रमेण भवन्ति ।

इत्थमभीष्टदिने बार्हस्पत्यमाने सूर्योदयकाले प्रभवादिवत्सरा गताः । तदनन्तरवर्तमानाब्दमासदिनघटिकाविघटिका गता ज्ञेयाः । (९b-१०a)

एतस्मिन् **शिष्यधीतन्त्रे लल्लाचार्येण**तन्नोक्तम् । तथाप्येतदत्रापि ज्ञातव्यम् । सर्वज्ञ-**नङ्गनार्याणा**मनुजेन **मल्लिकार्जुनसूरिणा** श्लोकैर्दशभिः पर्वाधिपज्ञानं च प्रोक्तमित्येतत्तत्वज्ञैर्विज्ञेयम् । (१०b)

[ग्रहणकालः]

दिनकरास्तसमये सविधुन्तुदौ
रविविधू विदधीत परिस्फुटौ ।
प्रथमपक्षजपञ्चदशे तिथौ
शशधरग्रहणावगमेच्छया ॥ १ ॥

सोमग्रहणज्ञानार्थं ग्रहणसद्भावज्ञानार्थं ग्रहणसद्भावज्ञातपौर्णमास्यां सूर्यास्तमयकालिकान् मध्यमरविचन्द्रराहूनानीय तौ चन्द्रार्कौ स्फुटीकृत्वा ततः पर्वघटिका आनयेत् ॥ १ ॥

[आकाशकक्ष्या]

१० २१६००
दशगुणं गुणयेत् खखषड्घनं
युगभवैर्भगणैः शिशरद्युतेः ।
भवति योजनमानमहःपते-
र्द्युतियुजो नभसः परिधेरिदम् ॥ २ ॥

लक्षद्वयं षोडशसहस्राणि । २,१६,००० । योजनानि चन्द्रकक्ष्या । एषा युगचन्द्रभगणैः । ५,७७,५३,३३६ । एभिर्गुणिता । सा युगे कल्पिताकाश[कक्षा]योजनप्रमाणं स्यात् । इत्याकाशकक्ष्यायोजनसङ्ख्या द्वादशलक्षसप्तचत्वारिंशत्सहस्रचतुःशतद्विसप्ततिकोटयः पञ्चलक्षाः षट्सप्ततिसहस्राणि भवति । १२४,७४,७२,०५,७६,००० । अस्मिन्नाकाशपरिधौ समन्तात् सूर्यरश्मयः प्रचरन्ति । एषैव सहस्रगुणिता कल्पोक्ताकाशकक्ष्या स्यात् ॥ २ ॥

[ग्रहभुक्तिलिप्ताः]

७२०००
खखनखाद्रिहृतं भयुजो भवेद्
ग्रहयुजो निजपर्ययहृत् पृथक् ।
६२५ ३९२७
शरयमाङ्गहता भनवाग्निहृद्
ग्रहवृतेः श्रवणः फलमुच्यते ॥ ३ ॥

रविभगणाः षष्ट्याप्ता लब्धं द्विसप्ततिसहस्राणि । ७२,००० । एभिराकाशकक्ष्या भक्ता लब्धं नक्षत्रकक्ष्या स्यात् । पुनराकाशकक्ष्या पृथक्पृथक् सूर्यादीनां भगणैर्भक्ता । लब्धं सूर्यादीनां स्वस्वकक्ष्या भवन्ति । सूर्यकक्ष्या षष्टिगुणिता नक्षत्रकक्ष्या स्यात् । कक्ष्येति स्वमार्गपरिधियोजनानि । इति एताः कक्ष्या आनयेत् । ततो युगाकाशकक्ष्या युगसावनदिवसैराप्ता लब्धं सप्त सहस्राणि नवशतानि षडधिकानि । ७९०६ । तानि प्रतिदिनं ग्रहाणां प्राग्गतियोजनानि । तान्येव स्वस्वभगणैर्हृत्वा आकाशकक्ष्यया विभजेत् । लब्धं भगणादि स्वस्वभुक्तिलिप्ता भवन्ति ।

ततो गोले कक्ष्याक्रमो ज्ञेयः । तत् कथमित्युक्ते—पूर्वोक्ताकाशपरिधिमध्ये नक्षत्रकक्ष्या—सप्तदशकोटयो द्वात्रिंशल्लक्षाः षष्टिसहस्राण्यष्टौ च । १७,३२,६०,००८ । योजनानि । नक्षत्रकक्ष्यायामधः शनैश्चरकक्ष्या—अष्टौ कोटय एकपञ्चाशल्लक्षाश्चतुर्दशसहस्राणि चतुःशतानि त्रिनवत्यधिकानि च । ८,५१,१४,४९३ । योजनानि । शनैश्चरकक्ष्यायामधो राहुकक्ष्या—पञ्चकोटयः सप्तत्रिंशल्लक्षा अष्टादशसहस्राण्यष्टादशाधिकानि च । ५,३७,१८,०१८ । योजनानि । राहुकक्ष्यायामधो गुरुकक्ष्या—तिस्रः

कोट्यो द्विचत्वारिंशल्लक्षाः पञ्चाशत्सहस्राणि त्रयस्त्रिंशदधिकशतयोजनानि । ३,४२,५०,१३३ । गुरुकक्ष्या[यामध्यश्चन्द्रोच्चकक्ष्या]—द्वे कोटी पञ्चपञ्चाशल्लक्षा एकपञ्चाशत्सहस्राणि चतुःशतानि पञ्चाशीतिश्च । २,५५,५१,-४८५ । योजनानि । चन्द्रोच्चकक्ष्यायामधो भौमकक्ष्या—चतुःपञ्चाशल्लक्षा एकत्रिंशत्सहस्राणि शतद्वयमेकनवतिश्च । ५४,३१,२९१ । योजनानि । भौमकक्ष्यायामधोऽर्कबुधशुक्रकक्ष्या—अष्टाविंशतिलक्षाः सप्ताशीतिसहस्राणि शतषट्कं सप्तषष्ट्यधिकं च । २८,८७,६६७ । योजनानि । रविबुधशुक्रकक्ष्यायामधः शुक्रशीघ्रकक्ष्या—सप्तदशलक्षाः षट्सप्ततिसहस्राणि चतुःशतान्येकविंशत्यधिकानि च । १७,७६,४२१ । योजनानि । शुक्रशीघ्रकक्ष्यायामधो बुधशीघ्रकक्ष्या—षड्लक्षाः पञ्चनवतिसहस्राणि चतुःशतानि त्रिसप्तत्यधिकानि च । ६,९५,४७३ । योजनानि । बुधशीघ्रकक्ष्यायामधश्चन्द्रकक्ष्या लक्षद्वयं षोडशसहस्राणि च । २,१६,००० । योजनानि । चन्द्रकक्ष्यायामधो भूपरिधिः । तस्माद् भूमेरुपरि चन्द्रकक्ष्या स्यात् ।

इत्यत्र **शिष्यधीमहातन्त्रे** योजनद्वयं **सिद्धान्तेषु** योजनत्रयं **स्यात्** । तस्माद्धेतोः कक्ष्यास्त्रिभिर्गुणिता द्वाभ्यां भक्ताः । लब्धयोजनानि **सूर्यसिद्धान्तोक्त**कक्ष्यायोजनानि **स्युः** ।

सहस्रत्रयनवशतसप्तविंशत्यधिकयोजनानां परिधेः । ३९२७ । व्यासस्तु पञ्चाशदधिकद्वादशशतानि । १२५० । व्यासार्धं पञ्चविंशत्यधिक-षट्शतानि । ६२५ । कर्ण इत्यत्र कल्पितः । तस्मादनेन व्यासार्धेन कर्णेन वा आकाशपरिधिं नक्षत्रादीनां कक्ष्याश्च पृथक् पृथगेव हृत्वा अनेन परिधिना विभजेत् । लब्धं स्वकीयकर्णः स्यात् ।

इत्थं युगे कल्पिताकाशकर्णः—एकलक्षाष्टनवतिसहस्रपञ्चशतचत्वारिंशत्कोट्योऽष्टाविंशतिलक्षाः षट्शतान्येकादशाधिकानि च । १९,८५,४०,२८,००,६११ । योजनानि । नक्षत्रकक्ष्याकर्णो द्वे कोटी पञ्चसप्ततिलक्षाः पञ्चसप्ततिसहस्राणि शतमेकं द्वाविंशत्यधिकं च । २,७५,७५,१२२ । योजनानि । शनैश्चरकक्ष्याकर्ण एककोटिः पञ्चत्रिंशल्लक्षाः षट्चत्वारिंशत्सहस्राणि त्रीणि शतान्येकषष्ट्यधिकानि च । १,३५,४६,३६१ । योजनानि । राहुकक्ष्याकर्णः पञ्चाशीतिलक्षा एकोनपञ्चाशत्सहस्राणि चतुश्शतान्यष्टषष्ट्यधिकानि च । ८५,४९,४६८ । योजनानि । गुरुकक्ष्याकर्णः चतुःपञ्चाशल्लक्षा एकपञ्चाशत्सहस्राणि पञ्चषष्ट्यधिकानि च । ५४,५१,०६५ । योजनानि । चन्द्रोच्चकक्ष्याकर्णश्चत्वारिंशल्लक्षाः षट्षष्टिसहस्राणि षट्शतानि षट्त्रिंशदधिकानि च । ४०,६६,६३६ । योजनानि । भौमकक्ष्याकर्णः अष्टौ लक्षाश्चतुःषष्टिसहस्राणि चतुःशतानि पञ्चदशाधिकानि ।८,६४,४१५। योजनानि । रविबुधशुक्राणां कक्ष्याकर्णः चतुर्लक्षा एकोनषष्टिसहस्राणि

पञ्चशतानि पञ्चाशीत्यधिकानि । ४५,९५,५८५ । योजनानि । शुक्रशीघ्रोच्चकक्ष्याकर्णो लक्षद्वयं द्व्यशीतिसहस्राणि सप्तशतानि षड्विंशत्यधिकानि च । २,८२,७२६ । योजनानि । बुधशीघ्रकक्ष्याकर्ण एकलक्षो दशसहस्राणि षट्छतान्यष्टाशीत्यधिकानि च । १,१०,६८८ । योजनानि । चन्द्रकक्ष्याकर्णः चतुस्त्रिंशत्सहस्राणि त्रीणि शतानि सप्तसप्तत्यधिकानि च । ३४,३७७ । योजनानि ।

एतानि चन्द्रकक्ष्यायोजनानि भूव्यासार्धयोजनैः पञ्चविंशत्यधिकषट्छतैः । ६२५ । ऊनितानि भूमेरुपरि चन्द्रोच्छ्रययोजनानि । तावदुच्छ्रयः स्वकक्ष्यायामेव सदा चन्द्रः परिभ्रमतीति तज्ज्ञैर्विज्ञेयम् । इत्थमेव बुधशुक्रार्कभौमचन्द्रोच्चबृहस्पतिराहुशनैश्चरनक्षत्राकाशकर्णा भूव्यासार्धेनोनिता भूमेरुपरि स्वोच्छ्रयाः । पृथक् पृथक् तस्मात् तत्र तत्र स्वस्वकक्ष्यायामेव सदा बुधशुक्रार्कभौमचन्द्रोच्चबृहस्पतिराहुशनैश्चरनक्षत्राणि परिभ्रमन्तीति ज्ञातव्यम् । स्वस्वकर्णा द्विगुणिताः स्वस्वकक्ष्याव्यासा भवन्ति । त्रिगुणिताः सिद्धान्ते कक्षाव्यासार्धाः स्वल्पाधिकाः स्युः ॥ ३ ॥

[रविचन्द्रयोः भूमध्यान्तरम्]

४५९५८५
विषयनागशराङ्कशराब्धयो
दिनकृतः खलु योजनजा श्रुतिः ।
३४३७७
तुरगशैलहुताशकृताग्नयः
शशधरस्य कुमध्यतदन्तरम् ॥[1] ४ ॥

निजमृदुश्रवणेन हते श्रुती
३४३८
त्रिभगुणेन हते भवतः स्फुटे ।
श्रवणमध्यमभुक्तिहतोऽथवा[2]
निजनिजस्फुटभोगविभाजितः ॥ ५ ॥

मूलम्— 1. M_1. M_2. M_3. °नभोन्तरम्
2. A_2. B_1. Be. Bo_1. Bo_2 Bo_2. Bod. S_2. V_3. वधोथवा

[भूच्छाया]

३१५ 1
तिथिगुणं शशियोजनमण्डलं
४४१०
दिनकृतो गगनेन्दुकृताब्धयः ।
2 ५
दिनकृतः श्रवणः शरसङ्गुणो
१६
नृपहृतो भवतीह महीप्रभा ॥ ६ ॥ 3

प्रागुक्तप्रकारेणार्केन्दुकर्णाविव । पुनरत्र भूमध्यादर्कस्य चन्द्रस्य चान्तर[कला]योजनानि । रवेः ४,५९,५८५ । विधोः ३४,३७७ । एतौ पर्वणि सूर्येन्दुमन्दगुणकौ मृदुकर्णनिघ्नावित्यादिपाठानीतस्वमन्दस्फुटकर्णगुणितौ त्रिज्यया भक्तौ लब्धं स्फुटयोजनकर्णौ भवतः । अथवा पठितयोजनकर्णौ स्वस्वमध्यभुक्तिगुणितौ स्फुटभुक्तिभक्तौ स्वस्वस्फुटयोजनकर्णौ भवतः ।

चन्द्रमण्डलस्य विस्तारयोजनानि त्रीणि शतानि पञ्चदशाधिकानि । ३१५ । सूर्यमण्डलविस्तारश्चत्वारि सहस्राणि चत्वारि शतानि दशाधिकानि योजनानि । ४४१० । भूव्यासः पञ्चाशदधिकसहस्रम् । १०५० । रविमण्डलभूव्यासयोरन्तरं त्रीणि सहस्राणि षष्ट्यधिकानि त्रीणि शतानि च । ३३६० । एतद् दशाधिकशतद्वयेन । २१० । भक्तं लब्धं षोडश । १६ । भागहारः स्यात् । भूव्यासोऽपि दशाधिकशतद्वयेन भक्तो लब्धं पञ्च । ५ । गुणकः स्यात् । तस्मात् सूर्यस्फुटयोजनकर्णः पञ्चभिर्गुणितः षोडशाप्तो लब्धं रविकक्ष्यायां तत्तुल्यस्फुटयोजनकर्णो भवति ॥ ४-६ ॥

स्फुटशशिश्रवणेन विवर्जिता
१०५०
गगनपञ्चककुब्गुणिता कुभा । 4
अपहृता च तया प्रभया भुवो
भवति योजनबिम्बमगोः फलम् ॥ ७ ॥

मूलम्—1. M1. M2. M3. तिथिगुणं ; others have नखगुणं
2. B. Be. Bo2. Bod. D. V1. V3. दिनकरश्रवणः ; Bo2. V2. दिनकरः श्रवणः
3. S2. omits verse 6. A1. S1. omits verse 6 and the commentary.
4. Bod, D. गुणितार्कभा

प्रागानीतरविकक्ष्यायां भूप्रभाव्यासं चन्द्रकक्ष्यायामानयेत्। कथमित्युक्ते—भूप्रभाकर्णयोजनेषु चन्द्रस्फुटकर्णयोजनानि त्यक्त्वा शेषं भूव्यासेन । १०५० । हत्वा पूर्वानीत[भू]प्रभाकर्णेन विभजेत्। लब्धं भूप्रभामण्डलयोजनानि स्युः। [तमोऽनु]रिति वचनात् तान्येव तमोमण्डलयोजनानि भवन्ति। इत्येतानि मण्डलयोजनानि स्वविम्बकलाः कर्तव्याः। यतः स्वकर्णयोजनानां त्रिज्यातुल्यकलाश्चेत् स्वमण्डलतुल्ययोजनानामपि तत्तुल्यकलाः। चन्द्रार्कयोः स्फुटकर्णाभ्यां कलाः। एतदेवाग्रे वक्ष्यते।

[1]
त्रिभगुणेन हतानि रविश्रुति-
स्मरसुहृच्छ्रवणोपहृतान्यतः।
फलधनूंषि वपूंषि फलानि वा
हिमगु-तिग्ममयूख-शशिद्विषाम् ॥ ८ ॥

चन्द्रमण्डलयोजनानि। ३१५। त्रिज्यया हत्वा चन्द्रस्फुटकर्णयोजनैर्विभजेत्। लब्धं चन्द्रविम्बकलाज्या। लब्धज्या तद्धनुषस्तुल्यत्वाद् धनूंषि फलानि वा विम्बानीत्युक्तम् ॥ ८ ॥[1]

११ २७२
शिवहता द्विभहृच्छशिनो गति-
२०
स्तनुकलाः स्युरिनस्य नखोद्धृताः।
८ २५
गुणितयोर्भुजगैः शरलोचनैः
६०
खरसहृद् विवरं तमसोऽथवा ॥ ९ ॥

अथवा स्फुटभुक्तिरेकादशगुणिता द्विसप्तत्यधिकशतद्वयेन । २७२ । भक्ता लब्धं चन्द्रविम्बकलाः स्युः अथार्कभुक्तिरप्येकादशगुणिता विंशत्याप्ता लब्धमर्कविम्बकला भवन्ति। चन्द्रभुक्तिरष्टगुणिता रविभुक्तिः पञ्चविंशतिगुणिता पृथक् पृथक् षष्ट्याप्तकलयोरन्तरं छायाबिम्बकलाः स्युः ॥ ९ ॥

मूलम्—1. A_2. B. Bo_1. Bo_2. Be. Bod. M_1. M_2. M_3. S_1. V_1. V_2. V_3. निजश्रुति। This reading is letter. —*KSS.*

व्याख्या—1. The commentary does not appear to be complete.

तिमिरमावरणं हिमदीधिते-
र्दिनकरस्य निशाकरमण्डलम् ।
भवति मण्डलखण्डयुति[1]स्तयो-
स्तदभिधावरणावरणीययोः ॥ १० ॥

चन्द्रस्य ग्राहिका भूच्छायैव । सूर्यस्य ग्राहकश्चन्द्र एव । सोमग्रहणे चन्द्रबिम्बभूच्छायामण्डलयोर्योगार्धं ग्राह्यग्राहकमानैक्यार्धं स्यात् । सूर्यग्रहणे अर्कबिम्बचन्द्रबिम्बयोर्योगार्धं ग्राह्यग्राहकमानैक्यार्धं स्यात् ॥ १० ॥

रविसमानकलस्य कलावतो
वितमसो गुणितां भुजशिञ्जिनीम् ।
१५ १९१
तिथिभिरिन्दुनवेन्दुभिर्हरेद्
व्यगुनिशाकरगोलवशाच्छरः ॥ ११ ॥

पातोनचन्द्रदोर्ज्या परमविक्षेपगुणिता, त्रिज्याप्ता लब्धमिन्दुविक्षेपो भवत्येव । तस्मात् परमविक्षेपः सप्तत्यधिकशतद्वयमष्टा[दशाप्तं], फलं पञ्चदश । १५ । गुणकः स्यात् । त्रिज्याप्यष्टादशाप्ता लब्धमेकनवत्यधिकं शतम् । १९१ । इदं भागहारः स्यात् । पौर्णमास्यन्तचन्द्रात् पातं संशोध्य दिग् ज्ञात्वा तद्भुजज्या पञ्चदशगुणिता एकनवत्यधिकशतेनाप्ता लब्धं कलादिको मध्यग्रहणकालिको विक्षेपः स्यात् ॥ ११ ॥

च्युतशरावरणावरणीययो-
र्दलयुतिः स्थगितस्य मितिर्भवेत् ।
समधिकावरणीयतनोर्यदा
सकलमेव तदावृतमादिशेत् ॥ १२ ॥

मानैक्यार्धान्मध्यग्रहणकालिकविक्षेपं शोधयेत् । तच्छेषश्छन्नलिप्ता भवन्ति । तच्छन्नं यस्मिन् पर्वणि ग्राह्यबिम्बादधिकं चेत् तत्पर्वणि ग्रहणं सर्वग्रासीत्येवं वदेत् । तच्छन्नं ग्राह्यबिम्बादल्पं चेत् तत् खण्डग्रहणमिति वदेत् । मानैक्यार्धाद् विक्षेपेऽधिके सति तत्र ग्रहणं न स्यात् ॥ १२ ॥

मूलम्— 1. M_1, M_2, M_3. °युत°

विवरमावरणावरणीययो-
रपनयेदथवा दलितं शरात्।
तदवशेषमितिः प्रकटा भवे-
द्यदि न शेषमशेषतनुर्ग्रहः ॥ १३ ॥

ग्राह्यग्राहकयोरन्तरार्धं मध्यग्रहणकालिकविक्षेपाच्छोधयेत् । तच्छेषं तावदच्छन्नं ग्राह्यमण्डले शुक्लखण्डं स्यात् । तच्छेषं नास्ति चेत् तद्ग्रहणं सर्वग्रहणं सर्वग्रास्येव स्यात् । मानयोरन्तरार्धाद् विक्षेपेऽल्पे चेत् तदा विमर्दोऽप्यस्तीति । एवं ग्राह्यस्य शुक्लशेषकलामानेन ग्रहणं वदेत् ॥ १३ ॥

दलितमावरणं युतमूनितं
पृथगथावरणीयदलेन च ।
स्वगुणितं शरवर्गविवर्जितं
६०
कृतपदं गगनाङ्गहतं हरेत् ॥ १४ ॥

गतिवियोगकलाभिरतो भवेत्
स्थितिदलं घटिकादि समर्दलम् ।

सार्धवृत्तेन स्थित्यर्धं विमर्दार्धमप्यानयेत् । तत् कथमित्युक्ते—ग्राहकबिम्बार्धं ग्राह्यबिम्बार्धसंयुक्तं, तद्वर्गाद् विक्षेपवर्णं त्यक्त्वा मूलं षष्टिगुणितं रवीन्दुभुक्त्यन्तरकलाभिराप्तं, लब्धं घटिका[दिकं]स्थित्यर्धं स्यात् ।

तथा ग्राह्यग्राहकबिम्बार्धयोरन्तरवर्गाद् विक्षेपवर्गं त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तरकलाभिराप्तं घटिकादिकं विमर्दार्धं स्यात् ।

इत्थमेव सूर्यग्रहणे लम्बनशुद्धपर्वान्तनतिसंस्कृतस्फुटविक्षेपवर्गं मानैक्यार्धवर्गान्मानार्धान्तरवर्गाच्च त्यक्त्वा मूले षष्टिघ्ने भुक्त्यन्तरकलाभिराप्ते क्रमात् स्थित्यर्धं विमर्दार्धं च स्यात् ।

विक्षेपाभावे विमर्दार्धं रवेर्ग्रहे पादघटिकामात्रम् । एतदेव रविबिम्बेऽधिके तदा कङ्कणग्रहणं स्यात् ।

ग्रहयुद्धे भेदे सति योगकालिकं विम्बान्तरं विक्षेपे परिकल्प्य स्वमानार्धयोगान्तराभ्यां प्रागुक्तप्रकारेण समदिग्गत्योरन्तरेण भिन्नदिग्गत्योर्योगेन भक्त्वा स्थित्यर्धं विमर्दार्धं चानयेत् ॥ १४-१५ ॥

रविशशाङ्कतमोगतिसङ्गुणं
६०
खरसहृत् स्वफलानि पृथक् पृथक् ॥ १५ ॥

रविशशाङ्कफले समलिप्तयोः
क्षयधने भवतः प्रथमान्त्ययोः ।
धनमृणं तमसः स्वफलं कलाः
स्थितिविमर्ददलादसकृत् ततः ॥ १६ ॥

सार्धवृत्तेन स्थित्यर्धं विमर्दार्धं च स्फुटं कुर्यात् । तत् कथमित्युक्ते— रवीन्दुराहुभुक्तयः स्थित्यर्धगुणिताः षष्ट्याप्ता लब्धं कलादिकं स्वकीयं समलिप्तार्केन्द्वोः शोध्यम् , राहौ योज्यम् । ततः प्राग्वद् विक्षेपमानीय तद्वर्गं मानैक्यार्धवर्गात् त्यक्त्वा तन्मूलात् स्थित्यर्धमानीय तेनार्केन्दुराहुभुक्तयो गुणिताः षष्ट्याप्ताः फलं कलादिकं स्वकीयं समलिप्तार्केन्द्वोः शोध्यम् । राहौ योज्यम् । तथा प्राग्वद् विक्षेपमानीय तद्वर्गं मानैक्यार्धवर्गात् त्यक्त्वा तन्मूलात् स्थित्यर्धमानयेत् । तत् स्पर्शकालस्फुटस्थित्यर्धं स्यात् ।

ततो रवीन्दुराहुभुक्तयो विमर्दार्धगुणिताः षष्ट्याप्ताः, स्वफलं कलादिकं समलिप्तार्केन्द्वोः शोध्यम् । राहौ योज्यम् । तदा विक्षेपमानीय तेन विमर्दार्धमप्यसकृत्कर्मणा स्वपूर्वतुल्यमानयेत् । तन्निमीलनकालिकस्फुटविमर्दार्धं स्यात् ।

स्फुटस्थित्यर्धकालिकरविचन्द्रराहवः स्पर्शकालिकाः स्युः । स्फुटविमर्दार्धकालिका निमीलनकालिकाः स्युः ।

ततः स्थित्यर्धेन विमर्दार्धेन प्राग्वत् क्रमात् रवीन्दुराहुभुक्तयो गुणिताः षष्ट्याप्ताः, स्वफलं कलादिकं समलिप्तार्केन्द्वोर्योज्यम् । राहौ शोध्यम् ।

तात्कालिकविक्षेपेण प्राग्वत् स्थित्यर्धं विमर्दार्धमप्यानीय भूयोऽसकृत्कर्मणा स्वपूर्वतुल्यं स्थित्यर्धं विमर्दार्धमप्यानयेत् ।

इत्थं स्फुटमोक्षस्थित्यर्धं स्फुटोन्मीलनविमर्दार्धं च तत्काले रविचन्द्रराहवश्च भवन्ति ॥ १६ ॥

तिथ्यन्तं स्थितिदलवर्जितं युतं च
प्राग्ग्रासं क्रमश उशन्ति मोक्षकालम्[1] ।
संयोगं स्थितिदलयोः स्थितेश्चकालं
मर्दार्धद्वययुतिमिन्द्वदर्शनस्य ॥ १७ ॥

मध्यग्रासः स्यात् तिथेश्चावसाने
मर्दार्धेनान्त्येन युक्तः स उक्तः[2] ।
कालस्तज्ज्ञैर्नूनमुन्मीलनस्य
हीनश्चाद्येनेन्दुसम्मीलनस्य[3] ॥ १८ ॥

पर्वान्तः स्पर्शस्थित्यर्धेनोनितः स्पर्शपर्व स्यात् । स्थित्यर्धयुक्तो मोक्षपर्व स्यात् । स्पर्शस्थित्यर्धमोक्षस्थित्यर्धयोः संयोगो ग्रहणकालः स्यात् । निमीलनविमर्दार्धोन्मीलनविमर्दार्धयोः संयोगो विमर्दकालः स्यात् । पर्वान्तो मध्यग्रहणकालः स्यात् । असौ निमीलनविमर्दार्धेनोनं निमीलनपर्व स्यात् । उन्मीलनविमर्दार्धयुक्तमुन्मीलनपर्व स्यात् ॥ १७ ॥ १८ ॥

इष्टोनितस्थितिदलेन वियोगलिप्ता-
भुक्त्योर्हता गगनषट्कहृता भुजः स्यात् ।
तात्कालिकोडुपशरं कथयन्ति कोटिं
दोःकोटिवर्गयुतिमूलमभीष्टकर्णः ॥ १९ ॥

ग्रहणस्पर्शादनन्तरमेकघटिकाकाले घटिकाद्वये त्रये वा कियद्ग्रस्तमित्याकाङ्क्षायां स्वेष्टघटिकादिकं स्पर्शस्थित्यर्धात् त्यक्त्वा तच्छेषेण रवीन्दुभुक्त्योरन्तरकलां हृत्वा षष्टचा विभजेत् । लब्धं कलादिकं भुजः स्यात् । तत्कालचन्द्रविक्षेपः कोटिः स्यात् । तद्भुजकोटिवर्गयोर्योगान्मूलमिष्टकर्णः स्यात् ।

मूलम्—1. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_1. V_2. V_3. मुक्तिकालम्
2. M_1. M_2. M_3. मुक्तः
3. M_1. M_2. M_3. भिन्नश्चा°

मध्यग्रहणकालात् परतो मोक्षस्थित्यर्धादिष्टकालघटिकोनितशेषः स्वेष्टः कल्पनीयः। तमेव मोक्षस्थित्यर्धात् संशोध्य तच्छेषेण भुक्त्यन्तरं हृत्वा षष्ट्या विभजेत्। लब्धं भुजः स्यात्।

अथवा मध्यग्रहणकालात् परतः स्वेष्टघटिकाभिरेव भुक्त्यन्तरं हृत्वा षष्ट्या विभजेत्। लब्धं कलादिको भुजः स्यात्। तात्कालिकेन्दुविक्षेपः कोटिः। तद्भुजकोटिवर्गयोर्योगान्मूलं स्वेष्टकर्णः स्यात् ॥ १९ ॥

एवं विमर्दार्धहते च गत्योः
स्यादन्तरे दोः स्वशरश्च कोटिः।
निमीलनोन्मीलनकर्णसिद्ध्यै
ग्रासस्तु मानैक्यदलं विकर्णम् ॥ २० ॥

निमीलनोन्मीलनघटीभिः पृथक् पृथग् भुक्त्यन्तरलिप्ता हृत्वा षष्ट्या विभजेत्। लब्धं तत्कालभुजः स्यात्। तात्कालिकेन्दुविक्षेपः कोटिः स्यात्। तद्वर्गयोगान्मूलं स्वकीयनिमीलनोन्मीलनकालिकः कर्णः स्यात्। तमेव मानैक्यार्धात् त्यजेत्। तच्छेषो ग्रासः स्यात्।

स्वेष्टकर्णं मानैक्यार्धात् त्यजेत्। तच्छेषः स्वेष्टकालिकग्रासः स्यात्।

स्पर्शमोक्षकालिककर्णौ मानैक्यार्धतुल्यावेव स्याताम् ॥ २० ॥

वीष्टग्रासे[1] मानयोरर्धयोगे
स्वघ्ने मूलं क्षेपवर्गोनितं यत्।
तत् षष्टिघ्नं भुक्तिविश्लेषभक्तं
स्वस्थित्यर्धाच्छुद्धमिष्टस्तु कालः ॥ २१ ॥

स्पर्शाद्यातो ग्राह्यमानस्य खण्डे
दृष्टे शेषे मुच्यमानस्य शेषः।
तत्कालेन्दोः क्षेपमानीय सम्यक्
कुर्यात् तावत् कर्म यावत् स्थिरं स्यात् ॥२२॥

मूलम्— 1. M_1. M_2. M_3. इष्टग्रासे मानयोगार्धयोगे।

प्रागिष्टकालाद् ग्रासः प्रोक्तः। इदानीमिष्टग्रासात् कालज्ञानं कथ्यते। ग्राह्यमानस्य स्वेष्टग्रासे मुच्यमानस्य स्वेष्टग्रासे वा क्रमाद् घटिकानयनार्थं स्वेष्टग्रासकला मानैक्यार्धकलाभ्यः शोध्याः। तच्छेषः स्वेष्टकर्णः स्यात्। तद्वर्गान्मिध्यविक्षेपवर्गं त्यक्त्वा तन्मूलं षष्टिघ्नं भुक्त्यन्तरलिप्ताभिराप्तं, लब्धं घटिकादिकं स्पर्शस्थित्यर्धाच्छोध्यम्। तच्छेषघटिकादिकं स्पर्शकालात् परतः स्वेष्टग्रासस्य कालः स्यात्।

मध्यग्रहणात् परतश्चेल्लब्धघटिकादिकं मोक्षस्थित्यर्धाच्छोध्यम्। तच्छेषघटिकादिकं मुच्यमानग्रहणे शेषलिप्तानां मोक्षलिप्ताकालः स्यात्।

सकृत्कर्मणा स्वेष्टकालात् फलैरूनाधिकः स्यात्। तस्मात् तात्कालिकमिन्दुविक्षेपमानीय ततः प्राग्वदिष्टग्रासं मानैक्यार्धात् संशोध्य तच्छेषस्य वर्गात् तात्कालिकविक्षेपवर्गं त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तराप्तं स्वेष्टस्थित्यर्धात् संशोध्यम्। तच्छेषः स्वेष्टकालः स्यात्।

इत्यसकृत्कर्मणा स्वेष्टग्रासकालः पूर्वतुल्यस्फुटकालः स्थिरः साध्यः। इत्थं गतस्थिरस्वेष्टग्रासयोर्भुक्तभोग्यघटिकाः स्फुटा भवन्ति ॥ २१-२२ ॥

स्पर्शादिकालजनतोत्क्रमशिञ्जिनीभिः
क्षुण्णाक्षभा पलभवश्रवणेन भक्ता।
चापानि पूर्वनतपश्चिमयोः फलानि
सौम्येतराणि समवेहि पृथक् क्रमेण ॥ २३ ॥

अहर्दलाद्रात्रिदलावसानं
[1]यावत् कपालं कथयन्ति पूर्वम्।
ततो दिनार्धान्तमपूर्वमिन्दो-
र्भानोर्भवेतां ग्रहणेऽन्यथा ते ॥ २४ ॥

स्पर्शमध्यमोक्षकालिकेषु चन्द्रद्युगतदिनार्धान्तरघटिका क्रमेण स्पर्शमध्यमोक्षकालिकेषु नता भवन्ति। तथार्कग्रहणेऽपि रविद्युगतदिनार्धान्तरनताः स्युः। तद्वत् स्पर्शमध्यमोक्षकालनताः स्युः। तासामुत्क्रमेण जीवा आनेयाः।

मूलम्— 1. Bo. om. यावत् to ते two lines below.

ताभिर्गुणिता विषुवच्छाया पृथक् पृथग् विषुवत्कर्णेन भक्ता लब्धं जीवाः स्युः । तद्धनूंषि प्राक् कपालं चेदुत्तराणि, प्रत्यक् कपालं चेद् दक्षिणानि ज्ञातव्यानि ।

तन्नतं पञ्चदशभ्योऽधिकं चेत् त्रिंशतः शोध्यम् । तच्छेषासूनामेवोत्क्रमेण जीवा कर्तव्या ।

पौर्णमास्यां मध्याह्नान्मध्यरात्रिपर्यन्तं सोमग्रहणे पूर्वकपालं स्यात् । मध्यरात्रात् परतो मध्याह्नपर्यन्तमपरकपालं स्यात् । सूर्यग्रहणेऽमावास्यायां मध्याह्नान्मध्यरात्रिपर्यन्तमपरकपालं स्यात् । मध्यरात्रान्मध्याह्नपर्यन्तं पूर्वकपालं स्यात् ॥ २३-२४ ॥

[1]ग्राह्यात् सराशित्रितयाद् भुजज्या
व्यस्ता ततः प्राग्वदपक्रमज्या ।
तस्या धनुः सत्रिगृहेन्दुदिक् स्यात्
क्षेपो विपातस्य विधोर्दिशि स्यात् ॥ २५ ॥

अपक्रमक्षेपपलोद्भवानां
युतिः क्रमादेकदिशां कलानाम् ।
[2]कार्या वियोगोऽन्यदिशां ततो ज्या
ग्राह्या भवेत् सा वलनस्य जीवा ॥ २६ ॥

स्पर्शमध्यमोक्षकालिकस्य चन्द्रस्य राशित्रितययुक्तस्यायनांशसंस्कृतस्य दिग् ज्ञात्वा तद्बाहोरुत्क्रमेण जीवा कार्या । सा परमक्रान्तिज्यया गुणिता त्रिज्याप्ता क्रान्तिज्या स्यात् । तद्धनुः क्रान्तिकलाः स्युः । तत्क्रान्तेस्त्रिभसंयुक्तेन्दुदिक् स्यात् । क्रान्तिकला एवायनकलिका इत्यत्रोच्यते ।

स्पर्शमध्यमोक्षकालिकाच्चन्द्राद्राहुं त्यक्त्वा दिशं ज्ञात्वा तद्बाहोः क्रमजीवामानीय तां पञ्चगुणितामेकनवत्यधिकशतेन विभजेत् । लब्धं क्रमात् स्पर्शमध्यमोक्षकालिका विक्षेपलिप्तिकाः स्युः ।

स्पर्शमध्यमोक्षकालेषु पूर्वापरकपालयोः पूर्वोक्ताक्षलिप्तानां क्रान्तिकलानां क्षेपलिप्तानां दिगैक्ये योगः, भिन्नदिक्त्वेऽन्तरम् । तद्दिग् ज्ञात्वा तस्य क्रमजीवा कार्या । सा वलनज्या स्यात् ॥ २५-२६ ॥

मूलम्— 1. Bo_2. om. this line.
2. B. Be, Bo_1. Bo_2. Bod. D. V_3. कार्यो

अङ्गुलानि वलनस्य च जीवा[1]
११० ३४३८
खेश्वरैर्वसुगुणाब्धिहुताशाः[2] ।
उन्नतो निजदिनार्धविभक्तः
सार्धयुग्मयुगथाङ्गुललिप्ताः ॥ २७ ॥

स्पर्शमध्यमोक्षकालिकवलनज्या त्रिज्या च पृथक् पृथग् दशाधिकशतेन । ११० । भक्ता लब्धानि यवोदराष्टकपरिमाणकलिप्ताङ्गुलानि भवन्ति । त्रिज्याङ्गुलान्येकत्रिंशदिति । ३१ । परिलेखनार्थम् ।

उन्नतघटिकाः स्वदिनार्धेन भक्ता लब्धं लिप्तादिकं स्यात् । सार्धलिप्ताद्वयं ध्रुवम् । २ । ३० । तद्ध्रुवयुक्तैकस्याङ्गुलस्य मानलिप्ताः । तस्मादङ्गुललिप्ता इत्युच्यन्ते । उदायस्तमये वा मध्यग्रहणकालो यदा तदा ध्रुवलिप्ता एकाङ्गुललिप्ताः स्युः ॥ २७ ॥

मानैक्यार्धं ग्राहकच्छाद्ययोश्च
क्षेपश्छन्नं कर्णदोःकोटयश्च ।
भाज्याः सर्वेऽप्यङ्गुलानां कलाभि-
र्जायन्ते ते वाङ्गुलानि क्रमेण ॥ २८ ॥

ग्राह्यबिम्बग्राहकबिम्बमानैक्यार्धं स्पर्शमध्यमोक्षकालिकविक्षेपच्छन्नलिप्तिकाः स्वेष्टग्रासलिप्तिका भुजकोटिकर्णलिप्तिकाश्च क्रमेणाङ्गुललिप्ताभिर्भाज्याः । लब्धं तेषां ग्राह्यबिम्बादीनामङ्गुलानि स्युः ॥ २८ ॥

पूर्वाशायां ग्रग्रहः शीतरश्मेः
पश्चान्मोक्षस्तिग्मगोरन्यथा तौ ।
क्षेपाः सर्वे व्यत्ययेन स्युरिन्दो-
र्यद्वद् भानोरागतास्तद्वदेव ॥ २९ ॥

मूलम् — 1. M_1. M_2. M_3. वलनत्रिभजीवा

2. A better reading is :

अङ्गुलानि वलनत्रिभजीवा खेश्वरैर्वसुयवानि हृता स्युः ।

The commentator seems to have used this reading. *KSS.*

सोमग्रहणे चन्द्रस्य प्राच्यां स्पर्शः, प्रतीच्यां मोक्षः स्यात् । तत् कथमित्युक्ते—चन्द्रस्य शीघ्रगतित्वात् प्राच्यां स्थिता भूच्छाया प्राग्गतेरिन्दोर्मण्डलपूर्वभागं प्रविशति, प्रतिगच्छति । ततश्चन्द्रमण्डलापरभाग एव भूच्छाया निर्गच्छति । सूर्यग्रहणे प्रतीच्यां स्पर्शः, प्राच्यां मोक्षः स्यात् । कथमित्युक्ते—स्वयं शीघ्रगतिरिन्दुः प्राच्यां स्थितादर्कादधः प्रविशन् प्रत्यग्भागमाच्छादयति । ततो निर्गमसमये पूर्वभागे निर्गच्छति ।

ग्रहणद्वये परिलेखनार्थं समभूमौ त्रिज्याङ्गुलैर्लिखितवृत्ते वलनाङ्गुलैः साधितपूर्वापररेखायां सोमग्रहणस्पर्शमध्यमोक्षकालिका विक्षेपा व्यत्ययेन प्रसार्याः । सूर्यग्रहणे स्वदिशैव प्रसार्या ॥ २९ ॥

ग्राह्यं वृत्तं मानयोगार्धवृत्तं
त्रिज्यावृत्तं चालिखेत् साधिताशम् ।
त्रिज्यावृत्ते शीतगोः पूर्वभागे
ज्यावद् दद्याद् वालनान्यङ्गुलानि ॥ ३० ॥

पश्चाद्भागे तिग्मगोश्चन्द्रभान्वोः
पश्चाद् व्यस्तान्यन्तजान्यादिजानि ।
याम्यात् सौम्यान् मध्यमानि प्रदेशा-
दन्यैकाशान्यानयेत् प्राक्प्रतीच्योः ॥ ३१ ॥

क्षेपं ज्ञात्वा तिग्मगोरन्यथेन्दो-
स्तेभ्यः सूत्राण्यानयेत् केन्द्रभाञ्जि ।

सार्धवृत्तद्वयेनानेन वृत्तत्रयं विलिख्य ततस्त्रिज्यावृत्ते वलनाङ्गुलानि प्रसार्याणि । कथमित्युक्ते—समभूमौ साधितदिङ्मध्ये बिन्दुं दत्वा तन्मध्यं कृत्वा ग्राह्यबिम्बाङ्गुलार्धप्रमाणसूत्रेण वृत्तं विलिखेत् । तद् ग्राह्यमण्डलं स्यात् । ततस्तन्मध्यबिन्दुतो मानैक्यार्धाङ्गुलप्रमाणसूत्रेण वृत्तं द्वितीयं विलिखेत् । तत् समासवृत्तं स्यात् । भूयोऽपि तन्मध्यबिन्दुमेव मध्यं कृत्वा एकत्रिंशदङ्गुलप्रमाणसूत्रेण वृत्तं तृतीयं विलिखेत् । तत् त्रिज्यावृत्तं स्यात् ।

स्पर्शमोक्षकालिकवलनाङ्गुलानि पृथक् पृथग् वर्गीकृत्यैकषष्ट्यधिकशतनवकात् । ९६१ । त्यक्त्वा तन्मूलं तलशङ्कुः स्यात् इति । स्पर्शमोक्षकालिकतलशङ्कुं दिङ्मध्यबिन्दुतः सोमग्रहणे क्रमात् पूर्वापरयोः प्रसार्य

तदग्रयोर्बिन्दू दद्यात् । सूर्यग्रहणे स्पर्शकालिकतलशङ्कुं दिङ्मध्यात् प्रत्यक् प्रसार्य मौक्षिकतलशकुं प्राक् प्रसार्य तदग्रयोर्बिन्दू दद्याद् ।

प्राक्प्रसारिततलशङ्क्वग्रबिन्दुतः स्पार्शिकवलनाङ्गुलानि स्वदिशि प्रसार्य त्रिज्यावृत्तपूर्वभागपरिधौ विन्यस्य तदग्रे बिन्दुं दद्यात् । तथार्कग्रहणे तलशङ्क्वग्रबिन्दुतो मौक्षिकवलनाङ्गुलानि स्वदिशि प्रसार्य त्रिज्यावृत्ते प्राग्-भागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् । ततो दिङ्मध्यबिन्दुतः प्रत्यक्प्रसारित-तलशङ्क्वग्रबिन्दुतोऽर्कग्रहणे स्पार्शिकवलनाङ्गुलानि, सोमग्रहणे मौक्षिक-वलनाङ्गुलानि व्यस्तदिशि प्रसार्य त्रिज्यावृत्तपश्चिमभागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् ।

मध्यकालिकवलनाङ्गुलवर्गं प्राग्वदेवैकषष्टयधिकनवशतात् । ९६१ । त्यक्त्वा मूलं मध्यकालिकतलशङ्कुः स्यात् । तं सूर्यग्रहणे, (मध्यग्रहणे?) मध्य[ग्रहण]कालिकविक्षेपे सौम्ये सति, दिङ्मध्यादुदक् प्रसार्य तदग्रे बिन्दुं दद्यात् । मध्य[ग्रहण]कालिकविक्षेपे दक्षिणे सति [तलशङ्कुं] दिङ्मध्यादर्वाक् प्रसार्य तदग्रे बिन्दुं दद्यात् ।

सोमग्रहणे तु विक्षेपप्रसारणं व्यस्तदिगेव । तस्मान्मध्य[ग्रहण]-कालिकतलशङ्कुं गणितागतमध्यविक्षेपे दक्षिणे सति दिङ्मध्यादुदक् प्रसार्य तदग्रे बिन्दुं दद्यात् । तदुत्तरविक्षेपे सति तत्तलशङ्कुं दिङ्मध्यादर्वाक् प्रसार्य तदग्रे बिन्दुं दद्यात् ।

इत्थं दिङ्मध्याद् दक्षिणोत्तररेखायां प्रसारिततलशङ्क्वग्रबिन्दुतो-ऽर्कग्रहणे विक्षेपवलनयोर्भिन्नदिक्त्वे मध्यकालिकवलनाङ्गुलानि प्राक् प्रसार्य त्रिज्यावृत्तपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् । विक्षेपवलनयोरेकदिक्त्वे मध्य-वलनाङ्गुलानि तत्तलशङ्क्वग्रबिन्दुतः प्रत्यक् प्रसार्य त्रिज्यावृत्तपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् ।

सोमग्रहणे तु गणितागतमध्यविक्षेपवलनयोर्दिगैक्ये तत्तलशङ्क्वग्र-बिन्दुतो मध्यवलनाङ्गुलानि प्राक् प्रसार्य त्रिज्यावृत्तपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् । तद्विक्षेपवलनयोर्भिन्नदिक्त्वे तत्तलशङ्क्वग्रबिन्दुतो मध्यवलनाङ्गु-लानि प्रत्यक् प्रसार्य त्रिज्यावृत्तपरिधौ विन्यस्याग्रे बिन्दुं दद्यात् ।

इत्थं स्पर्शमोक्षकालिकवलनानि त्रिज्यावृत्तपूर्वापरभागपरिधावेव, मध्यवलनानि त्रिज्यावृत्तदक्षिणोत्तरभागपरिधावेव, विन्यस्य तत्स्पर्शमोक्षमध्य-वलनाग्रबिन्दुभ्यो दिङ्मध्यबिन्दुसंस्पृष्टानि सूत्राणि प्रसार्याणि ।

तत्स्पर्शमोक्षवलनाग्रबिन्दुद्वयाद् दिङ्मध्यबिन्दुसंलग्नं सूत्रं ग्राह्यमार्गः स्यात्। असावेव ग्रहणे साधितपूर्वापररेखा स्यात्। मध्यवलनाग्रबिन्दुतो दिङ्मध्यबिन्दुसंलग्नसूत्रं दक्षिणोत्तररेखा स्यात्। सा पूर्वापररेखा दक्षिणोत्तररेखा च समासवृत्ते ग्राह्यमण्डले यत्र यत्र संस्पृष्टा तत्र तत्र बिन्दवो दातव्याः ॥ ३०-३१ ॥

आद्यादन्त्यात् सूत्रमानैक्ययोगा-
ज्ज्यावत् क्षेपौ सारयेदाद्यमोक्षौ ॥ ३२ ॥

मध्यक्षेपं मध्यतो मध्यसूत्रे
क्षेपाग्रेभ्यो ग्राहकार्धेन तेभ्यः।
विज्ञायन्ते खण्डिते तु क्रमेण
ग्राह्ये स्पर्शो मध्यमग्रासमोक्षौ ॥ ३३ ॥

ग्राह्यमण्डले स्पर्शस्थानमध्यग्रासमोक्षस्थानानि परिलिख्य सुव्यक्तानि जानीयात्। कथमित्युक्ते—स्पर्शमोक्षविक्षेपाङ्गुलवर्गौ पृथक् पृथङ् मानैक्यार्धाङ्गुलवर्गात् त्यक्त्वा मूलं समासवृत्ते स्पर्शमोक्षकालिकतलशङ्कुः स्यात्। तद्दिङ्मध्यात् स्पर्शमोक्षयोः पूर्वापररेखायां प्रसार्य तदग्रयोर्बिन्दू दद्यात्।

तद्बिन्दुतः सोमग्रहणे स्पर्शविक्षेपाङ्गुलानि व्यस्तदिशि प्रसार्य समासवृत्तपूर्वभागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात्। ततो मोक्षविक्षेपाङ्गुलानि प्रत्यक्प्रसारिततलशङ्क्वग्रबिन्दुतो व्यस्तदिशि प्रसार्य समासवृत्तपश्चिमभागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात्। ततो मध्यविक्षेपाङ्गुलानि बिन्द्वभिमुखं दक्षिणोत्तररेखायां प्रसार्य तदग्रे बिन्दुं दद्यात्।

सूर्यग्रहण दिङ्मध्यात् प्रत्यक्प्रसारिततलशङ्क्वग्रबिन्दुतः स्पर्शविक्षेपाङ्गुलानि स्वदिशि प्रसार्य समासवृत्तापरभागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात्। ततो मोक्षविक्षेपाङ्गुलानि प्राक्प्रसारिततलशङ्क्वग्रबिन्दुतः स्वदिशि प्रसार्य समासवृत्तपूर्वभागपरिधौ विन्यस्याग्रे बिन्दुं दद्यात्। मध्यग्रहणकालिकविक्षेपाङ्गुलानि स्वदिशि दिङ्मध्यबिन्दु[तः मध्य]वलनाग्रबिन्द्वभिमुखं दक्षिणोत्तररेखायां प्रसार्याग्रे बिन्दुं दद्यात्। इत्थं समासवृत्ते स्पर्शमोक्षविक्षेपाग्रबिन्दुद्वयं मध्यं कृत्वा पृथक् पृथग् ग्राहकबिम्बाङ्गुलार्धप्रमाणसूत्रेण ग्राहकमण्डलं विलिख्य ग्राह्यमण्डले स्पर्शमोक्षप्रदेशौ ज्ञातव्यौ। ततो मध्यविक्षेपाग्रबिन्दुं मध्यं कृत्वा ग्राहकमण्डलं विलिख्य ग्राह्यमण्डले ग्रस्ताङ्गुलानि ज्ञातव्यानि ॥ ३२-३३ ॥

क्षेपाग्रत्रयमण्डलैस्तिमियुगस्यास्यस्थितासक्तयो[1]
रज्ज्वोर्योगभवं शरत्रयशिरःप्राप्यालिखेन्मण्डलम् ।
तच्च ग्राहकवर्त्म केन्द्रविसृतां युक्तां श्रुतिं तत्स्पृशां
कृत्वा ग्राहकमालिखेदभिमतग्रासादिसंसिद्धये ॥ ३४ ॥

मुच्यमानमुडुपे पराङ्मुखीं
छाद्यमानमिह शक्रदिङ्मुखीम् ।
संप्रसार्य विधिवच्छ्रुतिं ततो
विद्ध्यभीष्टदितमन्यथा रवौ ॥ ३५ ॥[2]

मानैक्यार्धवर्गात् स्पर्शमोक्षकालिकं विक्षेपवर्गं त्यक्त्वा मूलं तत्काल-तलशङ्कुः स्यात् । तत्प्रमाणसूत्रेण स्पर्शमोक्षमध्यविक्षेपाग्रबिन्दुमध्यात् पृथक् पृथग् वृत्तत्रयं विलिखेत् । तत्र मत्स्यद्वयमुत्पद्यते । तन्मत्स्यद्वयमुखपुच्छ-सक्तसूत्रद्वयं प्राग्वत् प्रसार्य तत्सूत्रद्वययोगस्थाने बिन्दुं दत्त्वा तद्बिन्दुतो मध्यविक्षेपाग्रबिन्दुस्पर्शसूत्रेण स्पर्शमोक्षविक्षेपाग्रबिन्दुस्पृग् वृत्तं विलिखेत् । तद् ग्राहकमार्गः स्यात् । तत्रेष्टग्रासार्थं श्रुतिः कल्प्या स्वयुक्त्या । तत् कथमित्युक्ते —तन्मार्गार्धं स्फुटस्थित्यर्धेन विभजेत् । लब्धमङ्गुलादिकं छेदः स्यात् ।

सोमग्रहणे स्पर्शादिष्टग्रासज्ञानार्थं स्पर्शविक्षेपाग्रबिन्दुतो ग्राहकमार्ग-च्छेदेन विमाय तदन्तरे च बिन्दुं दद्यात् । दिङ्मध्यबिन्दुतोऽन्यत्सूत्रं प्राक् प्रसार्य ग्राहकमार्गे तच्छेदाग्रबिन्दौ विन्यसेत् । तत्सूत्रं तदा श्रुतिः स्यात् ।

तत्श्रुत्यग्रबिन्दुतो ग्राहकार्धेन ग्राहकमण्डलं विलिखेत् । तेन ग्राह्यमण्डले यद् ग्रस्तं तदेकघटिकाकालिकेष्टग्रासः स्यात् । तदा छेदद्वयाद् ग्राहके लिखित-घटिकाद्वयेऽभीष्टग्रासः स्यात् । इतीष्टच्छेदाग्रेऽभीष्टग्रासः स्यात् । इति

मूलम्—1. The mss. have पुच्छ, nonmetrical, for स्थिता ।

2. The correct reading of these two verses would be :

क्षेपाग्रत्रयमण्डलैस्तिमियुगस्यास्यस्फिगासक्तयो
रज्ज्वोर्योगभुवः शरत्रयशिरःप्राप्यालिखेन्मण्डलम् ।
तत्स्याद् ग्राहकवर्त्म केन्द्रविसृतां युक्त्या श्रुतिं तत्स्पृशां
कृत्वा ग्राहकमालिखेदभिमतग्रासादि संसिद्धये ॥ ३४ ॥

मुच्यमान उडुपे पराङ्मुखीं छाद्यमान इह शक्रदिङ्मुखीम् ।
सम्प्रसार्य विधिवच्छ्रुतिं ततो विद्ध्यभीष्टदितमन्यथा रवौ ॥ ३५ ॥

—KSS

खण्डग्रासे। सकलग्रासेऽभीष्टग्रासतो ग्राह्यग्राहकबिम्बान्तरार्धाङ्गुलप्रमाणसूत्रं मध्यबिन्दुतः प्राक् प्रसार्य, ग्राहकमार्गे विन्यस्य, अग्रे बिन्दुं दत्वा, तद्-बिन्दुतो ग्राहकमण्डलं विलिख्य, ग्राहकमण्डले निमीलनस्थानं विजानीयात्। तथा सूत्रमध्यबिन्दुतः प्रत्यक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे बिन्दुं दत्वा तद्-बिन्दुतो ग्राहकमालिख्य ग्राह्योन्मीलनस्थानं विजानीयात्।

ततो मोक्षसमये घटिकाशेषग्रासः कियानिति ज्ञातुमिच्छा चेत् मोक्षविक्षेपाग्रबिन्दुतो ग्राहकमार्गच्छेदेन विमाय तदग्रे बिन्दुं दद्यात्। दिङ्मध्य-बिन्दुतोऽन्यत्सूत्रं प्रत्यक् प्रसार्य तच्छेदाग्रबिन्दौ विन्यसेत्। तत्सूत्रं श्रुतिः स्यात्। तदग्रे ग्राहकमालिख्य ग्राहकमण्डलस्थितच्छन्नं तद्घटिकाया मुच्यमान-शेषः स्वेष्टग्रासः स्यात्। यथेष्टच्छेदाग्रेऽभीष्टग्रासः स्यात्।

अथवा पूर्वोक्तप्रकारेण स्पर्शात् परं स्वेष्टग्रासकालिकभुजकोटिभ्यां श्रुतिमानीय तां मध्यबिन्दुतः प्राक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे बिन्दुं दत्वा तद्बिन्दुतो ग्राहकार्धेन ग्राहकमण्डलमालिखेत्। तेन ग्राहकमण्डलेन यत् खण्डितं ग्राह्यमण्डले तत्तदभीष्टदितं स्यात्। 'दो अवखण्डने' (धातुपाठः, ११७३) इत्यस्माद्धातोः 'त'-प्रत्यये दितमिति रूपम्। विद्धचभीष्टदितम्, पूर्वोक्तविधानेनानीतश्रुत्यादिसाधिताभीष्टग्रास इत्यर्थः।

तदा निमीलनकालिकश्रुतिं मध्यबिन्दुतः प्राक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे ग्राहकमालिख्य तद्ग्राह्यग्राहकबिम्बयोः सम्यगुत्तरस्थानं ग्राह्य-मण्डले निमीलनस्थानमिति ज्ञेयम्। तदोन्मीलनकालिकश्रुतिं मध्यबिन्दुतः प्राक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे बिन्दुं दत्वा तदग्रे ग्राहकमालिख्य ग्राह्य-ग्राहकसंयोगस्थानं ग्राह्यमण्डल उन्मीलनस्थानमिति ज्ञेयम्।

तदा मोक्षाभीष्टकालिकश्रुतिं दिङ्मध्यात् प्रत्यक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे ग्राहकमालिखेत्। तेन ग्राह्यमण्डले ग्रस्तं यत् स्थितं तन्मुच्यमान-शेषोऽभीष्टकालिकग्रासः स्यात्। विद्धचभीष्टदितमिति पाठे तदा प्रसारित-श्रुत्यग्रे ग्राहकमार्गे ग्राहकं विलिखेत्। तन्मण्डलेऽभीष्टग्रासः स्यात्।

ततोऽर्कग्रासे व्यस्तप्रसारितश्रुत्यग्रे ग्राहकं विलिखेत्। अर्कमण्डले-ऽभीष्टग्रासः स्यात्। इत्थं सूर्यग्रहणेऽपि प्रागुक्तप्रकारद्वयेन युक्त्या कल्पितश्रुत्या, यथोक्तविधानेन साधितश्रुत्या वाभीष्टग्रासं साधयेत्। तत् कथमित्युक्ते — स्पर्शकालिकां श्रुतिमभीष्टकालिकां दिङ्मध्यात् प्रत्यक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे ग्राहकमालिख्य तत्र ग्राह्येऽभीष्टग्रासं विजानीयात्। मोक्षेऽभीष्टकालिकश्रुतिं दिङ्मध्यात् प्राक् प्रसार्य ग्राहकमार्गे विन्यस्याग्रे ग्राहकमालिख्य तत्र ग्राह्यमण्डले यत् स्थितं मुच्यमानशेषेऽभीष्ट-कालिकग्रासं विजानीयात्॥ ३४-३५॥

[ग्रहणवर्णः]

आद्यन्तयोर्बहुल[1]धूम्रलवानुकारी
खण्डग्रहे नियतमञ्जनपुञ्जवर्णः ।
ग्रासे दलात् समधिकेऽरुणकृष्णवर्णः
सर्वग्रहे भवति शीतकरः पिशङ्गः ॥ ३६ ॥[2]

सोमग्रहणस्पर्शसमये ग्रासो बहुलधूम्रवर्णः स्यात् । मोक्षसमये स्वल्पधूम्रवर्णः स्यात् । अर्धादूनो ग्रासः कृष्णवर्णः स्यात् । अर्धादधिको ग्रासः स्वल्पारुणकृष्णवर्णः स्यात् । सर्वग्रासे कपिलवर्णः स्यात् । सूर्यग्रहणे ग्रासः सदा कृष्णवर्णः स्यात् ॥ ३६ ॥

॥ इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

सोमग्रहणाधिकारो नाम पञ्चमोऽध्यायः ॥

मूलम्—1. Be. Bod. D शबल for बहुल ।
The reading बहल is also found to occur in certain manuscripts. —*KSS*

2. After 36, the chapter in A_1. A_2. B. Be. Bo_1. Bo_2. Bod. D. M_2. M_3. S_1. S_2. V_1. V. V_3 ends.

अथ रविग्रहणाधिकारो नाम

षष्ठोऽध्यायः

अथ रविग्रहणाधिकारो व्याख्यायते ।

[रविग्रहणसाधनानि]

अथ रविग्रहणावगमोद्यमी
तदुदये विदधीत परिस्फुटान् ।
दिनकरेन्दुनिशाकरविद्विष-
श्चरमपक्षजपञ्चदशे तिथौ ॥ १ ॥

पूर्वोक्तप्रकारेण ब्रह्मादिपर्वाधिपं ज्ञात्वा ग्रहणसम्भावनामपि ज्ञात्वा तस्याममावास्यायां सूर्योदयकालिकमध्यरविचन्द्रराहूनानीय तच्चन्द्रार्कौ स्फुटौ कृत्वा सूर्यग्रहणज्ञानाय पर्वघटिका आनयेत् ॥ १ ॥

[मध्यलग्नम्]

तिथ्यन्तं रजनीदलेन सहितं कृत्वा सभार्धं रविं
पूर्वाह्णे क्रियते यदुक्तविधिना लग्नं निरक्षोदयैः ।
मध्याह्नात् परतो दिनार्धरहितं कृत्वावसानं तिथेः
सूर्यं चाविकृतं विधाय सुधियस्तन्मध्यलग्नं जगुः ॥ २ ॥

पर्वान्तं पूर्वाह्णे चेत् तत्पर्वघटिकासु निशार्धं संयोज्यम् । रवौ राशिषट्कं योज्यम् । ततो रव्येष्यं लङ्कोदयैरानीय तन्निशार्धसहितं पर्वान्तलग्नं पूर्वोक्तप्रकारेण लङ्कोदयैरानयेत् । तन्मध्यलग्नमित्युच्यते ।

यदा मध्याह्नात् परतः पर्वान्तं ततः पर्वघटिकासु दिनार्धं त्यक्त्वा

तच्छेषवटिकान्तलग्नं यथागतरव्येष्यमानीय लङ्कोदयैरानयेत्। तन्मध्यलग्नं स्यात् ॥ २ ॥

[मध्यलग्नशङ्कुः]

तत्क्रान्तिकाष्ठसहिताः स्वदिशोऽक्षभागा
मध्याह्वयाः स्युरथ भिन्नदिशोर्वियुक्ताः।
तज्ज्या भवेत्तदभिधा त्रिभमध्यभाग-
विश्लेषमौर्व्यपि च मध्यविलग्नशङ्कुः ॥ ३ ॥

तन्मध्यलग्नादयनांशसंस्कृताद् दिग् ज्ञात्वा भुजज्यामानीय तां परमक्रान्तिज्यया हृत्वा लब्ध्या विभजेत्। लब्धं क्रान्तिज्या स्यात्। तद्धनुः षष्टयाप्तं क्रान्तिभागाः स्युः। ते दक्षिणभागाश्चेदक्षांशेषु योज्याः। उत्तरभागाश्चेदक्षांशैरन्तरिताः। ते मध्यलग्ननतभागाः स्युः। त एव मध्यभागा इत्युच्यन्ते। तन्मध्यभागानां जीवा कार्या। सा मध्यज्येत्युच्यते। पुनस्तान् मध्यभागान् नवतेस्त्यक्त्वा तच्छेषभागानां जीवा कार्या। सा मध्यलग्नस्य शङ्कुः स्यात् ॥ ३ ॥

[उदयज्या]

इनोदयात्तिथ्यवसानलग्नं
यत् स्वोदयैस्तस्य भुजांशमौर्वी।
२४
जिनांशमौर्व्या गुणिता विभक्ता
लम्बज्यया स्यादुदयाभिधा ज्या ॥ ४ ॥

सूर्योदयात् पर्वनाडिकायाः स्वदेशोदयैः पर्वान्तलग्नमानीय तल्लग्नादयनसंस्कृताद् भुजजीवामानीय [तां] परमक्रान्तिज्यया हृत्वा लम्बज्यया विभजेत्। लब्धमुदयाभिधा ज्या स्यात् ॥ ४ ॥

[दृक्क्षेपः]

तां मध्यजीवागुणितां विभक्तां
त्रिभज्यया बाहुमुदाहरन्ति।
तन्मध्यजीवाभववर्गयोश्च
दृक्क्षेपमाहुर्विवरस्य मूलम् ॥ ५ ॥

तामुदयज्यां मध्यज्ययाभ्यस्तां त्रिज्यया विभजेत्। लब्धं बाहुरित्युच्यते। तद्बाहुवर्गमध्यज्यावर्गयोर्विश्लेषमूलं दृक्क्षेप इत्युच्यते ॥ ५ ॥

[लम्बनशुद्धपर्व]

तद्वर्गतिथ्यन्तजदृष्टिजीवा-
वर्गान्तरं दृग्गतिवर्गमुक्तम् ।
५२५
तन्मूलनिघ्नान् शरदृष्टिबाणान्
द्विष्ठान् भजेत् सूर्यशशिश्रुतिभ्याम् ॥ ६ ॥

फलान्तरे षष्टिगुणे विभक्ते
भुक्त्यन्तरेणेन्दुसहस्ररश्म्योः ।
विलम्बनं स्याद् घटिकादि कृत्वा
नते तिथौ स्वं विदधीत भूयः ॥ ७ ॥

त्रिप्रश्नोक्तप्रकारेण पर्वान्तोन्नतनाडिकाम् **उन्नतनाश्चरदलेन वर्जिताः** इत्यादिपाठात् तत्कालदृग्ज्यामानीय तद्दृग्ज्यावर्गदृक्क्षेपवर्गयोर्विश्लेषान्मूलं दृग्गतिरित्युच्यते । भूमेर्व्यासार्धयोजनानि पञ्चविंशत्यधिकपञ्चशतानि । । ५२५ । तानि दृग्गतिगुणितानि द्विधा स्थापयेत्। तत्राद्यराशिं सूर्यस्फुटयोजनकर्णेन विभजेत्। लब्धं लिप्तादि सूर्यस्य लम्बनं स्यात्। तत् परमफलं कलाचतुष्टयमेव । ४। ततो द्वितीयराशिं चन्द्रस्य स्फुटयोजनकर्णेन विभजेत् । लब्धं लिप्तादिकं चन्द्रस्य लम्बनं स्यात्। तत् परमफलं कलात्रिपञ्चाशत्। ५३। तत्र चन्द्रार्कयोर्लम्बनान्तरकलाः षष्टिगुणिता, रवीन्द्वोर्भुक्त्यन्तरलिप्ताप्ता, लब्धं घटिकादिलम्बनं स्यात् । तल्लम्बनं पर्वान्तकालिकनतघटिकासु धनं कुर्यात्। अथवा पर्वान्तं पूर्वाह्णे चेल्लम्बनं पर्वणि त्यजेत्। अपराह्णे चेत् पर्वणि युञ्ज्यात्। इत्थमसकृत्कर्मणा लम्बनमानीय पर्वणि संस्कुर्यात्। तल्लम्बनशुद्धपर्व स्यात् ॥ ६-७ ॥

तिथेर्नतस्य क्रमशिञ्जिनी हता
खमध्यलग्नप्रभवेन शङ्कुना ।
२९५४९६१
क्षमाषडङ्काब्धिशराङ्कनेत्रहृद्
विलम्बने स्याद् घटिकादि वा फलम् ॥ ८ ॥

प्रकारान्तरेण लम्बनमुच्यते। तत् कथमित्युक्ते—पूर्वोक्तप्रकारेण मध्यलग्नशङ्कुमानयेत्। ततः पर्वान्तकालिकनतघटिकासूनां क्रमजीवामानीय तां मध्यशङ्कुगुणितामेकराशिज्यावर्गेण विभजेत्। लब्धं घटिकादि लम्बनं स्यात्। एकोनत्रिंशल्लक्षाश्चतुःपञ्चाशत्सहस्राणि नवशतान्येकषष्ट्यधिकान्येकराशिज्यावर्गः।२९,५४,९६१। इत्थमसकृत्कर्मणा लम्बनमानीय मूलपर्वणि संस्कुर्यात्। तल्लम्बनशुद्धपर्व स्यात्॥ ८॥

८६०
हृताथवा दृष्टिगतिः खषड्गजै-
र्विलम्बनं तत् स्वमृणं क्रमाद् भवेत्।
तिथेर्विरामे परपूर्वभागयो-
र्मुहुस्तदुत्थांशकलाः[1] शशीनयोः॥ ९॥

अथवा पूर्वोक्तप्रकारेण दृग्गतिमानीय तां षष्ट्यधिकाष्टशतेन। ८६०। विभजेत्। लब्धं घटिकादि लम्बनं स्यात्। तल्लम्बनं पर्वणि प्राग्वत् संस्कुर्यात्। अथवा मध्यलग्नात् सूर्येऽधिके तल्लम्बनं पर्वणि त्यजेत्। सूर्यात् मध्यलग्नेऽधिके पर्वणि योजयेत्। रवीन्द्वोर्भुक्तिलिप्ताः पृथक् पृथग् लम्बनगुणिताः षष्ट्याप्ता लब्धं कलादिकं लम्बनमृणं चेद् रवीन्द्वोः स्वलिप्तादि शोध्यम्, धनं चेत् स्वलिप्तादि योज्यम्। एवं तात्कालिकौ चन्द्रार्कौ भवतः॥ ९॥

खमध्यगे तिग्मकरे यदा भवेद्
विलम्बनं स्वं विदधीत तत्तदा।
तिथौ रवेर्दक्षिणगे निशाकरे
निशाकराद् दक्षिणगे रवावृणम्॥ १०॥

पर्वान्ते मध्याह्नतुल्ये रविः खमध्यगो भवति। तदा पूर्वोक्तप्रकारेण लम्बन[मल्प]मागतं चेत् तल्लम्बनं [पर्वणि] धनं कुर्यात्, यदा रविबिम्बाद् दक्षिणभागे चन्द्रबिम्बं स्यात्। चन्द्रबिम्बाद् दक्षिणे रविबिम्बं चेत् तल्लम्बनं पर्वणि त्यजेत्, तल्लम्बनशुद्धपर्वेति। मध्याह्नलम्बनं त्रिभलग्नपक्षे सम्भवति। तल्लम्बनशुद्धपर्वान्तो रवेर्मध्यग्रहणकालः स्यात्॥ १०॥

मूलम्—1. The word अंश is irrelevant here. So it would be better to have तदुत्थाश्च कलाः in place of तदुत्थांशकलाः। —*KSS*

५२५
दृक्क्षेपे शरयुग्मबाणगुणिते द्विःस्थे शशाङ्केनयोः
कर्णाभ्यां विहृते फलान्तरकला मध्यांशदिक् सा नतिः ।
५१५७०
दृक्क्षेपः स्फुटभुक्तिजान्तरहतः खाद्रीषुरूपेषुहृद्
वा नत्येन्दुशरः समान्यककुभोर्युक्तो वियुक्तः स्फुटः ॥ ११ ॥

असकृत्कर्मणा दृक्क्षेपो भूव्यासार्धयोजनैः । ५२५ । एभिर्गुणितो द्विधा स्थाप्यः । तत्राद्यराशिं रविस्फुटयोजनकर्णेन विभजेत् । लब्धं रविनतलिप्तादिकं स्यात् । द्वितीयराशिं चन्द्रस्फुटयोजनकर्णेन विभजेत् । लब्धं चन्द्रस्य नतलिप्तादिकं स्यात् । तच्चन्द्रार्कनतलिप्तान्तरं लिप्तादि नतिरित्युच्यते । तस्या दिङ्मध्यज्यादिक् स्यात् ।

प्रकारान्तरेण नतिरित्युच्यते । तत् कथमित्युक्ते- दृक्क्षेपे त्रिज्यातुल्ये तदा नतिलिप्ता परमफलमेकोनपञ्चाशतः किञ्चिदूनम् । ४८ । ५४ । एता लिप्ताः षष्टिघ्ना रवीन्दुभुक्त्यन्तरकलाप्ता, लब्धं घटिकाचतुष्टयं स्यात् । एतत् परमनतिलिप्तानां घटिका स्यात् । लम्बनस्यापि परमफलं तदेव । लम्बनं पूर्वापरयोरन्तरकालः । नतिर्दक्षिणोत्तरयोरन्तरं क्षेत्रम् । भुक्त्यन्तरलिप्ताः षष्टिना[डीनाम्] । भुक्तिरियं दृक्क्षेपस्य गुणकः कल्पितः । तस्माद् दृक्क्षेपतुल्या त्रिज्या षष्टिघ्ना नतिकालघटिकाचतुष्टयेन भक्ता, लब्धमेकपञ्चाशत्सहस्राणि पञ्चशतानि सप्तत्यधिकानि । ५१,५७० । इत्थमयं भागहारो जातः इति दृक्क्षेपो रविचन्द्रस्फुटभुक्त्यन्तरकलाभ्यस्तोऽनेन भागहारेण भक्तो लब्धं लिप्तादि नतिः स्यात् । तन्नतेर्मध्यांशानां दिगेव दिक् स्यात् । ततो लम्ब[न]शुद्धपर्वान्तकालिकेन्दुविक्षेपमानीय तद्विक्षेपनत्योस्तुल्यदिक्त्वे तयोर्योगः स्फुटविक्षेपः, भिन्नदिक्त्वे तयोरन्तरं स्फुटविक्षेपः, मध्यग्रहणकालिकः स्यात् । [अन्तरे कृते] इतरयोर्यदधिकस्तस्य दिगेव स्फुटविक्षेपस्य दिक् स्यात् ॥ ११ ॥

चन्द्रग्रहोक्तविधिना स्थितिमर्दखण्डे
[1]
संसाध्य तत्स्थितिदलोनयुतात् पृथक्स्थात् ।
स्पष्टात् तिथेरसकृदेव विलम्बनादी-
नानीय तत्स्थितिदले सकृदेव साध्ये ॥ १२ ॥

मूलम्—1. Bo_2. om. तत् to नीय, two lines below.

प्राग्लम्बनं समधिकं यदि मध्यमात् स्या-
दूनं च मौक्षमृणसंज्ञितयोस्तयोश्च[1] ।
प्राग्ग्रासमूनमधिकं यदि वापि मौक्षं
स्यान्मध्यमाद्धनगयोश्च तदन्तरेण ॥ १३ ॥

युक्तं निजं स्थितिदलं स्फुटमन्यथोनं
योगेन वार्णधनलम्बनयोर्युतं स्यात् ।
दक्क्षेपदृग्गुणसमत्वविलम्बनं स्यात्
संयोजयेत् स्थितिदलेऽस्ति विलम्बनं यत् ॥१४॥

मानैक्यार्धवर्गात् स्फुटविक्षेपवर्गं त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तराप्तं घटिकादि स्थित्यर्धं स्यात् । सर्वग्रासे विमर्दार्धार्थं मानयोरन्तरम् । तदन्तरार्धवर्गाद् विक्षेपवर्गं त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तराप्तं विमर्दार्धं स्यात् ।

गणितागतपर्वान्तात् स्थित्यर्धं त्यक्त्वा प्राग्वल्लम्बनमानीय स्थित्यर्धोनितपर्वणि संस्कृत्य ततस्तथासकृत्कर्मणा लम्बनमानयेत् । तत् स्पर्शलम्बनं स्यात् । ततो मूलपर्वणि स्थित्यर्धं युक्त्वा लम्बनमानीय स्थित्यर्धयुक्तपर्वणि संस्कृत्यासकृत्कर्मणा लम्बनमानयेत् । तन्मोक्षलम्बनं स्यात् । इत्थं पूर्वाह्णे मध्यलम्बन[त्स्पर्शलम्बन]मधिकं स्यान्मोक्षलम्बनमल्पं स्यात् । अपराह्णे मध्यलम्बनात् स्पर्शलम्बनमल्पं स्यात्, मोक्षलम्बनमधिकं स्यात् । स्पर्शलम्बन-मध्यलम्बनान्तरविनाड्यः स्थित्यर्धे योज्याः, स्फुटस्थित्यर्धं स्यात् । तथा मध्यलम्बनमोक्षलम्बनान्तरं स्थित्यर्धे योज्यम् । तत् स्फुटमोक्षस्थित्यर्धं स्यात् ।

यदा सूर्योदयादधः स्पर्शः, परतो मध्यग्रहणं चेत् तदा मध्यलम्बनात् स्पर्शलम्बनमल्पं चेत् तदा तयोरन्तरं स्थित्यर्धे शोध्यम् । तत् स्पर्शस्थित्यर्धं स्यात् । उदयादधो मध्यग्रहणं परतो मोक्षश्चेन्मोक्षलम्बनमधिकं चेत् तयोरन्तरं स्थित्यर्धे शोध्यम् । तन्मोक्षस्थित्यर्धं स्यात् ।

मध्याह्नादधः स्पर्शः परतो मध्यग्रहणं चेत् तदा लम्बनयोरैक्यं स्थित्यर्धे योज्यम् । तत् स्पर्शस्थित्यर्धं स्यात् । मध्याह्नादधो मध्यग्रहणं, परतो मोक्षश्चेत् तदा तयोर्लम्बनयोरैक्यं स्थित्यर्धे योज्यम् । तन्मोक्षस्थित्यर्धं स्यात् ।

मूलम्— 1. There was मौक्षिक in the original text ; it has been replaced by मौक्ष to make the text metrically correct.
—KSS

यदास्तमयादधः स्पर्शः परतो मध्यग्रहणं चेत् तदा स्पर्शलम्बनान्मध्यलम्बनमल्पं चेत् तयोरन्तरं स्थित्यर्धे शोध्यम्। तत् स्पर्शस्थित्यर्धं स्यात्। यदास्तमयादधो मध्यग्रहणं, परतो मोक्षस्तदा मध्यलम्बनान्मोक्षलम्बनमल्पं चेत् तदा तयोरन्तरं स्थित्यर्धे शोध्यम्। तन्मोक्षस्थित्यर्धं स्यात्। इत्थमसकृत्कर्मणा।

यदा दृक्क्षेपदृङ्नत्योस्तुल्यत्वे चेत् तदा लम्बनं न स्यात् मध्यलग्नपक्षे। सत्रिभलग्नपक्षवर्तिनां लम्बनमस्ति चेल्लम्बनं सत्रिभलग्नात् सूर्येऽल्पे स्थित्यर्धे शोध्यम्। सत्रिभलग्नात् सूर्येऽधिके लम्बनं स्थित्यर्धे योज्यम् ॥ १२-१४ ॥

एवं विमर्ददलयोरपि संस्थितिः[1] स्यात्
तेनोनितादथ युतात् स्फुटपर्वणोऽन्तात्।
साध्यौ च मध्यशरवत् प्रथमान्त्यबाणौ
ग्रासं तथेष्टमवगन्तुमभीष्टकोटिः ॥ १५ ॥

स्फुटस्थित्यर्धवदेव स्फुटविमर्दार्धद्वयं साधयेत्। तत् कथमित्युक्ते—पूर्ववन्मूलपर्वणि विमर्दार्धं त्यक्त्वा लम्बनमसकृदानीय तन्मध्यलम्बनयोरन्तरं योगं वा प्राग्वद् विमर्दार्धेन संस्कुर्यात्। तन्निमीलनविमर्दार्धं स्यात्। तदा मूलपर्वणि गणितागतविमर्दार्धं युक्त्वा लम्बनमसकृदानीय तन्मध्यलम्बनान्तरं योगं वा विमर्दार्धे संस्कुर्यात्। तदुन्मीलनविमर्दार्धं स्यात्। **प्रायेणार्कग्रहणे विमर्दार्धं न सम्भवति। अस्ति चेत् पादघटिकामात्रमेव। तदपि चन्द्रमण्डलात् सूर्यमण्डलेऽधिके। सर्वग्रासे सति तदा कङ्कुणार्धमिति विज्ञेयम्।**

ततः स्पर्शमोक्षकालिकौ स्फुटविक्षेपौ साधयेत्। कथमित्युक्ते—स्पर्शकालिकदृक्क्षेपात् प्राग्वन्नतिमानीय स्पर्शकालिकचन्द्रविक्षेपे संस्कुर्यात्। तत् स्पर्शकालिकस्फुटविक्षेपः स्यात्। तथा मोक्षकालिकदृक्क्षेपान्नतिमानीय मोक्षकालिकचन्द्रविक्षेपे संस्कुर्यात्। तन्मोक्षकालिकस्फुटविक्षेपः स्यात्।

ततोऽभीष्टग्रासज्ञानार्थमभीष्टकालादसकृत्कर्मणा प्राग्वद् दृक्क्षेपमानीय तद्दृक्क्षेपात् तत्कालनतिमानीय तत्कालचन्द्रविक्षेपे संस्कुर्यात्। तदिष्टग्रासकालिकस्फुटविक्षेपः स्यात्। स एवाभीष्टकोटिरित्युच्यते ॥ १५ ॥

मूलम्— 1. It would be better to have संस्कृतिः is place of संस्थितिः।
—*KSS*

बाहुः स्पष्टशरोद्भवः स्थितिदलच्युग्णः स्फुटो जायते
स्थित्यर्धेन हृतः स्फुटेन शशिवच्छेषस्य कार्यो विधिः ।
ग्रासात् पूर्ववदागतश्च समयः च्युग्णः स्फुटेनासकृत्
स्थित्यर्धेन हृतः स्फुटेषुजनितेन[1] स्तः स्थितेः स्वाद् दलात् ॥१६॥

अभीष्टकालग्रासार्थमत्र विशेषः कथ्यते । तत् कथमित्युक्ते—इष्टस्पष्ट-स्थित्यर्धेन भुक्त्यन्तरलिप्ता हृत्वा षष्ट्या विभजेत् । लब्धं भुजः स्यात् । ततोऽभीष्टकालिकस्फुटविक्षेपवर्गं मानैक्यार्धवर्गात् त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तरभक्तं तत्कालमध्यस्थित्यर्धं स्यात् । तेनाभ्यस्तोऽसौ बाहुः स्पष्टस्थित्यर्धभक्तः स्फुटभुजः स्यात् । अभीष्टकालिकविक्षेपः कोटिः स्यात् । तद्भुजकोटिवर्गयोगान्मूलं कर्णः स्यात् । असौ मानैक्यार्धाच्छोध्यः । तच्छेषोऽभीष्टकालग्रासः स्यात् ।

तथाभीष्टग्रासकालार्थमपि विशेषः कथ्यते । तत् कथमित्युक्ते—स्वेष्टग्रासो मानैक्यार्धाच्छोध्यः । तच्छेषः कर्णः स्यात् । तद्वर्गान्मध्यकाल-स्फुटविक्षेपवर्गं त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तरभक्तं घटिकादिकालः स्यात् । तत् कालं स्वेष्टस्थित्यर्धगुणितं मध्यकालगणितागतस्थित्यर्धेन विभजेत् । लब्धं घटिकादिकं स्वेष्टस्थित्यर्धाच्छोध्यम् । तच्छेषमिष्टग्रासस्य कालो घटिकादिकं स्यात् ।

इतीष्टघटिका तद्घटिकैका द्वयं वा न्यूनाधिका स्यात् । तस्मात्लल्ला-चार्येण स्वेष्टकालस्यासकृत्क्रियोक्ता । तत् कथमित्युक्ते—एता घटिकाः स्वेष्टस्पर्शस्थित्यर्धात् त्यक्त्वा पूर्वोक्तप्रकारेण स्वेष्टग्रासमानयेत् । असौ न्यूनाधिकः स्यात् । तस्य प्राग्वदिष्टघटिका आनीय इत्थमसकृत्कर्मणा तात्कालिकनतिमानीय तत्कालचन्द्रविक्षेपे संस्कुर्यात् । असौ स्फुटविक्षेपः स्यात् । तस्य तद्वर्गं मानैक्यार्धवर्गात् त्यक्त्वा मूलं षष्टिघ्नं भुक्त्यन्तरभक्तं तत्कालमध्यस्थित्यर्धं स्यात् । ततः स्वेष्टग्रासात् पूर्वोक्तप्रकारेण गणितागतपर्व-घटिका स्वेष्टस्फुटस्थित्यर्धेन हृत्वा तात्कालिकानीतमध्यस्थित्यर्धेन विभजेत् । लब्धं घटिकादिकं स्वोष्टस्पष्टस्थित्यर्धाच्छोध्यम् । तच्छेषस्त्वेष्टग्रासस्य स्वेष्टघटिकादिकः कालः स्यात् । इत्थं सूर्यग्रहणोक्तविशेषो ज्ञातव्यः ।

ततः सोमग्रहणवल्लम्बनशुद्धपर्वान्तो रवेर्मध्यग्रहणकालः स्यात् । स एव स्पर्शस्फुटस्थित्यर्धोनितः स्पर्शपर्व स्यात् । तथा मध्यकालो मोक्षस्फुट-स्थित्यर्धयुक्तो मोक्षपर्व स्यात् ।

मूलम्— 1. It would be better to have स्फुटेषुजनितेनोनः in place of स्फुटे-षुजनितेन स्तः । —*KSS*

तत् स्पर्शमध्यमोक्षकालिकविक्षेपास्त्रज्या च स्वेष्टग्रासकर्णाश्च मानैक्यार्धं लम्बनानि पर्वण्येतानि पूर्वोक्तप्रकारेणाङ्गुलानि कृत्वा ततः परिलेखनं कुर्यात् ॥ २६ ॥

[असंलक्ष्यग्रहणम्]

द्वादशः सवितुमण्डलांशकः
पाटवेन महसो न दृश्यते ।
खण्डितोऽपि खलु षोडशांशकः
स्वच्छतां विदधतः कलावतः ॥ १७ ॥[1]

सूर्यमण्डले द्वादशांशो ग्रस्तोऽपि रश्मिप्रभावान्न लक्ष्यते । चन्द्रस्य शान्तरश्मित्वाच्चन्द्रमण्डले षोडशांशो ग्रस्तोऽपि न लक्ष्यते । मध्याह्नेऽर्कमण्डलेऽष्टमांशो ग्रस्तोऽपि न लक्ष्यते । "अष्टमांशगृहीतोऽर्कः स्याद् ग्रहे तीक्ष्णत्विषे"ति तन्त्रान्तरवचनात् । ततोऽधिकं ग्रस्तग्रहणद्वयं लक्ष्यं स्यादित्यर्थः ॥ २७ ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
सूर्यग्रहणाधिकारो नाम षष्ठोऽध्यायः ॥

मूलम् —1. After 17, the chapter in A_1. B. Be. Bo_1. Bo_2. M_2. M_3. S_1. V_1. V_2. ends.

After 17, A_2. Bod. D. S_2. V_3. add :

मोक्षेऽधिकं पूर्वकपाललम्बनं
भागेऽपरे मौक्षिकमेव हीनम् ।
तन्मध्यगे लम्बनमन्तरं यत्
स्थित्यर्धहीनं विकृतस्य काले ॥

अथ राहुपर्वानयनाधिकारो नाम

सप्तमोऽध्यायः

अथ पर्वानयनाधिकारो व्याख्यायते ।

[पर्वणि ग्रहणसम्भावना]

पातितागुरविचक्रदलाभ्यां
लिप्तिकाः समधिका यदि वोनाः ।
संहरेदिनतमोगतियुत्या
स्युः क्रमेण दिवसा गतगम्याः ॥ १ ॥

तैर्मासान्ते भवति निकटे पर्व भानोर्दिवा चेत्[1]
पक्षस्यान्ते निशि शशभृतस्तत्र पातोनचन्द्रे[2] ।
यद्यंशा स्युर्भदलरहिते भार्धतो वा विशुद्धे
चक्राच्छुद्धे भगणरहिते वा स्फुटा द्वादशांशाः ॥ २ ॥

ग्रहणज्ञानार्थमभीष्टदिवसे रविराह्वानीय रवौ राहुं त्यक्त्वा तच्छेषराश्यादयश्चक्राच्चक्रार्धाद्वा न्यूनाश्चेत् क्रमाच्चक्राच्चक्रार्धाच्छोध्याः । तच्छेषा लिप्तीकृता रविराहुगतियुतिलिप्ताप्तं गम्यदिनादिकं स्यात् । तावद्भिर्दिवसैरग्रे ग्रहणसम्भावना स्यादिति ज्ञेयम् । तथा रवौ राहुं त्यक्त्वा प्राग्वच्चक्रचक्रार्धाधिकलिप्ता भुक्तियोगेन विभक्ता गतदिनदिकं स्यात् । तावद्भिर्दिनैः प्रागेव ग्रहणसम्भावना गतेति ज्ञातव्या ।

इति गतगम्यज्ञातदिवसे तत्समीपमासान्ते दिवा चेत् [1]सूर्यग्रहणसम्भावना । पक्षान्ते रात्रिश्चेच्चन्द्रग्रहणसम्भावना । तदा स्फुटचन्द्राद्राहुं

मूलम्— 1. Be. Bod. D. °र्दिनश्चेत्
2. M_1. M_2. M_3. चन्द्रैः
व्याख्या—1 M_2. M_3. om. सूर्य to चन्द्रग्रहणसम्भावना, next line.

त्यक्त्वा तच्छेषकेन्द्रे राश्यादिके राशिषट्कादधिके तत्र राशिषट्कं शोध्यम्। तच्छेषो भुजः स्यात्। तथा केन्द्रे राशिषट्कादूने तत्केन्द्रं भषट्काच्छोध्यम्। शेषो भुजः। यदा केन्द्रमेकादश राशयस्तदा तत्केन्द्रं चक्राच्छोध्यम्। [शेषो भुजः।] यदा केन्द्रं भगणरहितं राशिस्थानशून्यं चेत् तदा तत्केन्द्रं भागादिकमेव भुजः स्यात्। इति चक्रचक्रार्धे वा गतं गम्यं वा साधितभुजाख्यमंशादिकं द्वादशेभ्योऽल्पं चेद् ग्रहणसम्भावना स्यादिति समासोक्तिः।

अत्र विशेषमाह—गतं गम्यं वा पूर्वोक्तममावास्यायां द्वादशैव चैकाङ्गुलविषुवच्छायादेशेऽर्कग्रहणं न स्यात्। यत्र पञ्चाङ्गुलविषुवच्छाया तत्र गतं गम्यं वांशाः पञ्चदश चेदर्कग्रहणं न स्यात्। यत्र नवाङ्गुला विषुवच्छाया तत्र गतं गम्यं वाष्टादशांशाश्चेदर्कग्रहणं न स्यात्।

सोमग्रहणे तु गतं गम्यं वा द्वादशांशाश्चेन्मध्यभुक्तितः स्फुटभुक्तिरल्पा तुल्या वा स्यात् तदेन्दुग्रहणं न स्यात्। स्फुटभुक्तिरधिका चेद् ग्रहणमस्ति। यदा गतं गम्यं वाष्टादशांशाश्चेत् तदा सोमग्रहणं न स्यात्।

इत्थं गतं गम्यं वांशादिकं निरूपितादल्पं चेत् तदा पर्वणि ग्रहणसम्भावना स्यादिति विज्ञेयम्॥ १-२॥

२
क्षेपोऽङ्गुलादिर्यमसङ्गुणास्ते
४ १७
वेदाहतात्यष्टिहृतार्कभुक्तिः।
२० 1
बिम्बं शशाङ्कस्य तु खेन्दुनिघ्नी
2 ५७० 3
विभाजिता शैलशिलेच्चयेषुभिः॥ ३॥

लघुप्रकारेण विक्षेपादिकं कथ्यते। तत् कथमित्युक्ते—पूर्वोक्तप्रकारेण स्फुटचन्द्राद्राहुं त्यक्त्वा भुजभागादिकं द्विगुणितं तदङ्गुलादि विक्षेपः स्यात्।

चतुर्गुणितार्कभुक्तिः सप्तदशाप्ताङ्गुलादि रविबिम्बं स्यात्। दशगुणिता राशिभुक्तिः सप्तसप्तत्यधिकपञ्चाशताप्ता। ५७७। अङ्गुलादि शशिबिम्बं स्यात्॥ ३॥

मूलम्—1. M₁. M₂. M₃. निघ्नं
2. M₁. M₂. M₃. विभाजितं
3. B. Be. Bo₁. Bo₂. Bod. D. च्चयाक्षैः

[छायाबिम्बम्]

५ १ २८
शराहता नागयमैर्हतार्की
२ ३५
यमाहता चान्द्रमसीषुरामैः ।
गतिर्वियोगः फलयोर्भवेद् यत्
तदेव बिम्बं तमसोऽङ्गुलादि ॥ ४ ॥[2]

पञ्चगुणितार्कभुक्तिरष्टविंशत्याप्ता[1] द्विगुणितेन्दुभुक्तिः, पञ्चत्रिंशदाप्ता च तत् फलयोर्द्वयोरन्तरमङ्गुलादि च्छायाबिम्बं स्यात् ॥ ४ ॥

[घटिकादि लम्बनम्]

नता तिथेः[3] षड्गुणिता लवाः स्यु-
स्तदूनयुङ्मध्यविलग्नमर्कः ।
कपालयोः प्रागपराख्ययोः स्यात्
तदुद्भवक्रान्तिपलान्तरैक्यम् । ५ ॥

नतं तदूनं त्रिभमुन्नतं स्यात्
तयोर्भुजज्ये च नतोन्नतज्ये ।
८६०
नतज्यका खाङ्गजैर्विभक्ता
विलम्बनं स्याद् घटिकादिकं तत् ॥ ६ ॥[4]

मूलम्— 1. S_2. V_1. V_2. राम for नाग

2. After 4, V_2. ins.
ग्रासोनमानैक्यदलाधिके भवेद् ग्रासस्तु मानैक्यदलं शरोनितम् ।
विक्षेपमानैक्यदले समे यथा न स्यात् तथापि ग्रहणं शशीनयोः ॥
Then 5.

3. The reading तिथिः is also found to occur in certain manuscripts. —*KSS*

4. S_1. om. प्रतीक of verse 6, but gives the commentary.

व्याख्या—1. M_1. M_2. त्रयोविंशत्याप्ता

लघुप्रकारेण लम्बनमवनतिरपि कथ्यते। तत् कथमित्युक्ते—दिनार्ध-पर्वणोरन्तरघटिकाः षड्भिर्गुणिता भागाः स्युः। भागाः पर्वान्तं पूर्वाह्णे चेत् पर्वान्तरवौ शोध्याः, अपराह्णे चेत् तदा रवौ योज्याः। असौ रविर्मध्यलग्नं स्यात्। तदेव खार्क इत्युच्यते। तस्मादयनांशसंस्कृतात् क्रान्तिमानीय सा दक्षिणा चेत् दक्षिणाक्षांशेषु योज्या। उत्तरा चेत् तदक्षांशान्तरम् अधिकदिशि खार्कस्य नतांशाः स्युः। तदूननवतेः शेषमुन्नतांशाः स्युः। तन्नतांशजीवा नतज्येत्युच्यते। उन्नतांशजीवोन्ननज्येत्युच्यते।

ततः प्राग्वद् दिनार्धपर्वणोरन्तरं नतघटिकाः। तन्नतासूनां जीवा नतज्येत्युच्यते। तां षष्ट्यधिकाष्टशतैः। ८६०। विभजेत्। लब्धं घटिकादि लम्बनं स्यात् ॥ ५-६ ॥

[लम्बनसंस्कृतपर्व]

स्फुटं भवेदुन्नतशिञ्जिनीघ्नं
हृतं त्रिमौर्व्या क्रमशोऽमुना च।
कपालयोः पर्वविहीनयुक्तं
मुहुर्विधेयं ग्रहणे खरांशोः ॥ ७ ॥

तल्लम्बनघटिकादिकमुन्नतांशज्यया हृत्वा त्रिज्यया विभजेत्। लब्धं स्फुटलम्बनघटिकादिकं स्यात्। तल्लम्बनं पर्वणि पूर्वाह्णे शोध्यम्। अपराह्णे योज्यम्। तल्लम्बनसंस्कृतपर्व स्यात्।

तत्पर्वदिनार्धान्तरं नतम्। तदा प्राग्वत् तद्घटिकाभागैः खार्कमानीय नतांशेभ्यो नतांशज्यामानीय, तल्लम्बनमानीय, स्फुटं कृत्वा, मूलपर्वणि संस्कृत्य, पुनः प्राग्वदसकृत्कर्मणा स्वपूर्वतुल्यं लम्बनमानीय मूलपर्वणि संस्कुर्यात्। तल्लम्बनशुद्धपर्व स्यात्। तत्पर्व सूर्यस्य मध्यग्रहणकालः स्यात् ॥ ७ ॥

[स्फुटविक्षेपः]

नतांशजीवा [21] कुयमाहताप्ता[1]
नलिस्त्रिमौर्व्या नतवद् दिगस्याः।
स्फुटेन भुक्त्योर्गुणितान्तरेण
हतास्फुटेनान्यदतो यथोक्तम् ॥ ८ ॥

मूलम्— 1. Be. Bod. M_1 M_2. M_3. कुयमाप्तयाप्ता

अङ्गुलादि नतिरुच्यते। तत् कथमित्युक्ते—नतेः परमफलमेकोनपञ्चाशल्लिप्ताः। ४९। तत्र सत्रिंशल्लिप्ताद्वयम्। २। २०। एकमङ्गुलमत्र कल्पितम्। तस्मादेकोनपञ्चाशल्लिप्ता एकविंशत्यङ्गुलानि स्युः। यदा नतांशज्या त्रिज्यातुल्या चेत् तदैव नतिरेकविंशत्यङ्गुलानि। २१। स्यात्। तस्मात् त्रिज्यैकविंशत्याप्ता लब्धं त्रिषष्ट्यधिकशतम्। १६३। त्रिचत्वारिंशद् भागहारः कल्पितः। इत्थमसकृत्कर्मणा खार्कनतांशज्या। अनेन भागहारेणाप्ता लब्धमङ्गुलादि नतिः स्यात्। [अथवा नतांशज्या एकविंशतिगुणिता त्रिज्याप्ता लब्धमङ्गुलादि नतिः स्यात्।] सा रवीन्दुस्फुटभुक्त्यन्तराभ्यस्ता मध्यभुक्त्यन्तराप्ता, लब्धमङ्गुलादि स्फुटनतिः स्यात्। तया नत्या पर्वान्तचन्द्रविक्षेपः संस्कृतः स्फुटविक्षेपः स्यात्।

ततः पूर्वोक्तप्रकारेण विम्बान्यानीय ग्रहणं ज्ञात्वा तत्स्थित्यर्धमानीय तदूनयुतपर्वान्तलम्बनमानीय स्फुटस्थित्यर्धादिकं साधयेत्॥ ८॥

[इष्टकालग्रहणम्]

यदि पुनरवगन्तुमन्यदिष्टं
ग्रहणमिहाहनि मध्यमे तदानीम्।
५ २४ २७ ६
शर-जिन-भ-रसान् सहस्ररश्मेः
५ २२ १२ ५३
शशिनि शर-आकृति-सूर्य-रामबाणान्॥ ९॥

० १९ ४२ ५३
खं-अतिधृति-यमाब्धि-रामबाणान्
सरसि सरोरुहवैरिणश्च तुङ्गे।
० ९ २२ ४१ 1
तमसि च ख-नव-आकृति-क्षमाब्धीन्
भलवकलाविकला विशोधिते स्यात्॥ १०॥

० १४ ४७ २ 2
व्योमेन्द्राः सप्तवेदा यमोऽहिमकरे पक्षलब्धिर्गृहादिः
६ १७ ३८ ४२
षट्कं सप्तेन्दवोऽथो भुजगहुतभुजो युग्मवेदाः शशाङ्के।

मूलम्—1. D. °मार्थान्° Bod has both the readings.

2. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_3. द्वयमहिमकरे V_1. V_2. द्वयः अहिमकरे

१०० १३ ४८
तुङ्गे लिप्ताः शतं सत्रिंशशिविकलिकं सैंहिकेयेऽष्टवेदा
लिप्ताः पादेन हीनाः खमृणमवगमे पर्वणः स्याद् विधिश्च [1] ॥११॥ [2]

अस्यार्थः—यस्मिन् पर्वणि ग्रहणं दृष्टं तस्मात् पर्वणोऽधः परतो वा मासषट्के पक्षे वा ग्रहणसद्भावोऽस्तीति सम्भावना विद्यते, तस्मात् तदानयनार्थमुच्यते। तत् कथमित्युक्ते—परतो ग्रहणज्ञानार्थं दृष्टग्रहणदिनद्युगणे सप्तसप्तत्यधिकशतं योज्यम्। एतत् पौर्णमासी·····[1]दं तत्पर्वणि वारं ज्ञात्वा ग्रहणदिनमध्यार्के पञ्चराशयश्चतुर्विंशतिभागाः सप्तविंशतिलिप्ताः षड्विकलाश्च[2] योज्याः।५।२४।२७।६। तथा तन्मध्यचन्द्रे पञ्चराशयो द्वाविंशतिभागा द्वादशकलास्त्रिपञ्चाशद् विलिप्ताश्च योज्याः। ५।२२।१२।५३। तच्चन्द्रोच्च एकोनविंशति भागा द्विचत्वारिंशत् कलास्त्रिपञ्चाशद् विलिप्ताश्च योज्याः। ।०।१९।४२।५३। तच्चन्द्रपाते नवभागा द्वाविंशति लिप्ता एकचत्वारिंशद् विलिप्ताश्च शोध्याः ।०।९।२२।४१। तदैव गतमासषट्कदृष्टग्रहणदिनद्युगणे सप्तसप्तत्यधिकशतं त्यक्त्वा तत्पर्वणि वारं ज्ञात्वा ग्रहणदिनमध्यार्कादिषूक्तध्रुवाः शोध्याः। तच्चन्द्रपाते स्वध्रुवं योज्यम्।

तथापरपक्षपर्वज्ञानार्थं दृष्टग्रहणदिनद्युगणे पञ्चदश युक्त्वा वारं ज्ञात्वा ग्रहणदिनमध्यार्के राश्यादिकं योज्यम् ।०।१४।४७।२। तथा चन्द्रे राश्यादिरयं ।६।१७।३८।४२। योज्यः। तथा चन्द्रोच्चे भागादिरयं योज्यः ।१।४०।१३। राहौ कलादिरयं शोध्यः ।४७।४५। तथा गतपर्वज्ञानार्थं दृष्टग्रहणदिनद्युगणे पञ्चदश त्यक्त्वा वारं ज्ञात्वा ग्रहणदिनार्कादिषूक्तस्वपक्षक्षेपांस्त्यक्त्वा राहौ योजयेत्।

इत्थं तदीयक्षेपसंस्कृतरविचन्द्रौ स्फुटौ कृत्वा तिथिमानीय गतगम्यपर्वसु प्राग्वद् ग्रहणं विज्ञेयम् ॥८-११॥

इति मल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

राहुपर्वानयनाधिकारो नाम सप्तमोऽध्यायः ॥

मूलम्— 1. Bod. पर्वणोऽस्मिन् विधिश्च ; D. पर्वणोऽस्मिन् विधिश्च

2. After verse 11, the chapter in A_1. A_2. B. Be. Bo_1. Bo_2. Bod. D. M_2. M_2. S_1. S_2. V_1. V_2. V_3. ends.

व्याख्या—1. Gap left in all the manuscripts.

2. M_1. M_2. षड्विंशति कलाश्च ; S_1. 26

अथ ग्रहोदयास्तमयपौर्णमासीकरणाध्यायो नाम

अष्टमोऽध्यायः

अथ ग्रहोदयास्तमयपौर्णमासीकरणाध्यायो व्याख्यायते ।

[ग्रहोदयास्तमयौ]

ऊनः प्रागुदयं प्रयाति सवितुः प्रागेव चास्तं ग्रहः
पश्चादभ्यधिकोऽर्कसन्निधिवशान्नित्यं प्रवाहेण च ।
दृश्याः प्राचि कुजार्यसूर्यतनयाः पश्चाददृश्यास्सदा
वक्रस्थौ ज्ञसितौ च तौ क्रमगती चन्द्रश्च तद्व्यत्ययात् ॥ १ ॥

चक्रस्य नित्यं प्रवहवायुवशात् सूर्यसन्निकर्षविप्रकर्षाभ्यां च ग्रहाणामुदयास्तमयौ भवतः । तत् प्रवहादि कथमित्युक्ते—सूर्याद् भागादिभिरल्पो ग्रहः सूर्यात् पूर्वमेवोदेति, पूर्वमेवास्तमेति । अधिको ग्रहः सूर्य उदिते तत उदेति, सूर्येऽस्तंगते परतोऽस्तमेति ।

ततो रविवशादुदयास्तमयौ कथमित्युक्ते—प्राच्यां सूर्यात् स्वकालभागैर्भुक्त्या चाल्पग्रह उदेति । ततः स्वकालभागैर्भुक्त्या चाल्पो ग्रहः प्रतीच्यामस्तमेति । ततः स्वकालभागैर्भुक्त्या चाधिको ग्रहः प्राच्यामस्तमेति, स्वकालभागैर्भुक्त्या चाधिको ग्रहः प्रतीच्यामेवोदेतीति ज्ञातव्यम् ।

इत्थं भौमगुरुशनैश्चरा वक्रस्थौ बुधशुक्रौ च प्राच्यामेवोदयं गच्छन्ति । प्रतीच्यामेवास्तं गच्छन्ति । ऋजुमार्गगतौ बुधशुक्रौ चन्द्रश्च प्रतीच्यामेवोदयं गच्छन्ति, प्राच्चामेवास्तं गच्छन्ति ॥ १ ॥

[अयनसंस्कृतग्रहः]

१३९७
शैलाङ्कत्रिकुभिर्यथागतभुजज्योनां त्रिभज्यां हतां
११८१९८४४
विक्षेपेण च वेदवेदवसुगोरूपाष्टरुद्रैर्भजेत् ।
विक्षेपापमयोर्विभिन्नककुभोर्लिप्तादि लब्धं धनं
कर्तव्यं द्युचरे त्यजेत् समदिशोः स्यादायनः स ग्रहः ॥ २ ॥[1]

उदयेऽस्तमये च ग्रहाणामयनदृक्कर्म कथ्यते। तत् कथमित्युक्ते— प्राच्यामुदयेऽस्ते च सूर्योदयकालिकौ रविग्रहौ स्फुटौ कृत्वा [तथा प्रतीच्यामुदयेऽस्ते च सूर्यास्तमयकालिकौ रविग्रहौ स्फुटौ कृत्वा] ग्रहस्य ग्रहसमागमोक्तप्रकारेण स्फुटविक्षेपमानीय ग्रहादयनांशसंस्कृताद् भुजजीवामानीय तां त्रिज्यायां त्यक्त्वा परमक्रान्तिज्यया ततो विक्षेपेणापि हृत्वा त्रिज्यावर्गेणानेन। ११८,१९,८४४। विभजेत्। लब्धं लिप्तादिकं ग्रहे धनं कुर्यात्, ग्रहक्रान्तिविक्षेपयोर्भिन्नदिक्त्वे सति। तुल्यदिक्त्वे तु ग्रहे लब्धलिप्तादिकमृणं कुर्यात्। असावयन[दृक्कर्म]संस्कृतग्रहः स्यात् ॥ २ ॥

[दृक्कर्मशुद्धः ग्रहः]

व्यस्तज्यामथवा गृहत्रययुतात् क्षेपाहतामुद्धरेद्
८४६१
रूपाङ्काब्धिगजैर्ग्रहे धनमृणं कुर्यात् कलाद्युक्तवत्।
अक्षज्यागुणितेऽथ लम्बकहृते क्षेपे फलं सौरिका
१२
जायन्ते रविभिर्हृतेऽथ विषुवच्छायाङ्गुलैर्वा हते ॥ ३ ॥[2]

प्रागृणं स्वमयनग्रहे फलं
सौम्ययाम्यशरसम्भवं सदा।
अन्यथापरकपालसंस्थिते
कारयेदिति भवेत् स दृग्ग्रहः ॥ ४ ॥[3]

मूलम्—1. After verse 2, B. Be. Bo_1. Bo_2. give verse 5.

2. B. Be. Bo_1. Bo_2. om. verse 3.

3. B. Be. Bo_1. Bo_2. om. verse 4. A_1. S. do not give the प्रतीक of 4 but give the commentary.

प्रकारान्तरेणायनदृक्कर्म कथ्यते। तत् कथमित्युक्ते—प्राक् स्फुट-ग्रहादयनसंस्कृतात् त्रिगृहयुक्ताद् भुजस्योत्क्रमज्यामानीय विक्षेपेण हृत्वैतेन भागहारेण। ८४६१। विभजेत्। लब्धं लिप्तादिकं सत्रिभग्रहक्रान्ति-विक्षेपयोर्भिन्नदिक्त्वे ग्रहे योज्यम्। समदिक्त्वे शोध्यम्। अयनदृक्कर्मसंस्कृत-ग्रहः स्यात्।

ततोऽक्षदृक्कर्म कथ्यते। कथमित्युक्ते—अक्षज्यां स्फुटविक्षेपेण गुणितां लम्बज्यया विभजेत्। लब्धं लिप्तादिकं स्यात्। अक्षज्याक्षच्छाययोः सूर्याधीनत्वादर्कभुजफलवदक्षजनितलिप्तादिकस्यापि सूर्यजत्वादेता लब्धकलाः सौरिका इत्युच्यन्ते। एतल्लब्धं लिप्तादिकं स्वकीयोदयलग्नेऽस्तलग्ने च ग्रहे संस्कार्यम्। एतत् स्वदेशे नियतमेवोदयास्तमययोरन्तरकालकलादिकम्। एतत् स्वेष्टनतघ्नं द्युदलाप्तं कलादिकं च ग्रहयोगकाले स्वग्रहे संस्कार्यम्।

एतदाप्तफलं कलादिकं प्रकारान्तरेण कथ्यते। विक्षेपकला [विषु-वच्छाया]ङ्गुलैर्गुणिता द्वादशाप्ता लब्धं प्राग्वत् कलादिकं स्यात्। उत्तरविक्षेपे चेत् प्राच्यामयनदृक्कर्मसंस्कृतग्रहे शोध्यम्, प्रतीच्यां योज्यम्। दक्षिणविक्षेपे चेदेतल्लब्धं कलदिकं प्रतीच्यां ग्रहे शोध्यम्, प्राच्यां योज्यम्।

इत्थमयनाक्षजनितफलद्वयसंस्कृतो ग्रहो दृक्कर्मशुद्धः। स दृग्गोचरः स्यात्॥ ३-४॥

१२ १ १७ ९
कालांशै रविभिः शशी महिसुतोऽत्यष्टचाथ नन्दैः सितः
१३ १५ ११
शाशाङ्किर्गुणभूमिभिरक्षशशभिः सौरिः शिवैरङ्गिराः।
१२ ८
चक्रस्थौ बुधभार्गवौ रवि-गजैः सूर्यान्तरैर्दृश्यतां
यान्ति प्रत्यगिनो भषट्कसहितः कार्यस्तथा दृग्ग्रहः॥ ५॥

उदयेऽस्ते च चन्द्रस्य द्वादश। १२। कालांशाः। भौमस्य सप्तदश। १७। ऋजुगतेर्बुधस्य त्रयोदश। १३। गुरोरेकादश। ११। ऋजुगतेः

मूलम्— 1. A_2. B. Be. Bo_1. Be_2. Bod. D. S_2. V_1. V_2. V_3. क्षितिसुतो

शुक्रस्य नव । ९ । शनैश्चरस्य पञ्चदश । १५ । वक्रगतेर्बुधस्य द्वादश । १२ । शुक्रस्याष्टौ । ८ ।

ग्रहार्कयोरन्तरं स्वकालांशतुल्यं चेत् तदा ग्रहः सूर्यास्तसमयेऽस्तमेति, उदयसमयश्चेदुदेति । प्राच्यां ग्रहोऽर्कात् स्वकालांशतुल्याल्पः स्यात्, प्रतीच्यामधिकः स्यात् । प्रतीच्यामस्तदृक्कर्म[संस्कृत]ग्रहे रवौ च राशिषट्कं युक्त्वा तदन्तरकालानानयेत् ॥ ५ ॥

गम्योऽल्पादसुनिवहोऽधिकाद् गतो यो
मध्यस्थैरसुभिरसौ युतो विधेयः ।
कालांशा गगनरसैर्भजेदमीभि-[1]
श्चोक्ताल्पैर्द्युचरमवेहि तैरदृश्यम् ॥ ६ ॥[2]

प्राच्यामुदये दृक्कर्मकृतस्य ग्रहस्य गम्यासवः, रवेर्गतासवश्च तन्मध्योदयासुभिः सहिताः कार्याः । तेऽर्कग्रहयोरन्तरासवो भवन्ति । प्रतीच्यामस्तदृक्कर्मकृतग्रहस्य राशिषट्कयुतस्य गतासवः, तथार्कस्य राशिषट्कयुतस्य गम्यासवश्च तन्मध्योदयासुभिः सहिताः कार्याः । ते ग्रहार्कान्तरासवः स्युः । ते षष्ट्याप्ताः कालांशाः स्युः । ते स्वकालांशेभ्योऽल्पाश्चेत् तदासौ ग्रहो न दृश्यते, अधिकाश्चेत् तदासौ ग्रहो दृश्यते इति ज्ञातव्यम् ॥ ६ ॥

[स्फुटग्रहोदयास्तमयौ]

उक्तेष्टकालांशविशेषलिप्ता
गत्योर्वियोगेन[3] **हृता दिनानि ।**
विलोमगेऽर्कग्रहभुक्तियुत्या
गतानि गम्यानि च विद्धि युक्त्या ॥ ७ ॥

मूलम्—1. A_2. S_2. V_3. हृता भवेयुः for भजेदमीभिः

2. The reading स्वोक्तात्पाः in place of चोक्ताल्पैः is also found to occur in certain manuscripts. —*KSS*

3. A_2. B. Bo_1. Bo_2. Bod. D. S_2. V_3. भुक्त्यो°

अस्तेऽधिकाः स्युर्ध्रुवकालभागा
गतानि विद्धीह दिनानि तानि ।
[1]अल्पास्तथा गम्य[दिना]नि तानि
तथोदये गम्यगतानि तानि ॥ ८ ॥[2]

पूर्वोक्तेष्टग्रहकालांशध्रुवकालांशान्तरांशाः षष्टिघ्ना असवो भवन्ति। तेऽष्टादशशतैर्गुणिताः । १८०० । ग्रहाक्रान्तराश्युदयासुभिराप्ता लब्धं लिप्ताः प्राच्याम् । प्रतीच्यां चाष्टादशशतैर्गुणिताः षड्भयुतग्रहाक्रान्तराश्युदयासुभिराप्तलब्धं अन्तरलिप्ताः स्युः । ता ग्रहार्कयोर्भुक्त्यन्तरकलाभिर्भजेत् । लब्धं दिनादिकं स्यात् । [ग्रहो वक्री चेद् भुक्तियोगेन विभजेत् । लब्धं दिनादिकं स्यात् ।]

अथवा भुक्त्यन्तरकला भुक्तियोगकला वा प्राच्यां ग्रहाक्रान्तराश्युदयासुभिर्हृत्वा प्रतीच्यां चेत् सषड्भग्रहाक्रान्तराश्युदयासुभिर्हृत्वा राशिलिप्ताभिर्विभजेत् । लब्धं भुक्त्यन्तरं भुक्तियोगो वाऽसुमयो भागहारः स्यात् ।

अनेन भागहारेण पूर्वोक्तषष्टिगुणितान्तरासवो भाज्याः । लब्धं दिनादिकं स्यात् ।

तद्गतगम्यत्वं विज्ञेयम् । तत् कथमित्युक्ते—[ग्रहास्तमये] ग्रहार्कान्तरांशेभ्यो ध्रुवकालांशा यद्यधिकाः स्युस्तदा गतदिनादिकं स्यात् । ध्रुवकालांशा यद्यूनास्तदा गम्यदिनादिकं स्यात् । ग्रहोदये ग्रहार्कान्तरांशेभ्यो ध्रुवकालांशा यद्यधिकाः स्युस्तदा तावद्भिर्दिनैः परतो ग्रहस्योदयः स्यात् । ध्रुवांशा यद्यूनास्तदा लब्धं दिनानि तस्य ग्रहस्योदितदिनानि स्युः । इत्थं ग्रहस्यास्तमयो ग्रहस्योदयो वा ज्ञातव्यो वक्तव्यश्च ॥ ७-८ ॥

मूलम्—1. B. Be. Bo_1. Bo_2. om. अल्पा to तानि, next line.

2. A_2. S_2. V_3. om. verse 8. A_1. S_1. do not give the प्रतीक but have the commentary of 8.

[चन्द्रोदयास्तमयस्फुटकालः]

भवनषट्कयुतेन विवस्वता
भवति चेत् सदृशो हिमदीधितिः ।
समभुदेति तथास्तमुपेयुषा
निशि महानमहानपि वासरे ॥ ९ ॥

शशधरो गृहषट्कसमन्वितो
यदि समो रविणोदयमेष्यता ।
युगपदस्तमुपैति महान् दिवा
निशि लघुः समयोऽत्र च पूर्ववत् ॥ १० ॥

पौर्णमास्यां सूर्यास्तमयकाले षड्भयुतरविणास्तंगच्छतोदयदृक्कर्मद्वयकृतचन्द्रस्तुल्यश्चेत् तच्चन्द्रोदयः सूर्यास्तमयश्चैकदैव स्यात् । षड्भयुतादर्काच्चन्द्रेऽधिके सूर्यास्तमयात् परतश्चन्द्रोदयः स्यात् । चन्द्रेऽल्पे चेत् सूर्यास्तमयात् प्रागेव दिवाशेषे चन्द्रोदयः स्यात् ।

यदा पौर्णमासी सम्पूर्णा तदा पौर्णमास्यन्ते सूर्योदयकालिकसूर्येणास्तदृक्कर्मद्वयकृतचन्द्रो राशिषट्कयुतस्तुल्यश्चेत् तदा सूर्योदयकाल एव चन्द्रास्तमयः स्यात् । तद्राशिषट्कयुतचन्द्रोऽधिकश्चेत् सूर्योदयात् परतश्चन्द्रास्तमयः स्यात् । चन्द्रोऽल्पश्चेन्निशाशेष एव चन्द्रास्तमयः स्यात् ।

तच्चन्द्रार्कयोरल्पस्य गम्यमधिकस्य गतं च तन्मध्योदयासुभिः सहितं षड्भिराप्तं विनाडिकाः स्युः । षष्ट्याप्ता घटिकाः स्युः । इति रविचन्द्रान्तरेण तद्गतगम्यघटिका ज्ञातव्या ॥ ९-१० ॥

अह्नो निशश्च घटिकाभिरितागताभिः
६०
सङ्गुण्य भुक्तिमुडुपस्य खषड्विभक्ताम् ।
कृत्वा क्रमाद्धनमृणं द्युनिशान्तजस्य
दृक्कर्म चापि समयोऽसकृदेव साध्यः ॥ ११ ॥

पूर्वानीतगतगम्यघटिकाभिश्चन्द्रभुक्तिं सङ्गुण्य षष्ट्या विभजेत् । लब्धं लिप्तादिकं स्यात् । दिवाशेषे चन्द्रोदयश्चेत् सूर्यास्तकालिके चन्द्रे तल्लब्धलिप्तादिकं शोध्यम् । अस्तमयात् परतश्चन्द्रोदयश्चेद् योज्यम् । इत्थं स्वोदयकालिकचन्द्रः स्यात् ।

निशाशेषे चन्द्रास्तमयश्चेदुपरितनसूर्योदयकालिके चन्द्रे तल्लब्धं लिप्तादिकं शोध्यम् । सूर्योदयात् परतश्चन्द्रास्तमयश्चेत् सूर्योदयकालिके चन्द्रे योज्यम् । इत्थं तात्कालिकचन्द्रः स्यात् ।

इति स्वोदयास्तकालिकचन्द्रस्य पुनः प्राग्वद् दृक्कर्मद्वयं कृत्वा ततश्चन्द्रस्योदयास्तकालिकसूर्यस्य चान्तरासुघटिका आनीय ताभिश्चन्द्रभुक्तिं सङ्गुण्य षष्टया विभजेत् । लब्धं लिप्तादि तत्सूर्योदयास्तकालिके चन्द्रे प्राग्वत् संस्कुर्यात् । इत्थमसकृत्कर्मणा स्फुटसूर्योदयास्तकालिकचन्द्रः स्यात् । तच्चन्द्रार्कान्तरघटिका अपि स्फुटाः स्युः ॥ ११ ॥

ऊनो विलग्नादधिकोऽस्तलग्नाद्
दृश्यः शशी स्यात् कृतदृष्टिकर्मा ।
यथान्तरेऽर्कग्रहयोस्तथानयोः
प्रसाध्यते यः समयः समुन्नतः ॥ १२ ॥

चन्द्रदर्शनं चन्द्रोन्नतं च कथ्येते । कथमित्युक्ते—स्वेष्टदिनेऽभीष्टकालोदयलग्नं ज्ञात्वा तल्लग्नान्तरसूर्योदयघटिका आनीय ताभिर्घटिकाभिश्चन्द्रं तात्कालिकं कुर्यात् । तच्चन्द्रस्तदुदयलग्नादल्पश्चेत् तदा चन्द्रः स्वपूर्वाह्णे तिष्ठति । तदुदयलग्नं राशिषट्कयुतं च तत्कालास्तलग्नं स्यात् । ततस्तल्लग्नात् प्राग्वत् तात्कालिकचन्द्रोऽधिकश्चेत् तदासौ चन्द्रः स्वापराह्णे तिष्ठति । तस्माच्चन्द्रस्तदा दृश्यो भवति । इत्थं तदुदयलग्नतात्कालिकचन्द्रान्तरघटिकास्तदा चन्द्रस्य भुक्तोन्नतं स्यात् । स्वापराह्णेऽस्तलग्नचन्द्रान्तरघटिकास्तदा चन्द्रस्य भोग्योन्नतं स्यात् ।

इति लग्नकालिकपूर्वापराह्णयोश्चन्द्रस्य पूर्वोक्तप्रकारेण दृक्कर्मद्वयं कृत्वा चन्द्रस्य भोग्यमुदयलग्नस्य भुक्तं तन्मध्योदयसंयुतं चन्द्रस्य स्फुटभुक्तोन्नतं घटिकादिकं स्यात् । ततस्तदस्तलग्नस्य भोग्यमपि पराह्णे चन्द्रस्य भुक्तं तन्मध्योदयसंयुतं तच्चन्द्रस्य स्फुटभोग्योन्नतं घटिकादिकं स्यात् ।

चन्द्रवदेव भौमादीनामपि प्रतिदिनमुदयास्तमयात् सूर्यग्रहान्तरघटिका अपि साध्याः । ततश्चन्द्रवदेव स्वेष्टदिनोदयास्तलग्नाभ्यां रात्रौ भौमादीनां दृश्यत्वं ज्ञात्वा तदा तात्कालिकाः स्फुटोन्नतघटिका अपि साध्याः ॥१२॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
ग्रहोदयास्तमयपौर्णमासीकरणाधिकारो नामाष्टमोऽध्यायः ॥

अथ चन्द्रशृङ्गोन्नत्यधिकारो नाम

नवमोऽध्यायः

अथ चन्द्रशृङ्गोन्नत्यधिकारो व्याख्यायते ।

[चन्द्रस्य क्रान्तिज्या दिनमानं च]

$$\frac{\text{१३}}{\text{शुभ्रभानुभुजशिञ्जिनी हता कृष्णवर्त्मकुमुदाकरप्रियैः}}$$
$$\frac{\text{३२}}{\text{भाजिता नयनपावकैर्भवेत् क्रान्तिमौर्व्यशिशिरद्युतेरपि ॥ १ ॥}}$$

शश्यपक्रमधनुः समान्यदिक्क्षेपयुक्तवियुतं स्फुटं भवेत् ।
शिञ्जिनी च तत इन्द्वपक्रमज्या स्फुटान्यदत उक्तकर्मणा ॥ २ ॥

लघुप्रकारेण क्रान्तिज्या कथ्यते । तत् कथमित्युक्ते—परमक्रान्तिज्या ।१३९७। एषा सप्ताधिकशताप्ता ।१०७। लब्धं त्रयोदश ।१३। गुणकारः । तथा त्रिज्यापि सप्ताधिकशताप्ता लब्धं द्वात्रिंशत् ।३२। भागहारो जातः । स्वेष्टदिने रात्रौ चन्द्रच्छायार्थं तात्कालिकदृक्कर्मसंस्कृताच्चन्द्रादयनांशसंस्कृताद् दोर्ज्यामानीय तां त्रयोदशभिः सङ्गुण्य द्वात्रिंशता विभजेत् । लब्धं चन्द्रक्रान्तिज्या स्यात् ।

इत्थं सूर्यादीनामपि क्रान्तिज्या स्यात् । चन्द्रक्रान्तिज्यां धनुः कृत्वा तत्कालचन्द्रविक्षेपमानीय तत्क्रान्तिधनुःक्षेपयोस्तुल्यदिक्त्वे योगो भिन्नदिक्त्वेऽन्तरं स्फुटक्रान्तिः स्यात् । ततस्तत्क्रान्तिज्या कार्या । सा स्फुटक्रान्तिज्या स्यात् । तद्वर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं द्युरात्रिविष्कम्भदलं स्यात् । ततः पूर्वोक्तप्रकारेण चरज्यां कृत्वा चरार्धमप्यानीय चन्द्रदिनार्धं दिनमानमप्यानयेत् ॥ १-२ ॥

[चन्द्रस्य चरार्धम्]

आयनेतरजदृक्फलोनयुग्
भिन्नतुल्यशरचन्द्रगोलयोः ।
वक्ष्यमाणचरखण्डसाधितं
स्याच्चरार्धमथवैन्दवं स्फुटम् ॥ ३ ॥[1]

प्रकारान्तरेण चन्द्रचरस्फुटं कथ्यते । तत् कथमित्युक्ते—वक्ष्यमाणः

६० ४९
पलद्युतिघ्नाः खरसा नवाब्धयः
२०
खबाहवः स्युश्चरखण्डकासवः ।

[अधिकारः १४, श्लो० ९]

इत्यादिपाठाद् विषुवच्छाया षष्टिगुणिता प्रथमादिचरखण्डकासवो भवन्ति । एतत् त्रयं भुजराशित्रयस्य क्रमेण सूर्यादिग्रहाणां चरार्धसाधनार्थं गुणकारः । तस्मात् तत्कालदृक्कर्मकृतचन्द्राद् भुजराशेः प्रथमचरखण्डं स्यात् । तद्-भुजराशित्रयस्य प्रथममध्यमान्त्यचरखण्डत्रयैक्यं चरखण्डं स्यात् । राशित्रयोने भुजे तदानुपाताच्चरार्धं स्यात् । इत्थं सूर्यस्य स्फुटचरार्धं स्यात् ।

तात्कालिकचन्द्रस्य मध्यचरार्धं स्यात् । तन्मध्यचरार्धमक्षदृक्फलेन संस्कृतं स्फुटं स्यात् । अक्षदृक्फलं कथमित्युक्ते—पूर्वोक्तप्रकारेण चन्द्रमध्य-क्रान्तेश्चरार्धमानीय पुनर्विक्षेपसंस्कृतस्फुटक्रान्तेश्चरार्धमानीय द्वयोश्चरा-र्धयोरन्तरं यत् तदेवाक्षजनितदृक्फलं स्यात् । अस्याऽक्षजनितदृक्फलस्य सुखोपायज्ञानार्थमस्मत्कृतश्लोकः कथ्यते । (व्याख्यानकारश्लोकः—)

१०
क्षेपघ्नाक्षाङ्गुला दिग्भिरसवः क्षेपदिश्यथ ।
तत्संस्कृतं विधोः स्पष्टं चरार्धं चरखण्डजम् ॥

तात्कलिकचन्द्रविक्षेपलिप्ता विषुवच्छायाङ्गुलैर्गुणिता दशभिराप्ता लब्धं स्वाक्षजनितदृक्फलासवो भवन्ति । तत्फलासूनां चन्द्रविक्षेपदिगेव दिक् स्यात् । अयनांशसंस्कृतचन्द्रस्य विक्षेपस्य च दिगैक्ये चेच्चरखण्डसाधित-

---

मूलम्—1. B. Be. Bo_1. Bo_2. om. verse 3. m_3 inserts : अयं व्याख्याकार-श्लोकः । after verse 3. Then क्षेपघ्न ··· ··· चरखण्डजम् । Then verse 4.

स्वाक्षजदृक्फलासुभिर्योगः, भिन्नदिक्त्वेऽन्तरं ज्ञातदिशि स्फुटचरार्धासवो भवन्ति । तच्चरार्धेन चन्द्रदिनार्धं दिनमानं च ज्ञातव्यम् । इत्थमेव भौमादीनामपि स्फुटचरार्धं साधयेत् ॥ ३ ॥

[चन्द्रशङ्कुः]

अर्कवत् स्वदिनयातयेययोः
शङ्कुरस्य धनुषोऽर्कपूर्ववत् ।
सिद्धदृग्गतिकलोनितस्य या
ज्या स्फुटः स खलु शङ्कुरैन्दवः ॥ ४ ॥[1]

सूर्यवदेव चन्द्रस्योन्नतासुषूत्तरचरदलासवः शोध्याः, दक्षिणचरदलासवश्चेद् योज्याः । ततो जीवामानीय द्युज्यया हृत्वा त्रिज्यया हृत्वा ततस्तत्रोत्तरक्षितिज्या योज्या । दक्षिणक्षितिज्या चेच्छोध्या । असौ छेदः स्यात् । तल्लम्बज्यया हृत्वा त्रिज्यया विभजेत् । लब्धं शङ्कुजीवा स्यात् । तद्धनुः कृत्वा पृथक् क्षिपेत् । पुनः शङ्कुजीवावर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं दृग्ज्या स्यात् ।

ततः सूर्यग्रहणोक्तप्रकारेण चन्द्रोन्नतघटिकाकाले—

तिथ्यन्तं रजनीदलेन सहितं कृत्वा समार्धम् ।

[अधिकारः ६, श्लो० २]

इत्यादिपाठेन मध्यज्यामुदयज्यया हृत्वा त्रिज्यया विभजेत् । लब्धवर्गमध्यज्यावर्गान्तरान्मूलं दृक्क्षेपः स्यात् । एतद्वर्गदृग्ज्यावर्गान्तरान्मूलं दृग्गतिजीवा स्यात् । तां पञ्चविंशत्यधिकपञ्चशतेन हृत्वा । ५२५ । चन्द्रस्फुटयोजनकर्णेन विभजेत् । लब्धं सिद्धदृग्गतिकलादिकं स्यात् । तत्-परमफलं त्रिपञ्चाशद् विलिप्ताः स्युः । ५३ । तत्सिद्धदृग्गतिकलादिकं प्रागानीतशङ्कुधनुर्लिप्ताभ्यस्त्यक्त्वा तथा पुनर्जीवामानयेत् । असौ चन्द्रस्य तात्कालिकस्फुटशङ्कुः स्यात् ।

अथवा स्थूलमार्गेण सिद्धदृग्गतिकलार्थं चन्द्रस्फुटभुक्तिलिप्ताः पञ्चदशभिर्विभजेत् । लब्धं लिप्तादिकं प्रागानीतशङ्कुधनुर्लिप्ताभ्यस्त्यक्त्वा ततो जीवामानयेत् । असौ चन्द्रस्य स्फुटशङ्कुः स्यात् ।

इत्थं रवेर्भौमादीनामपि दृग्गतिजीवामानीय तां भूव्यासार्धयोजनैरेभिः । ५२५ । सङ्गुण्य स्वस्वस्फुटयोजनकर्णेन विभजेत् । लब्धं स्वस्वदृग्गतिकलादिकं स्यात् ।

मूलम्— 1. After verse 4, the chapter in A_1. S_1 ends.

अथवा स्वभुक्तिलिप्ताः पञ्चदशभिर्विभजेत् । लब्धं दृग्गतिकलादिकं स्यात् । तत्कलादिकं प्राग्वत् स्वशङ्कुधनुर्लिप्ताभ्यस्त्यक्त्वा ततो जीवामानयेत् । स्फुटशङ्कुः स्यात् ।

स्फुटशङ्कुवर्गत्रिज्यावर्गान्तरान्मूलं तत्कालस्फुटदृग्ज्या स्यात् । सा द्वादशगुणिता स्फुटशङ्कुभक्ता लब्धं तत्कालच्छायाङ्गुलानि स्युः । त्रिज्या द्वादशगुणिता स्फुटशङ्कुभक्ता लब्धमिष्टच्छायाकर्णाङ्गुलानि स्युः ॥ ४ ॥

[चन्द्रच्छाया]

स्वद्युखण्डसदृशो यदोन्नतः
स्यात् तदा गगनमध्यगः शशी ।
तत्र चोक्तवदहर्दलप्रभा
चन्द्रवच्च भनभःसदामपि ॥ ५ ॥[1]

यदा चन्द्रस्योन्नतघटिकाः स्वदिनार्धतुल्यास्तदा चन्द्रो मध्यस्थो भवति । ततश्चन्द्रक्रान्त्यक्षांशानां दिगैक्ये योगो भिन्नदिक्त्वेऽन्तरं नतांशा भुजः स्यात् । तच्छुद्धनवतिरुन्नतांशाः कोटिः स्यात् । तत्कोटिभागानां जीवा कार्या । असौ शङ्कुः स्यात् । तद्भुजनतांशानां जीवा कार्या । असौ दृग्ज्या स्यात् । सा दृग्ज्या त्रिज्या च द्वादशगुणिता शङ्कुभक्ता लब्धं क्रमाच्चन्द्रस्य मध्याह्नच्छायाकर्णौ स्याताम् । इत्थं रात्रौ चन्द्रस्य च्छायां साधयेत् ।

तथा भौमादीनामश्विन्यादिनक्षत्राणामपि चन्द्रवदेव नतोन्नतघटिका आनीय तत्कालस्फुटशङ्कुं दृग्ज्यामप्यानीय रात्रावभीष्टकाले भौमादीनामश्विन्यादीनामपि छायां तत्कर्णमप्यानीय तच्छायाज्ञानार्थं

कोटचग्रात् स्वदिशि भुजं निधाय सम्यक्
तस्याग्रे नरम् । (४. ४७)

इत्यादिवृत्तद्वयोक्तव्याख्यानप्रकारेण तत्कालच्छायाग्रे स्थित्वा तत्कर्णसूत्रानुगतदृष्ट्या स्थापितस्तम्भशङ्क्वग्रे भौमाद्यानश्विन्याद्यं वा तारकं पश्येत् । इत्थं रात्रौ छायासाधितकाले तत्तारकं शङ्क्वग्रे दृश्यते ।

तदा तस्य तारकस्योन्नतकाललग्नं स्यात् । रात्रौ छायात उन्नतकाललग्नकामी चेत् स्तम्भाग्रात् सूत्रं तत् तारकं पश्यन् भूमौ स्थापयेत् । सूत्रस्थापितस्थानस्तम्भमूलपर्यन्तमङ्गुलनि तात्कालिकी छाया स्यात् । तत्

मूलम्—1. After verse 5, the chapter in B. Be. Bo_1. Bo_2. Bod. D. V_1. V_3. ends. A_1. S_1 omit verse 5.

सूत्रमेव च्छायाकर्णाङ्गुलानि स्युः। तच्छायाकर्णेन प्राग्वदुन्नतघटिका आनीय ततस्तात्कालिकं लग्नमानयेत्। भौमादितारकमपि सूर्यमध्यरात्रिकं दृक्कर्मद्वयकृतं तात्कालिकं परिकल्प्य प्राग्वत् तत्तारकस्य क्रान्तिचरदलादिकमानयेत्। इति भौमादीनां रात्रिच्छायापरिज्ञानम्।

चन्द्रस्य रात्रिच्छायायां विशेषो ज्ञातव्यः। रात्रौ स्वेष्टकालिक-चन्द्रच्छाया सुव्यक्तैव। तच्छायावर्गशङ्कुवर्गयोगान्मूलं छायाकर्णः स्यात्। तात्कालिको चन्द्रो न ज्ञायते। तस्माच्चन्द्रज्ञानार्थं तदिष्टकालिकचन्द्रो ज्ञातव्यः। तत् कथमित्युक्ते—तस्यां रात्रौ चन्द्रं मध्यरात्रिकं स्फुटं कृत्वा तस्य तात्कालिकदृक्कर्मद्वयं कृत्वा अन्यत्र स्थापयेत्। तस्मिन् दिने यस्मिन् नक्षत्रे स्थितः सूर्योऽस्तं याति तन्नक्षत्राच्चतुर्दशनक्षत्रं सूर्यास्तमयकाल उदेति। तत् सूर्याच्चतुर्दशनक्षत्रमेव यदा खमध्यगं भवति रात्रौ तदा सामान्येन सूर्यस्य मध्यरात्रिकालः स्यात्।

तदा चन्द्रोऽपि तात्कालिककर्मकृतस्थित एवाभीष्टच्छायाकाले तच्चतुर्दशनक्षत्रं खमध्यात् प्राग् दृश्यते। तदा तन्नक्षत्रस्य खमध्यादुद्देशतः प्राङ्नत-घटिकाभिश्चन्द्रभुक्ति सङ्गुण्य षष्ट्या विभजेत्। लब्धं लिप्तादिकं मध्यरात्रिकदृक्कर्मकृते शोध्यम्। स्वेष्टच्छायाकालिकश्चन्द्रः स्यात्। ततो यदा चतुर्दशनक्षत्रं खमध्यात् प्रत्यग् दृश्यते तदा तन्नक्षत्रस्य प्रत्यङ्नतघटिका-भिश्चन्द्रभुक्ति सङ्गुण्य षष्टया विभजेत्। लब्धं लिप्तादिकं तन्मध्यरात्रिकचन्द्रे योज्यम्। स्वेष्टच्छायाकालिकश्चन्द्रः स्यात्।

तच्छायाकालिकचन्द्रात् क्रान्तिचरदलादिकमानीय स्वेष्टकालिकच्छा-यार्कर्णेन प्राग्वद् द्युगतघटिका आनीय द्युगतात् प्राग्वच्छायामानयेत्। सा छाया स्वेष्टकालिकच्छायातुल्या चेच्चन्द्रोऽपि स्फुट। चन्द्रद्युगतमपि स्फुटमेव।

आनीतच्छाया पूर्वच्छायातोऽपि संवादिनी न चेत् तात्कालिक-चन्द्रस्य पुनर्दृक्कर्म कृत्वा पूर्ववत् स्वेष्टच्छायाकर्णेनैव द्युगतमानयेत्। इत्यसकृत्-कर्मणा द्युगतच्छायां पूर्वतुल्यां साधयेत्। तदा चन्द्रश्चन्द्रद्युगतं स्फुटं स्यात्।

तद्द्युगताल्लग्नमानयेत्। तल्लग्नं स्वेष्टच्छायाकालिकं स्फुटं स्यात्। इति रात्रिच्छायापरिज्ञानमुक्तम्।

अथवा स्वेष्टच्छायाकालिकचन्द्रज्ञानम्। रात्रौ स्वेष्टदिने चन्द्रनक्षत्रं ज्ञात्वा तन्नक्षत्रस्य सूर्योदयघटिकाश्चन्द्रच्छायाकाले यावत्यो गतास्तावत्यो घटिका उद्देशतो ज्ञात्वा तद्घटिकाकाले चन्द्रो ज्ञातव्यः। तच्चन्द्रात् प्राग्वदसकृच्छायां साधयेत्॥ ५॥

[चन्द्रस्य शृङ्गमानम्]

शुक्लपक्षदिवसे द्वितीयके
भास्वदस्तसमये प्रसाधयेत् ।
[1]तिग्मशीतकिरणौ परिस्फुटौ
शृङ्गमानमवगन्तुमैन्दवम् [2]॥ ६ ॥

शुक्लपक्षे द्वितीयायां चन्द्रशृङ्गोन्नतिज्ञानार्थं सूर्यास्तमयकाले मध्यरविचन्द्रचन्द्रोच्चराहूनानीय तौ रविचन्द्रौ स्फुटौ कृत्वा चन्द्रस्यास्तविधिना दृक्कर्मद्वयं कृत्वा ततो रविचन्द्रयोः क्रान्तिज्ये आनीय चन्द्रक्रान्तिज्यां धनुः कृत्वा स्वविक्षेपे संस्कृत्य ततस्तज्ज्यामानयेत् । चन्द्रस्फुटक्रान्तिज्या स्यात् । चन्द्रार्कयोः षड्राशिः संयोज्यः । तदर्कभोग्यं चन्द्रभुक्तं च मध्योदयसहितं तद्द्वितीयायां सायं चन्द्रोन्नतः स्यात् । अन्यतिथिषु रवीन्द्वोरल्पस्य भोग्यमधिकस्य भुक्तं च तन्मध्योदयसहितं तत्कालचन्द्रोन्नतः स्यात् । ततः प्राग्वच्चन्द्रस्फुटक्रान्तिज्यया चरखण्डैश्चन्द्रस्य स्फुटचरदलमानयेत् ॥ ६ ॥

तिग्मशीतमहसोरपक्रम-
ज्ये हते त्रिभगुणेन भाजिते ।
लम्बकेन भवतोऽग्रकागुणौ
चन्द्रशङ्कुतलमुक्तवद् [3]धनुः ॥ ७ ॥

अग्रकानृतलयोः समाशयोः
संयुतिर्वियुतिरन्यदिक्स्थयोः ।
चन्द्रयोर्भवति बाहुरैन्दवो-
ऽग्रैव भास्करभुजस्ततोऽन्यदा [4]॥ ८ ॥

मूलम्—1. V_3. om. तिग्म·····वम्, next line.

2. A_1. B. Be. Bo_1. Bo_2. Bod. D. S_1. V_1. V_3. begin a new chapter from verse 6.
A_1. S_1. om. प्रतीक of verse 6. But A_1. gives the commentary.

3. M_1. M_2. M_3 °स्वनुः [The reading स्वनुः is better. —*KSS*]

4. After verse 8, B. Be. Bo_1. Bo_2. Bod. D. V_3. insert :
भास्वदस्तसमये तथोदये बाहुशङ्कुतलमग्रया तया ।
स्पष्टतां शशिभुजस्य कारयेदन्यदार्कनृतलेन युक्तया ॥
Then verse 9.

रवीन्द्वोः क्रान्तिज्ये पृथक् पृथक् त्रिज्यया सङ्गुण्य लम्बज्यया विभजेत्। लब्धं स्वकीयाग्रज्ये भवतः। ततश्चन्द्रोन्नतघटिकानाम् "उन्नताश्चरदलेन वर्जिताः संयुता" (४. २४) इत्यादित्रिप्रश्नोक्तपाठेन तत्कालशङ्कुमानीय पृथक् स्थापयेत्। धनुः[1] स्वशङ्कोरित्यर्थः।

तच्चन्द्रशङ्कोरपि "इष्टच्छायाशङ्कुरक्षप्रभाघ्नः स्वशङ्क्वग्रम्" (४.४९) इत्यादित्रिप्रश्नोक्तप्रकारेण शङ्कुतलमानयेत्। असौ चन्द्रशङ्कुतलं स्यात्। तच्छङ्कुतलचन्द्राग्रयोर्दिगैक्ये योगो, भिन्नदिक्त्वेऽन्तरं स्वदिशि चन्द्रभुजः स्यात्। [अर्काग्रज्ययाऽर्कभुजस्स्यात्।] इत्थं शुक्लद्वितीयायां चन्द्रार्कयोर्भुजौ प्रोक्तौ। अन्यतिथिषु शृङ्गोन्नत्यर्थं वृत्तपाठेन कथ्यते ॥७-८॥

प्राक्कपालयुजि शीतदीधितौ
लग्नमिष्टसमयादथानयेत्।
योजयेच्चरदलेन[1] पश्चिमे
साधयेद्रविवदग्रकां ततः ॥ ९ ॥

ग्रहोदयास्तयोर्यथोक्तप्रकारेण चन्द्रोदयं साधयित्वा तच्चन्द्रोदयात् परतोऽभीष्टकाले चन्द्रं तात्कालिकं कृत्वा तच्चन्द्रे स्वपूर्वाह्णे हि चेत् तत्काललग्नमानयेत्। तथा तत्कालचन्द्रेऽपराह्णे चेत् तत्काललग्नमानीय तत्र राशिषट्कं योज्यम्। ततस्तत्कालगे चन्द्रे दृक्कर्मद्वयं कृत्वा पुनः "ऊनो विलग्नादधिकः" (८. १२) इत्युक्तेरल्पस्य भोग्यमधिकस्य भुक्तं च मध्योदयसहितं तत्कालचन्द्रोन्नतं स्यात्।

अथवा स्वेष्टकालसूर्योदयादिष्टघटिकानां लग्नमानयेत्। तदेव तत्कालोदयलग्नं स्यात्। तत्सूर्योदयादिष्टघटिकाभिश्चन्द्रं तात्कालिकं कुर्यात्। तत्कालचन्द्रस्य दृक्कर्मद्वयं कुर्यात्। तच्चन्द्रे स्वपूर्वाह्णगे चेत् तच्चन्द्रभोग्यं तत्कालोदयभुक्तं च तन्मध्योदयसहितं चन्द्रस्य भुक्तोन्नतं स्यात्। तद्दृक्कर्मकृततत्कालचन्द्रेऽपराह्णगे चेत् तत्कालोदयलग्ने राशिषट्कं योज्यम्। तदेव तत्कालास्तलग्नं स्यात्। ततस्तल्लग्नभोग्यं तच्चन्द्रभुक्तं च मध्योदयसहितं तच्चन्द्रभोग्योन्नतं स्यात्। ततः प्राग्वदेव "उन्नताश्चरदलेन" (४. २४) इत्यादिपाठेन चन्द्रशङ्कुं चन्द्राग्रज्यां शङ्कुतलं चानीय तद्योगान्तराभ्यां प्राग्वच्चन्द्रभुजमानयेत्।

मूलम्— 1. There should be योजयेच्च भदलेन in place of योजयेच्चरदलेन। —*KSS*

व्याख्या—1. The correct reading is स्वनुः (=स्वशङ्कोः) and not धनुः। —*KSS*

ततश्चन्द्रे पूर्वाह्णगे तत्कालोदयलग्नमेव रविं परिकल्प्य तत्रायनभागान् संस्कृत्य दिग् ज्ञात्वा तद्भुजादर्कवत् क्रान्तिज्यामानीय त्रिज्यया सङ्गुण्य लम्बज्यया विभजेत्। लब्धमग्रज्या स्यात्। असौ रवेर्भुजः स्यात्। इत्थं शुक्लद्वितीयायाम्। अन्यतिथिषु स्वेष्टकालशृङ्गोन्नत्यर्थं रवीन्द्वोर्भुजौ भवतः ॥ ९ ॥

तां भुजां दिनकरस्य कल्पयेत्
तद्युते शशिभुजेऽन्यदिग्गते।
चन्द्रसूर्यभुजयोः समाशयो-
र्जायते यदवशेषमन्तरे ॥ १० ॥

स्यात् स्फुटस्तु स भुजोऽत्र योगजे
चन्द्रबाहुदिगथो वियोगजे।
शीतदीधितिभुजेऽधिकेऽपि वा
व्यत्ययेन सवितुर्भुजेऽधिके ॥ ११ ॥[1]

शुक्लद्वितीयायां रवीन्द्वोर्भुजयोर्वान्यतिथिषु रवीन्द्वोर्भुजयोर्भिन्नदिक्त्वे योगः, समदिक्त्वेऽन्तरं स्फुटभुजः स्यात्। भिन्नदिक्त्वे चन्द्रबाहुदिगेव तस्य दिक्। समदिक्त्वे तस्य दिग् ज्ञेया। कथमित्युक्त्वे—समदिग्भुजयोश्चन्द्रभुजेऽधिके चन्द्रभुजदिगेव शेषस्फुटभुजस्य दिक् स्यात्। तत्समदिग्भुजयोरेव चन्द्रभुजेऽल्पे तद्व्यस्तदिगेव शेषस्फुटभुजस्य दिक् स्यात्। इति स्फुटभुजे दक्षिणे चेत् तदा उत्तरशृङ्गमुन्नतं स्यात्। उत्तरस्फुटभुजे चेत् तदा दक्षिणशृङ्गमुन्नतं स्यात्। समदिग्भुजयोरन्तरं निःशेषं चेद् द्वयोः शृङ्गयोः समत्वमेव स्यात्।

निजबाहुकृतिवियुक्ताद् दृग्ज्यावर्गात् स्वकात् स्वकान्मूले।
युतिवियुते रविशशिनोरेकान्यकपालयोः प्रथमः ॥
अहनि रविचन्द्रशङ्क्वोरन्तरमन्यः समागमो रात्रौ।
प्रथमान्यकृतियुतपदं कोटिः पूर्वापरा भवति ॥

मूलम्— 1. After verse 11, Bod. D. ins. निजबाहु·····भवति ॥ (see com. verses below).
After verse 11, V_1. ins. निजबाहु·····भवति। A_1. S_1. V_1. give commentary of both.

व्याख्या—1. M_1. M_2. have निजबाहुकृति। Then lacuna. Restored from other Mss.

शिष्यधीमहातन्त्रे लल्लाचार्यमते भुजकोटिपरिज्ञानमुक्तम् । इदानीमेतदार्याद्वयं ब्रह्मसिद्धान्तमतेऽभीष्टकालस्फुटकोटिज्ञानार्थमत्र लिखितम् । तत् कथमित्युक्ते—शुक्लद्वितीयायां सूर्यास्तमयकालेऽपि कृष्णचतुर्दश्यां रात्रौ सूर्योदयात् प्रागपि सूर्यस्य छाया शङ्कुकर्णः स्यात् । तस्मात् तत्कालशङ्कुरेव शङ्कुः स्यात् । एवं स्फुटभुजस्य पूर्वापरकोटिः स्यात् । [अन्यतिथिषु स्वेष्टकालरवीन्द्वोर्भुजाभ्यां तत्कालशङ्कुभ्यां च स्फुटभुजः पूर्वापरकोटिश्च कल्प्यते ।] तत् कथमित्युक्ते—पूर्वोक्तप्रकारेण स्वेष्टकालचन्द्रोन्नतकालिकचन्द्रशङ्कुमानीय तं पृथगपि संस्थाप्य ततस्तद्वर्गं त्रिज्यावर्गात् त्यक्त्वा मूलं चन्द्रदृग्ज्या स्यात् । तथा स्वेष्टकालः सूर्यदिनं चेत् तत्कालसूर्योन्नतं ज्ञात्वा सूर्यशङ्कुं दृग्ज्यां चानयेत् । स्वेष्टकालः सूर्यरात्रिश्चेत् तत्काल इष्टदिनमानं त्यक्त्वा शेषं रविद्युगतं परिकल्प्य [निशार्धमपि दिनार्धं परिकल्प्य] चरदलमपि वृत्तदिवकं परिकल्प्य तदनुरूपोन्नतं ज्ञात्वा "उन्नताच्चरदलेन" (४.२४) इत्यादिना तात्कालिकशङ्कुं दृग्ज्यां चानयेत् । इत्थं रात्रौ रविशङ्कुदृग्ज्या च । अनेन प्रकारेण तात्कालिकरवीन्द्वोः स्वभुजशङ्कुदृग्ज्याः साध्याः । तत्सूर्यभुजवर्गं सूर्यदृग्ज्यावर्गे त्यक्त्वा मूलमानीय इन्दोर्भुजवर्गं स्वदृग्ज्यावर्गात् त्यक्त्वा मूलमानीय रवीन्द्वोरेककपालस्थयोस्तन्मूलयोर्द्वयोर्योगः, भिन्नकपालस्थयोरन्तरम् प्रथमो राशिः स्यात् । तत्स्वाभीष्टकपालं रविदिनं चेत् तत्कपालरवीन्द्वोः शङ्क्वोरन्तरम्, रात्रिश्चेद् योगः, इति योगोऽन्तरं वा द्वितीयराशिराह्वयः । तत्प्रथमाख्यवर्गयोर्योगान्मूलं कोटिरित्युच्यते । असौ स्फुटभुजस्याभीष्टकालिकस्फुटकोटिः स्यात् । असावेव पूर्वापरस्फुटचन्द्रशङ्कुः स्यात् ।

रवीन्द्वोर्भिन्नकपालयोश्चेत् तदा दृग्ज्याजनितमूलयोस्तुल्यदिक्त्वे प्रथमराशेरभावो द्वितीयान्यराशिरेव कोटिः स्यात् । तथा दिवा रवीन्द्वोः शङ्क्वोस्तुल्यत्वे द्वितीयान्यराशेरभावात् तदा प्रथमराशिरेव पूर्वापर-[स्फुट] कोटिः स्यात् ।

इत्युक्तस्फुटकोटिसाधनप्रकारेण पूर्वोक्तशिष्यधीप्रकारेणापि स्वेष्टकाले शृङ्गोन्नतिः साध्या । प्रत्यक्षदृष्टस्फुटप्रत्ययप्रकारो ज्ञातव्यः ॥ १०-११ ॥

कोटिमाहुरथ शङ्कुमैन्दवं
तद्भुजाकृतियुतेः पदं श्रुतिः ।
२००
अङ्गुलानि खनखैर्विभाजिताः
सन्ति ते श्रवणकोटिबाहवः ॥ १२ ॥

शुक्लद्वितीयायां सूर्यास्तमयकाले, कृष्णचतुर्दश्यां सूर्योदयकाले शृङ्गोन्नतौ तत्कालचन्द्रशङ्कुरेव कोटिः स्यात्। अन्यतिथिषु पूर्वोक्तार्याद्वयोक्तस्फुटकोटिर्वाभीष्टकालकोटिः स्यात्। तत्कोटिवर्गस्फुटभुजवर्गयोर्योगान्मूलं श्रुतिः स्यात्।

भुजकोटिकर्णाः पृथक् पृथक् एतद्[? ख]द्वयेन भक्ता लब्धमङ्गुलादिका भुजकोटिकर्णाः स्युः ॥ १२ ॥

व्यर्कशीतकरभागसञ्चयः
शुक्लमिन्दुदलसङ्गुणो भवेत्।
व्योमनन्दविहृतः सितासितं[1]
तद्वदेव भगणार्धवर्जितम् ॥ १३ ॥

शुक्लपक्षे शृङ्गोन्नतिकालचन्द्रे रविं त्यक्त्वा शेषराश्यादिकमंशीकृत्य तद्भागराशिं चन्द्रबिम्बाङ्गुलार्धसङ्ख्यया सङ्गुण्य नवत्या विभजेत्। लब्धमङ्गुलादिकं शुक्लं स्यात्। तथा **कृष्णपक्षे** तत्कालिकचन्द्रे रविं त्यक्त्वा ततो राशिषट्कं त्यक्त्वा तच्छेषभागराशिं चन्द्रबिम्बाङ्गुलार्धसङ्ख्यया सङ्गुण्य नवत्या विभजेत्। लब्धमङ्गुलादिकं कृष्णं स्यात्। इति शुक्लाष्टम्याः प्राक्। कृष्णाष्टम्याः परतोऽपि शुक्लशृङ्गोन्नतिः स्यात्। तथा शुक्लाष्टम्याः परतः कृष्णाष्टमीपर्यन्तं कृष्णशृङ्गोन्नतिः स्यात् ॥१३॥

रविशीतकरान्तरांशजीवा
विपरीता शशिखण्डताडिता वा।
विहृता त्रिभजीवया सितं स्या-
च्छशलच्माङ्गवदङ्गुलानि तस्मिन् ॥ १४ ॥

रवीन्द्वोः परमान्तरं राशिषट्कमेव। तस्माच्छुक्लद्वितीयायाः परतः पौर्णमासीपर्यन्तं चन्द्रे रविं त्यक्त्वा तच्छेषराश्यादिकं रवीन्द्वोरन्तरं स्यात्। पौर्णमास्याः परतोऽमावास्यापर्यन्तं रवौ चन्द्रं त्यक्त्वा तच्छेषं रवीन्द्वोरन्तरं स्यात्। इति तदन्तरं ज्ञात्वा शृङ्गोन्नतिकाले रवीन्द्वोरन्तरभागानां नवतिपर्यन्तमुत्क्रमज्या कार्या। नवतेरधिकाश्चेत् तदधिकभागानां क्रमजीवा कर्तव्या। [तां] त्रिज्यायां युञ्ज्यात्। असावुत्क्रमज्या स्यात्। इति रवीन्द्वोरन्तरभागानामुत्क्रमज्या चन्द्रबिम्बार्धलिप्ताभिर्गुणिता त्रिज्यया भक्ता लब्धं लिप्तादिकं शुक्लं स्यात्। इति शुक्लपक्षे।

मूलम्—1. There is another reading सितेऽसिते which is better. —*KSS*

कृष्णपक्षे च लब्धं कृष्णमेव स्यात् । तत् कथमित्युक्ते—पौर्णमास्यां रवीन्द्वोरन्तरभागानामुत्क्रमज्या त्रिज्या । चन्द्रबिम्बार्धलिप्ताभिर्गुणिता त्रिज्यया भक्तं लब्धं शुक्ललिप्तादिकं सम्पूर्णं चन्द्रबिम्बं स्यात् । तथामावास्यान्तेऽन्तरभागानामभावादुत्क्रमज्या न स्यात् । तस्माल्लब्धशुक्लं न स्यात् । तदा चन्द्रः सर्वकृष्णः स्यात् ।

वाशब्देन शुक्लानयनं प्रकारान्तरेणोक्तम् । प्रागुक्तशुक्लं स्थूलम् । तदेव रात्रिशृङ्गोन्नतौ समीचीनम् । इदानीन्तनशुक्लं सूक्ष्मम् । एतद् दिवाशृङ्गोन्नतौ समीचीनम् । सन्ध्याकालशुक्लद्वययोगार्धं तत्कालशृङ्गोन्नतौ समीचीनं शुक्लं स्यात् । इति लब्धशुक्ललिप्ताभ्यश्चन्द्रग्रहणोक्तप्रकारेण शुक्लाङ्गुलानि कर्तव्यानि ॥ १४ ॥

यच्चिह्नं समभुवि भानुमान् स तस्माद्
दातव्यः स्वदिशि भुजस्ततोऽपि कोटिः ।
प्रागिन्दावपरककुड्मुखी[1] प्रतीच्यां
प्रागग्राद् दिनकरचिह्नतश्च कर्णः ॥ १५ ॥

श्रवणकोटियुतौ शशिमण्डलं
श्रवणसूत्रमिहापरपूर्वकम् ।
ऋषवशेन च शेषदिशौ ततः
खटिकया सुस्परिस्फुटमालिखेत् ॥ १६ ॥

दिक्साधितसमभूमौ दिङ्मध्ये बिन्दुं दत्वा तद्रवि परिकल्प्य तद्बिन्दुतो दक्षिणोत्तररेखायां स्फुटभुजाङ्गुलानि शुक्लपक्षे स्वदिशि प्रसारयेत् । कृष्णपक्षे भिन्नदिशि प्रसार्याग्रे बिन्दुं दद्यात् । तद्भुजाग्रबिन्दुतः कोटिं चन्द्रे पूर्वाह्णगे प्राक् प्रसारयेत् । अपराह्णे प्रत्यक् प्रसार्याग्रे बिन्दुं दद्यात् । ततो दिङ्मध्यबिन्दुतः कर्णं तिर्यक् प्रसार्य कोटयग्रबिन्दुमध्ये न्यसेत् । तत्कोटयग्रकर्णाग्रयोगस्थाने बिन्दुं दद्यात् । तद्बिन्दुं मध्यं कृत्वा तात्कालिकचन्द्रबिम्बाङ्गुलार्धप्रमाणसूत्रेण चन्द्रमण्डलं विलिख्य तन्मन्मण्डलमध्यात् कर्णसूत्रं प्रत्यक् प्रसार्य चन्द्रमण्डलपश्चिमपरिधौ न्यसेत् । तदा कर्णसूत्रमेव पूर्वापररेखा स्यात् । तत्पूर्वापररेखायां चन्द्रमण्डले प्रतीच्यां प्राच्यां च बिन्दुं दद्यात् । तद्बिन्दुद्वयं मध्यं कृत्वा पृथक् पृथक् चन्द्रमण्डलाङ्गुलप्रमाणसूत्रेण मण्डलद्वयं विलिखेत् । तत्र दक्षिणोत्तरस्थितमत्स्यमुत्पद्यते ।

मूलम्— 1. D. °ककुप्सु वा प्रतीच्यां

तन्मत्स्यमध्ये मुखपुच्छसक्तं सूत्रमेकं प्रसारयेत् । तदा तत्सूत्रं दक्षिणोत्तर-रेखा स्यात् । तस्यां रेखायां चन्द्रमण्डलदक्षिणोत्तरयोर्विन्दू दद्यात् । इत्येतत् समभूमौ सुव्यक्तं विलिखेत् ॥ १५-१६ ॥

अपरतः श्रवणेन सितं नये-
दसितमप्यसिते सितदीधितौ ।
धनददिग्भवदक्षिणदिग्भवैः
परिधिभिर्जनयेच्च ऋषद्वयम् ॥ १७ ॥

तिमियुगमुखपुच्छसक्तरज्ज्वो-
र्भवति च यत्र समागमः प्रदेशे ।
तत उडुपतिलग्नशुक्लचिह्नं[1]
समभिलिखेत् सितसिद्धये सुवृत्तम् ॥ १८ ॥[2]

चन्द्रमण्डलपञ्चमविन्दुतः कर्णरेखामार्गेण शुक्लाङ्गुलानि प्राक् प्रसार्याग्रे विन्दुं दद्यात् शुक्लपक्षे । तथा कृष्णपक्षे कृष्णाङ्गुलान्यपि प्रसार्याग्रे प्रागेव विन्दुं दद्यात् । तद्विन्दुतः प्रत्यग्भागः कृष्णपक्षे शुक्लखण्डम् , शुक्लपक्षे शुक्लाग्रविन्दुतः पूर्वभागः कृष्णखण्डमिति, शुक्लकृष्णाग्रविन्दुं चन्द्रमण्डलदक्षिणोत्तरविन्दुद्वयं [च मध्यं] कृत्वा पृथक् पृथक् चन्द्र-मण्डलार्धाङ्गुलप्रमाणसूत्रेण वृत्तत्रयं विलिखेत् । तत्र पूर्वापरस्थितमत्स्यद्वय-मुत्पद्यते । तन्मत्स्यद्वयमध्ये पृथक् पृथक् सूत्रं स्वमुखपुच्छसक्तं कृत्वा स्वगत्या तत्सूत्रद्वयमष्टम्याः प्राक् तिथिषु प्रागेव प्रसार्य तत्सूत्रयोगस्थाने विन्दुं दद्यात् । तथैवाष्टम्याः परतिथिषु तन्मत्स्यद्वयमुखपुच्छसक्तसूत्रद्वयं स्वगत्या प्रत्यगेव प्रसार्य तत्सूत्रद्वययोगस्थाने विन्दुं दद्यात् । तत्सूत्रद्वययोगस्थान-विन्दुतोऽन्यत्सूत्रं शुक्लकृष्णाग्रविन्दुपर्यन्तं प्रसार्य तत्सूत्रेण चन्द्रमण्डल-दक्षिणोत्तरविन्दुद्वयस्पृगर्धवृत्तं विलिखेत् । तद्वृत्तरेखया चन्द्रमण्डलं खण्डितं स्यात् । तत्र शृङ्गोन्नतिकाले कृष्णखण्डं च शुक्लखण्डं च सुव्यक्तं स्यात् । तयोरष्टम्याः प्रागेव शुक्लशृङ्गोन्नतिः । अष्टम्याः परतः कृष्णशृङ्गोन्नतिरेव विज्ञेया । शुक्लपक्षेऽपीत्थमेव परिलिख्य प्रतीचीनं कृष्णखण्डं प्राचीनं शुक्लखण्डं स्यात् । तयोरष्टम्याः प्रागेव कृष्णशृङ्गोन्नतिः, अष्टम्याः परतः शुक्लशृङ्गोन्नतिः द्रष्टव्या ॥ १७-१८ ॥

मूलम्—1. There is another reading उडुपतिशुक्लचिह्नलग्नं, which is better. —*KSS*

2. A. om. प्रतीक of 15-18, but there is commentary. S. om. प्रतीक of 15-19, but there is commentary.

बाह्वङ्गुलानि यत एव निवेशितानि
शृङ्गं तु तन्नमति शेषमिहोन्नतं स्यात ।
शुक्लेऽर्धबिम्बसदृशे दलितेऽर्धमौर्व्या
लाटीललाटतटरूपधरः शशाङ्कः ॥ १९ ॥

प्रथमतरमुदेति शृङ्गमुच्चं
हरिणभृतोऽस्तमुपैति पृष्ठतस्तत् ।
अनुपचिततनोस्तु केतकाग्र-
श्रियमविसंश्रयसम्भवां दधानम् ॥ २० ॥[1]

दिङ्मध्यबिन्दुतो भुजाङ्गुलानि यस्यां दिशि प्रसारितानि तस्यां दिशि शृङ्गं नतं स्यात् । तदितरदिशि शृङ्गमुन्नतं स्यात् । शुक्लाष्टमीदले तथा चन्द्रमण्डले पश्चिमार्धं सर्वशुक्लं स्यात् । कृष्णाष्टमीदले पूर्वार्धं सर्वशुक्लं स्यात् । तस्मात् तदा चन्द्रमण्डले पूर्वापरशुक्लधनुषोर्द्वयोस्तद्बिम्बमध्यस्थितयाम्योत्तररेखैव तत्कालसम्पूर्णशिञ्जिनी स्यात् । इति बिम्बमध्यदक्षिणोत्तररेखासंलग्नमेव शुक्लदलं कृष्णदलं च । तस्मात् तदा शृङ्गयोरभावात् बिम्बार्धं दर्पणार्धमिव दृश्यते । स्त्रीणां मुखं सम्पूर्णचन्द्रमण्डलमिवेति कविभिरुक्तम् । ललाटं मुखार्धम् । तस्मादर्धचन्द्रोऽपि लाटस्त्रीणां ललाटसदृशः स्यात् । इति **लल्लाचार्येण देशपक्षपाताल्लाटस्त्रीणां** प्रशंसार्थं तासां मुखं सम्पूर्णचन्द्रमण्डलमित्युक्तम् । चन्द्रोदयकाले पूर्वमुन्नतशृङ्गमुदेति । पुनर्नतशृङ्गमुदेति । चन्द्रास्तसमये नतशृङ्गं पूर्वमस्तमेति । पुनरुन्नतशृङ्गमस्तमेति । समशृङ्गद्वयमेकदैवास्तमेति, एकदैवोदेति । कृशचन्द्रस्य शृङ्गं कृष्णत्रयोदशीचतुर्दश्योश्च शुक्लद्वितीयातृतीययोरपि । शृङ्गं च केतकीपुष्पमध्यमदलाग्रमिवातिरमणीयं शुक्लमेव दृश्यते ॥ १९-२० ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने
चन्द्रशृङ्गोन्नत्यधिकारो नाम नवमोऽध्यायः ॥

मूलम्—1. After verse 20, the chapter in A_1. B. Be. Bo_1. Bo_3. Bod. D. M_2. M_3. S_1. S_2. V_1. V_2. V_3. ends.
A_1. S_1. breaks off here.

अथ ग्रहयुत्यधिकारो नाम

दशमोऽध्यायः

अथ ग्रहसमागमाधिकारो व्याख्यायते ।

[ग्रहसमागमः]

मन्दकर्णमथ शीघ्रकर्णवत्
संविधाय चलकर्णताडितम् ।
तं भजेत् त्रिभवनज्यया फलं
भूग्रहान्तरमुशन्ति तद्विदः ॥ १ ॥

द्वयोर्ग्रहयोरन्तरेऽल्पे तदा तयोर्योगकालं वक्ष्यमाण **निजगतिविवरेण** (१०. ७-८) इत्यादि वृत्तद्वयोक्तप्रकारेण ज्ञात्वा तात्कालिकमध्यावानीय तौ द्वौ ग्रहौ स्फुटौ कार्यौ । तदन्त्यशीघ्रकेन्द्रकर्णं तृतीयमन्दकेन्द्रकर्णं चानीय तमेव तच्छीघ्रकर्णेन हृत्वा त्रिज्यया विभजेत् । लब्धं लिप्ता भूग्रहान्तरं स्यात् । तथा स्वेष्टकालेऽपि भौमादीनां भूग्रहान्तरमानयेत् । एतदेवाभीष्टग्रहस्य भूमेश्चान्तरमिति तज्ज्ञाः कथयन्ति ॥ १ ॥

[ग्रहाणां समागमकालनिर्णयः]

५ १० १५
पञ्चभिर्दशभिरिन्द्रियेन्दुभि-
२० २५
र्व्योमबाहुभिरथेषुलोचनैः ।
चन्द्रयोजनतनुर्हृताऽऽस्फुजि-
ज्जीवसौम्यशनिभौममूर्तयः ॥ २ ॥

चन्द्रविम्बमध्यप्रमाणयोजनानि विंशत्यधिकशततत्रयम् । ३२० । एतान्येव योजनानि पञ्चभिर्भजेत् । लब्धं चतुःषष्टिः । ६४ । शुक्रस्य

मध्यविम्वप्रमाणयोजनानि भवन्ति । तथैव चन्द्रमण्डलयोजनान्येव पृथक् पृथग् दशभिः । १० । पञ्चदशभिः । १५ । विंशत्या । २० । पञ्चविंशत्या विभजेत् । २५ । लब्धं क्रमाद् गुरुबुधसौरिभौमानां मध्यविम्वप्रमाणयोजनानि भवन्ति । तानि गुरोर्द्वात्रिंशत् । ३२ । बुधस्य सत्र्यंशैकविंशतिः । २१ । २० । सौरेः षोडश । १६ । भौमस्य पञ्चमांशोनत्रयोदश । १२ । ४८ । एतानि चन्द्रकक्ष्यायामेतेषां स्वस्वविम्वयोजनानि भवन्ति ॥ २ ॥

व्यासखण्डकृतिघातिता तनु-
र्भूग्रहान्तरहतेन्दुकर्णहृत् ।
योजनत्वमपहाय जायते
सैव तस्य कलिकामयी स्फुटा ॥ ३ ॥

इन्दुकर्णो यथापठितचन्द्रमध्यकर्णयोजनानि चतुस्त्रिंशत्सहस्राणि त्रीणि शतानि सप्तसप्तत्यधिकानि । ३४३७७ । एतानि भूग्रहान्तरगुणितानि भागहारः स्यात् । प्रागुक्तस्वमध्ययोजनविम्बं त्रिज्यावर्गेण हृत्वा स्वेष्ट-कालिकभूग्रहान्तरगुणितचन्द्रमध्ययोजनकर्णेन भजेत् । लब्धं स्फुटमानकलाः स्युः ॥ ३ ॥

योजनानि दशभिर्हृतानि वा
मध्यमाः स्युरथ मानलिप्तिकाः ।
ताडितास्त्रिभवनज्यया पुन-
र्भूग्रहान्तरविभाजिताः स्फुटाः ॥ ४ ॥

स्वमध्ययोजनबिम्बानि दशभिर्भजेत् । लब्धं मध्यबिम्बकलाः स्युः । तास्त्रिज्यया हृत्वा भूग्रहान्तरेण विभजेत् । लब्धं स्वकीयस्फुटमानकलाः स्युः । इत्थं वा स्वबिम्बान्यानयेत् ॥ ४ ॥

९ १२ ६ १२ १२
नन्दसूर्यरससूर्यभानवो
१०
दिग्गुणाः शरकलाः कुजादितः ।
४ २ ८ ६ १०
वेदलोचनगजाङ्गखेन्दवः
१०
पातजाः स्युरथ दिग्गुणा लवाः ॥ ५ ॥

भौमस्य मध्यविक्षेपकला नवतिः । ९० । बुधस्य विंशत्यधिकं शतम् । १२० । गुरोः षष्टिः । ६० । शुक्रस्य विंशत्यधिकं शतम् । १२० । शनेरपि विंशत्यधिकं शतम् । १२० ।

भौमस्य पातांशाश्चत्वारिंशत् । ४० । बुधस्य विंशतिः । २० । गुरोरशीतिः । ८० । शुक्रस्य षष्टिः । ६० । शनेः शतम् । १०० ॥ ५ ॥

क्षितिसुतगुरुसूर्यसूनुपाताः
स्वचलफलोनयुता यथा तथैव ।
शशिसुतसितयोस्तु पातभागाः
स्वमृदुफलेन च संस्कृताः स्फुटाः स्युः ॥ ६ ॥

भौमगुरुसौरीणां पठितपातांशा स्वेष्टकालिकान्त्यशीघ्रफलांशैः स्वग्रहवत् संस्कृताः स्फुटाः स्युः ॥ ६ ॥[1]

[ग्रहाणां युतिकालः समकलिकत्वं च]

निजगतिविवरेण संविभक्ता
विवरकलास्त्वनुलोमयोर्दिनानि ।
ऋजुगमनविलोमभुक्तियुत्या-
भ्यधिकगतावधिके युतिर्गता तैः ॥ ७ ॥

अनधिकगमनेऽधिकेऽथ वक्रि-
ण्यपि चरितान्तरलिप्तिका गतिघ्नाः ।[1]
गतियुतिविवरोद्धृतास्तथैव
स्वफलमृणं स्वमिते गते च योगे ॥ ८ ॥

धनमृणमथ तद्विलोमगे स्तः
समकलिकौ समलिप्तिकाद्विपातात् ।
त्रिदशगुरुमहीजसूर्यजानां
भृगुतनयेन्दुजयोस्तथैव शीघ्रात् ॥ ९ ॥

मूलम्— 1. D. खगजान्तरलिप्तिका गतिघ्न्यः

व्याख्या—1. The commentary is not complete,

इति वृत्तत्रयात् सार्धवृत्तद्वयेन द्वयोर्ग्रहयोर्युतिकालः समकलिकत्वं च कथ्यते । तत् कथमित्युक्ते—द्वयोर्ग्रहयोरन्तरे स्वल्पे चेत् तद्द्वयोः प्राग्यायिनोर्महागतिग्रहोऽधिकश्चेत् तदा युतिरतीता स्यात् । तद्ग्रहान्तरलिप्तौघाद् गत्यन्तरलिप्ताभिराप्तं गतदिनादिकं स्यात् । पुनस्तद्ग्रहान्तरलिप्तौघः पृथक् पृथग् भुक्तिगुणितो भुक्त्यन्तरभक्तो लब्धं स्वलिप्तादिकं स्यात् । तत् स्वग्रहे शोध्यम् । ततस्तौ ग्रहौ समलिप्तिकौ भवतः ।

तथा प्राग्यायिनोर्द्वयोरल्पगतिग्रहोऽधिकश्चेत् तदा योगो भावी स्यात् । तद्ग्रहान्तरलिप्तौघाद् भुक्त्यन्तराप्तं गम्यदिनादिकं स्यात् । ततस्तद्ग्रहान्तरलिप्तौघः स्वस्वभुक्तिगुणितो भुक्त्यन्तराप्तो लब्धं स्वलिप्तादिकं स्वग्रहे योज्यम् । ततस्तौ ग्रहौ समलिप्तिकौ भवतः ।

तद्गतगम्यदिनादिकाले द्वयोरेको वक्री स्वयमधिकश्चेत् तदा तद्योगो भावी स्यात् । तद्ग्रहान्तरकला भुक्तियोगलिप्ताभिराप्ता लब्धं गम्यदिनादिकं स्यात् । तद्ग्रहान्तरकलाः पृथक् पृथक् स्वभुक्तिगुणिता भुक्तियोगभक्ता लब्धं स्वलिप्तादिकं स्यात् । तत् स्वफलं प्राग्गतिग्रहे योज्यम् । वक्रगतिग्रहे शोध्यम् । ततस्तौ समलिप्तिकौ भवतः ।

तल्लब्धगम्यदिनादिनादिके काले तयोर्द्वयोर्वक्री यद्यल्पस्तदा युतिरतीता स्यात् । तद्ग्रहान्तराद् भुक्तियुत्याप्तं गतदिनादिकं स्यात् । ततस्तद्ग्रहान्तरं स्वभुक्तिगुणितं भुक्तियोगाप्तं स्वस्वलिप्तादिकं प्राग्गतिग्रहे शोध्यम् । वक्रिणि योज्यम् । ततस्तौ समलिप्तिकौ भवतः ।

तल्लब्धगतदिनादिके काले द्वयोर्वक्रयोर्ग्रहयोर्महागतिग्रहोऽधिकश्चेत् तद्योगो भावी स्यात् । तयोर्द्वयोरल्पगतिग्रहोऽधिकश्चेद् तद्युतिरतीता स्यात् । तद्ग्रहान्तरलिप्ता गत्यन्तरकलाभिराप्ता लब्धं तद्गतगम्यदिनादिकं ज्ञात्वा तद्ग्रहान्तरं स्वस्वभुक्त्या सङ्गुण्य भुक्त्यन्तरेण विभजेत् । लब्धं स्वलिप्तादिकं स्यात् । तद्गम्ययोगे तद् ग्रहयोः शोध्यम् । गतयोगे योज्यम् । ततस्तौ समलिप्तिकौ भवतः ।

गतगम्यदिनैर्योगदिनं ज्ञाप्वा तस्मिन् दिने योगकाले समकलग्रहात् स्वकीयस्फुटपातांशान् शोधयेत् । तत् कथमित्याशङ्क्याह ॥ ७—९ ॥

निजमध्यमबाणसङ्गुणा
भुजजीवा कुखगान्तरोद्धृता ।

स शरो[1] भवति स्फुटो रवि-
ग्रहणोक्त्या नतिसंस्कृतो विधोः ॥ १० ॥

क्षेपयोर्वियुतिरेकगोलयो-
र्या च भिन्नककुभोर्भवेद् युतिः ।
अन्तरं तदुभयोः प्रकीर्तितं
तद्दलैक्यलघुभेदकारकम् ॥ ११ ॥

'त्रिदशगुरुः' (१०. ९b) इत्यादि सार्धवृत्तद्वयेन विक्षेपानानयेत् । कथमित्युच्यते—तात्कालिकस्फुटभौमगुरुसौरिभ्यः स्फुटपातांशान् त्यक्त्वा तच्छेषं केन्द्रं स्यात् । बुधशुक्रशीघ्रयोस्तात्कालिकस्वशीघ्रोच्चात् स्वस्फुटपातांशान् त्यक्त्वा तच्छेषं केन्द्रं स्यात् । इति स्वपातोनकेन्द्रदिशि भुजजीवामानीय स्वमध्यविक्षेपकलाभिः सङ्गुण्य भूग्रहान्तरेण विभजेत् । लब्धं लिप्तादिकं विक्षेपः स्यात् ।

तथा स्वपातोनचन्द्रकेन्द्रदोर्ज्यां पञ्चदशभिर्हृत्वैकनवत्यधिकेन शतेन । १९१ । विभजेत् । लब्धं चन्द्रविक्षेपः स्यात् ।

ततः समलिप्तिककालिकस्तद्द्युगतघटिका एव पर्वघटिकाः परिकल्प्य सूर्यग्रहणोक्तप्रकारेण स्वकीया नतिलिप्ता आनीय ताभिः स्वस्वविक्षेपान् संस्कुर्यात् । ततः समलिप्तिकग्रहयोगकाले स्फुटविक्षेपाः स्युः इति । भेदे सति तद्ग्रहयोगकाले नतिसंस्कृतस्फुटविक्षेपः । भेदरहिते केवलयोगकाले केवल-विक्षेप एव स्फुटः स्यात् ।

अत्र विधोर्नतिसंस्कृतस्फुटविक्षेप इति **विधुग्रहणमार्यभटसिद्धान्तोक्त्या** । भौमादीनामप्युपलक्षणार्थमत्रापि "समये समलिप्तयोर्भवेत्" (१०. १३) इत्यादिपाठेन भेदग्रहयुताल्लम्बननतिस्थित्यर्धादिकं कर्तव्यमित्यग्रे वक्ष्यते । योगकालिकयोः स्फुटविक्षेपयोर्द्वयोः समदिक्त्वेऽन्तरं भिन्नदिक्त्वे योगो ग्रहान्तरं स्यात् ।

तदन्तरं तद्ग्रहयोर्बिम्बैक्यार्धान्न्यूनं चेद् भेदोऽस्ति । तद्ग्रहान्तरं मानैक्यार्धतुल्यं चेदुल्लेखः स्यात् । [मानैक्यार्धाद् ग्रहान्तरकलामानमधिकं चेदंशुमर्दं स्यात् ।] मानैक्यार्धाद् ग्रहान्तरकलामानमधिकं षष्टेरूनं चेदपसव्यं स्यात् । इति ग्रहयोगाद् भेदोल्लेखांशुमर्दापसव्यसंज्ञादि भौमादीनां युद्धं चतुर्धा विज्ञेयम् । ग्रहान्तरं मानैक्यार्धे त्यक्त्वा तच्छेषकलाः षष्टेरधिका चेदसौ योगः समागम इत्युच्यते । भौमादीनां चन्द्रेण सह योगश्चेदसौ समागम इत्युच्यते ॥ १०-११ ॥

मूलम्— 1. B. Be. BO_1 BO_2 क्षेपो

[ग्रहैस्ताराणां छादनम्]

स्वस्वबाणदिशि भिन्नगोलयोः
क्षेपयोश्च भवतौ नभश्चरौ ।
यस्य तुल्यककुभोर्लघुः शरो
जायतेऽन्यदिशि सोऽपरग्रहात् ॥ १२ ॥

ग्रहयोगकाले ग्रहस्फुटविक्षेपौ द्वौ भिन्नदिक्कौ चेद् ग्रहयोर्दक्षिण-विक्षेपग्रहो दक्षिणे तिष्ठति । उत्तरविक्षेपग्रहस्तूत्तरे तिष्ठति ।

द्वावपि विक्षेपौ दक्षिणौ चेदधिकविक्षेपग्रहो दक्षिणे तिष्ठति । अल्प-विक्षेपग्रहस्तूत्तरे तिष्ठति ।

द्वावप्युत्तरविक्षेपौ चेदल्पविक्षेपग्रहो दक्षिणे तिष्ठति । अधिकविक्षेपग्रह उत्तरे तिष्ठति ।

योगकाल उदक्स्थो ग्रहो जयी । शुक्रो दक्षिणदिक्स्थोऽपि जयी । उल्लेखांशुमर्दापसव्याख्ययुद्धेषूत्तरस्थश्छादको जयी ।

कक्ष्याक्रमेणोपर्यधोभावज्ञानार्थं अस्मदीयश्लोकः—

चन्द्रज्ञशुक्रसूर्यारसुरेड्याकिभमण्डलम् ।
ऊर्ध्वोर्ध्वगाः क्रमात्तेषामधःस्थो ग्राहको युतौ ॥

कक्ष्याक्रमः कथ्यते । कथमित्युक्ते—चन्द्रकक्ष्यायाः परतो बुधकक्ष्या । ततः परं शुक्रकक्ष्या । ततः परं सूर्यकक्ष्या । सूर्यात् परतो भौमः । भौमात् परतो गुरुः । गुरोः परतः सौरिः । सौरेः परतोऽश्विन्यादिनक्षत्रचक्रं स्वकक्ष्यायां भ्रमति । अनेन क्रमेण योगकालेऽधःस्थितो ग्रह ऊर्ध्वस्थितं तारकं छादयति ॥ १२ ॥

[ग्रहसमागमे स्थित्यर्धनिर्णयः]

समये समलिप्तयोर्भवे-
दुदयो यस्य च तुल्यलिप्तयोः ।[1]
उदयास्तमयेन येन तद्-
भेदे पर्वविलम्बनाद्यतः ॥ १३ ॥

मूलम्— 1. Bod. D. उदयो यः समलिप्तयोस्तयोः

समकलिकग्रहयोगकालं ज्ञात्वा तत्काले स्वदेशोदयलग्नमानीय तल्लग्नभुक्तं दृक्कर्मकृतसमकलिकग्रहयोर्भोग्यं च तन्मध्योदयसहितं च तत् समकलिकग्रहयोः स्वद्युगतघटिकाः स्युः। ताः पर्वघटिकाः परिकल्प्य तद्घटिकाकाले सूर्यग्रहणोक्तप्रकारेण मध्यलग्नं मध्यज्यां दृक्क्षेपं चानीय [पर्व तिथ्यन्तं परिकल्प्य तत्कालदृग्ज्यामानीय] दृग्ज्यावर्गविक्षेपवर्गान्तरमूलं दृग्गतिः स्यात्। तां पञ्चविंशत्यधिकपञ्चशतैर्हृत्वा। ५२५। पृथक् पृथक् समकलिकग्रहयोः स्वकीययोजनकर्णेन विभजेत्। लब्धं लिप्तादिफलं स्यात्। तत्फलयोरन्तरं षष्टिघ्नं समकलग्रहयोस्तुल्यगत्योरन्तरेण विभजेत्। लब्धं घटिकादिलम्बनं स्यात्। तल्लम्बनेन योगकालपर्व पूर्वोक्तप्रकारेणासकृत्संस्कृतं स्फुटयोगकालपर्व स्यात्। ततस्तद्दृक्क्षेपः पञ्चविंशत्यधिकपञ्चशताभ्यस्तः पृथक् पृथग् ग्रहयोर्योजनकर्णेन विभक्तस्तत्फलयोरन्तरमेव नतिलिप्ताः स्युः। मध्यज्यादिगेव नतेर्दिक् स्यात्। ततस्तद्ग्रहयोः स्फुटयोगकालिकौ विक्षेपौ नतिसंस्कृतौ स्फुटौ भवतः। ग्रहाणां योजनकर्णाः सोमग्रहणाधिकारे लिखिता एव स्थिताः। इत्थं लम्बनमवनतिं च भेदे सति ग्रहयुतौ साधयेत्। ततस्तद्बिम्बद्वयमानीय तद्विम्बैक्यार्धवर्गात् स्फुटग्रहान्तरवर्गं त्यक्त्वा मूलमानीय षष्ट्या सङ्गुण्य समदिग्गत्यन्तरेण विभजेत्। लब्धं घटिकादिस्थित्यर्धं स्यात्। तेन सूर्यग्रहणवत् स्पर्शस्थित्यर्धं मोक्षस्थित्यर्धमप्यानीय स्पर्शमोक्षयोः कालं ज्ञात्वा तयोरन्तरघटिका ज्ञातव्याः। ता युतिकालघटिका भवन्ति ॥ १३ ॥

[ग्रहसमागमे दिङ्निर्णयः]

अन्तरे महति दक्षिणोत्तरे
प्राचि तुल्यकलयोः समागमः।
अन्यथा भवति पश्चिमेऽन्यथा
दृष्टिकर्मगणितैक्यकार्यतः[1] ॥ १४ ॥

दक्षिणोत्तरस्थितयोः समकलिकयोर्ग्रहयोरन्तरभागा बहवश्चेत् तयोः समागमः प्राच्यामन्यप्रकारः। प्रतीच्यां ततोऽन्यप्रकारः स्यात्। तत् कथमित्युक्ते—स्वोदयकाले तयोः समकलत्वं नास्ति। अन्यत्र समकलिकाश्चेत् तदा दक्षिणोत्तरस्थितिर्नास्ति।

मूलम्— 1. M_1. M_2. M_3. कर्मदृष्टिकथितैक्यकार्यदः; A_2. S_2. कर्मदृष्टिग°; V_1. V_2. कर्मदृष्टिकथि°

नक्षत्रद्वययुतौ चान्तरे महति समकलिकयोरपि दक्षिणोत्तरस्थितिर्दृक्तुल्या न स्यात् । नक्षत्रद्वययुतिः कथं सम्भवतीत्युक्ते—चित्रास्वात्योर्दक्षिणोत्तरमेकोनचत्वारिंशद् भागाः । विन्ध्याद् दक्षिणे चित्रोदयानन्तरं स्वातेरुदयः स्यात् । तस्मात् तत्र तयोर्युतिर्नास्ति । विन्ध्यादुत्तरतः स्वात्युदयानन्तरं चित्रोदयः स्यात् । तस्मात् तत्र स्वपूर्वाह्णे चित्रास्वात्योर्युतिः स्यात् । अपराह्णे चित्रा स्वातिमतिक्रम्य प्रथमतोऽस्तमेति । ततः स्वातिरस्तमेति । इत्यभिजिदादीनामप्युदक्स्थितानामुत्तरे महति व्यत्ययादुदयोऽस्ति । तस्मात् समागमकालज्ञानार्थमग्रे वृत्तपादेन दृगैक्यकालिककर्म कथ्यते ॥ १४ ॥

[ग्रहसमागमे दृक्कर्मसाधनम्]

प्राक्कपालभवदृष्टिकर्मणा
पश्चिमेन च षषड्भजौ ग्रहौ ।
[1]पूर्ववत् समकलौ पृथक् पृथक्
[2]संस्कृतौ स्त उदयास्तलग्नके ॥ १५ ॥

प्राचि भोग्यमपरस्य यद्गतं
मध्यगोदययुतं तयोर्दिनम् ।
कीर्तयन्त्युदयलग्नलग्नयो-
रेवमन्तरमपि ग्रहोदितम् ॥ १६ ॥

समकलिकग्रहयोरुदयकालं ज्ञात्वा ततस्तयोरुदयलग्नमस्तलग्नं च साधयेत् । कथमित्युक्ते—सूर्योदयकाले रविग्रहान् स्फुटान् कृत्वा तत्सूर्यस्य भोग्यं ग्रहयोः स्वस्वभुक्तं च तन्मध्योदयसहितं तद्घटिकादिकं तस्मिन् दिने सूर्योदयात् परतस्तद्ग्रहोदयकालः स्यात् । तद्घटिकाभिस्तत्सूर्यग्रहाणां भुक्तयो हृत्वा षष्ट्या विभजेत् । लब्धं लिप्तादिकं तत् सूर्यग्रहेषु योज्यम् । इत्थं भूयोप्यसकृत्कर्मणा रविग्रहान्तरघटिका आनीय ततस्तद्घटिकाकाले तौ ग्रहौ कृततात्कालिकौ स्वकीयोदयकालिकौ भवतः । पूर्वोक्तोदयविधिना दृक्कर्मद्वयकृतयोर्ग्रहयोः स्वोदयलग्ने भवतः । ततः स्वोदयलग्नयोः राशिषट्कं संयोज्यास्तविधिना दृक्कर्मद्वयकृते स्वकीयास्तलग्ने भवतः ।

मूलम्— 1. B. Be. Bo1. Bo2. Bod. D सूर्यवत्

2. A_2. B. Be. Bo_1. Bo_2. Bo_3. Bod. D. S_2. V_2. V_3. तत् for स्त

ततो [ध्रुवस्य] विक्षेपभागान् विषुवच्छायया सङ्गुण्य द्वादशभिर्विभजेत्। लब्धं भागादिकमाक्षदृक्कर्मफलमित्युच्यते। तद्भागादि स्वध्रुवेषूत्तरविक्षेपश्चेत् त्याज्यम्। दक्षिणविक्षेपश्चेद् योज्यम्। तत् स्वकीयोदयलग्नं स्यात्। भूयोऽपि तद्भागादिफलमुत्तरविक्षेपश्चेत् स्वध्रुवे योज्यम्, दक्षिणविक्षेपश्चेत् स्वध्रुवे शोध्यम्। तद्युक्ततत्यक्तस्वध्रुवं राशिषट्कयोजितं तन्नक्षत्रध्रुवं स्वकीयास्तलग्नं स्यात्।

इति साधितस्वोदयास्तलग्नयोरयनभागान् संस्कृत्य तत्स्वोदयलग्नस्य भोग्यमस्तलग्नस्य च भुक्तं तन्मध्योदयसहितं घटिकादिकं भौमादिग्रहाणामश्विन्यादिध्रुवाणां च स्वदिनप्रमाणं स्यात्। तदर्धं दिनार्धं स्यात्। दिनार्धद्युगतान्तरं नतं स्यात्।

उदयास्तकालादन्यत्राक्षदृक्कर्मफलं स्वभागादिकं स्वनतेन सङ्गुण्य स्वदिनार्धेन विभजेत्। लब्धं तात्कालिकं स्फुटाक्षफलभागादिकं स्यात्। तत् पूर्वापरकपालयोरुत्तरदक्षिणविक्षेपवशेन पूर्वोक्तप्रकारेणैव भौमादिग्रहेषु भध्रुवेष्वपि संस्कृत्य ग्रहर्क्षाणां समकलकालं जानीयात्। ततस्तात्कालिकलग्नस्य भुक्तं स्वकीयोदयलग्नस्य भोग्यं च मध्योदयसहितं घटिकादिकं तत्समकलग्रहयोर्युतेर्भग्रहयुतेर्वा भद्वययुतेर्वा तयोर्द्वयोरित्थं स्वकीयद्युगतं स्यात् ॥ १५-१६ ॥

लघुदिनस्य समुद्गतनाडिका
लघुदिनेन हृता महता हताः।
यदि बृहद्दिवसाभ्युदितास्पका-
ग्रहयुतिर्भवितात्थ गतान्यथा ॥ १७ ॥

तदन्तरं स्यात् प्रथमस्तथेष्ट-
नाडीफलोनाधिकयोरथान्यः।
राशी गतौ तौ यदि वापि गम्यौ
तदानयोरन्तरमेव हारः ॥ १८ ॥

योगोऽन्यथाभीष्टघटीहतस्य
स्यादाद्यराशेः फलनाडिकाभिः ।
गते गताद्ये भविता च गम्ये
युतिस्तयोस्तुल्यफलत्वकालात् ॥ १९ ॥

स्वमुदितं स्वदिनेन विभाजितं
परदिनेन हतं यदि जायते ।
स्वमुदितेन परस्य समं तदा
भवति संयुतिरुक्तवदन्यथा ॥ २० ॥[1]

ग्रहान्तरमल्पं चेत् तयोर्द्वयोरपि दक्षिणस्थितस्य ग्रहस्य दिनमल्पं स्यात् । उदक्स्थितस्य ग्रहस्य दिनमधिकं स्यात् । स्वोदयकाल उदक्स्थः प्रागुदेति । तदनन्तरं दक्षिणस्थ उदेति । तस्मादल्पदिनस्य द्युगतमल्पं स्यात् । तदल्पद्युगतं बृहद्दिनमानेन सङ्गुण्याल्पदिनमानेन विभजेत् । लब्धं समकालिकस्य बृहद्दिनग्रहस्य द्युगतादल्पं चेत् तदा युतिकालो भावी स्यात् । तल्लब्धमधिकं चेद् युतिकालो भूतः स्यात् । इति गतं गम्यं ज्ञात्वा तल्लब्धस्य बृहद्दिनस्य ग्रहस्य द्युगतेन सह विश्लेषः । तदन्तरं प्रथमराशिः स्यात् ।

तदा युतिर्गता चेत् तद्ग्रहयोर्गणितागतसमलिप्तिकालिकद्युगतयोर्दश दश,पञ्च पञ्च वाभीष्टं परिकल्प्य घटिकाः शोधयेत् । तदा युतिर्गम्या चेत् तत्कल्पिताभीष्टे घटिका [दश-] दश पञ्च [-पञ्च] वा तयोर्द्युगतयोर्योजयेत् । ततस्तदल्पदिनग्रहस्य द्युगतं बृहद्दिनमानेन सङ्गुण्याल्पदिनमानेन विभजेत् । लब्धं बृहद्दिनस्य द्युगतादल्पं चेत् तदापि युतिर्गम्या स्यात् । [तल्लब्धमधिकं चेद् युतिर्गता स्यात्] तल्लब्धस्य बृहद्दिनद्युगतस्यान्तरं द्वितीयराशिः स्यात् ।

तत्प्रथमद्वितीयराशिकालयोर्युतिर्गता वा गम्या वा यदि स्यात् तदा तद्राशिद्वयोरन्तरं भागहारः स्यात् । तद्राश्योरेकस्य काले युतिर्गता तदितरराशिकाले युतिर्गम्या चेत् तत्प्रथमद्वितीयराश्योर्योगस्तदा भागहारः स्यात् ।

मूलम् — 1. The chapter in A_2. B. Be. Bo_1. Bo_2. Bo_2. Bo_2. Bod. D. M_2. M_3. S_2. V_1. V_2. V_3. after ends verse 20.

ततस्तत्प्रथमराशिः कल्पिताभीष्टघटिकाभिर्गुणितो भागहारेण भक्तो लब्धं घटिकादिकं स्यात् । [तत्प्रथमराशिवदेव गतं गम्यं च स्यात्] इत्थं लब्धघटिकादिकं गतं चेत् समलिप्तकालिकयोर्गणितागतद्युगतयोः शोधयेत् । लब्धं घटिकादिकं गम्यं चेद् गणितागतद्युगतयोर्योजयेत् । ततस्तत्स्वल्पदिनस्य द्युगतं बृहद्दिनमानेन हृत्वा अल्पदिनमानेन विभजेत् । लब्धं घटिकादिकं स्यात् । इत्थमसकृत्कर्मणा बृहद्दिनग्रहस्य द्युगतेन तुल्यं स्यात् ।

इति समकलकालात् प्राक् परतो वा तद्ग्रहयोर्द्वयोर्द्युगते द्वे यथा तुल्ये चेत् तदा तयोर्ग्रहयोः साक्षात् दक्षिणोत्तरस्थित्या युतिः स्यात् । भागहारलब्ध-घटिकादिभिः पुनः पृथग् द्वितीयाख्यराशिकल्पनकाल आद्यप्रथमराशिरेव प्रथमराशिः स्यात् ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

ग्रहयुत्यधिकारो नाम दशमोऽध्यायः ॥

अथ भग्रहयोगाधिकारो नाम

एकादशोऽध्यायः

अथ भग्रहयोगाधिकारो व्याख्यायते ।

[नक्षत्रभोगलिप्ताः]

४८ ४० 1 ५६
गजाब्धयः शून्यकृता रसेषवः
५४ ५२ २० ७२
कृतेषवो युग्मशरा नखा द्व्यगाः ।
७० ४४ ४८ 2
खवाजिनोऽब्धिश्रुतयो गजाब्धयो
३६ ४४ 3 ७८
रसाग्नयोऽब्धिश्रुतयो गजाद्रयः ॥ १ ॥

६६ ६२ ७२
रसर्तवो युग्मरसा यमाचला
५२ ८ ६ ४ ४
यमेषवोऽष्टावृतवोऽब्धयोऽब्धयः ।
१९ 4 १८ ४०
नवेन्दवो नागभुवः खसागरा
४२ १२ ७४
यमाब्धयस्तिग्मकराः कृताद्रयः ॥ २ ॥

मूलम्— 1. A_2. B. Be. Bo_1. Bo_2. Bod., D. S_2. V_3. साम्बुधयः
2. M_3. कृताब्धयो ; V_2. वेदकृता
3. V_2. अब्धिकृता
4. A_2. B. Be. Bo_1. Bo_2. Bod. D. V_2. V_3. नन्देन्दवः

१०

क्रमेण सर्वाः स्वशशाङ्कताडिता
भभोगलिप्ता मुनिभिः प्रकीर्तिताः ।
शताष्टकं व्येकभसङ्ख्यया हतं
भभोगलिप्ताद्य[ऽब्य]मुशन्ति मध्रुवम् ॥ ३ ॥[1]

अश्विन्यादिनक्षत्राणां क्रमेण स्वस्थानभोगलिप्ताः कथ्यन्ते । अश्विन्याः । ४८० । भरण्याः ।४००। कृत्तिकायाः । ५६० । रोहिण्याः । ५४० । मृगशीर्षस्य । ५२० । आर्द्रायाः । २०० । पुनर्वसोः । ७२० । पुष्यस्य । ७०० । आश्लेषायाः । ४४० । मघायाः । ४८० । पूर्वफल्गुन्याः । ३६० । उत्तरफल्गुन्याः । ४४० । हस्तस्य । ७८० । चित्रायाः । ६६० । स्वातेः । ६२० । विशाखायाः । ७२० । अनुराधायाः । ५२० । ज्येष्ठायाः । ८० । मूलस्य ।६० । पूर्वाषाढायाः । ४० । उत्तराषाढायाः । ४० । श्रवणस्य । १९० । धनिष्ठायाः । १८० । शतर्क्षस्य । ४०० । पूर्वभाद्रपदायाः । ४२० । उत्तरभाद्रपदायाः । १२० । रेवत्याः । ७४० ।

अश्विन्यादीनां स्वस्थानलिप्ता अष्टौ शतानि । ८०० । एतद् गतनक्षत्रसङ्ख्यया सङ्गुण्य स्वभागलिप्तासु संयोज्य राश्यादिकं कुर्यात् । क्रमेणाश्विन्यादीनां राश्यादिध्रुवकाः स्युः । तत्राश्विनीध्रुवो मेषेऽष्टौ भागाः । ८ । भरणीध्रुवो मेषे विंशतिभागाः । २० । कृत्तिकाध्रुवो वृषे षड्भागाः । १ । ६ । रोहिणीध्रुवो वृषे एकोनविंशत्यंशाः । १ । १९ । ०।[1] मृगशीर्ष ध्रुवो मिथुने द्वौ भागौ । २ । २ । ० । आर्द्राध्रुवो मिथुने दशभागाः । । २ । १० । ० । पुनर्वसुध्रुवः कर्किणि द्वौ भागौ । ३ । २ । ० । पुष्यध्रुवः कर्किणि [पञ्चदश भागाः । ३ । १५ । ० । आश्लेषाध्रुवः कर्किणि]

मूलम्— 1. V_3. gives the first two lines of verse 3 after the first line of verse 4; then the remaing three lines of 4.

व्याख्या—1. Bina Chatterji had here एकोनविंशत्यंशा विंशतिलिप्ताश्च । १।१९।२० । which is wrong. Mallikārjuna's commentary actually has सप्तदशांशा विंशतिलिप्ताश्च । १।१७।२० । which corresponds to the reading कृताब्धयो adopted by Mallikārjuna in place of कृतेषवो in VS. 1 above. Bina Chatterji has not mentioned the reading कृताब्धयो although it occurs in the text commented on by Mallikārjuna. —*KSS*

चतुर्विंशतिभागाः । ३।२४।० । मघाध्रुवः सिंहेऽष्टौ भागाः । ४ । ८ । ० । पूर्वफल्गुनीध्रुवः सिंहे व्येकविंशतिभागा विंशतिलिप्ताश्च । ४ । १९ । २० । उत्तरफल्गुनीध्रुवः कन्यायां चत्वारोंऽशाः । ५ । ४ । ० । हस्तध्रुवः कन्यायां त्रयोविंशतिरंशाः । ५।२३।० । चित्राध्रुवस्तुलायां चत्वारोंऽशा विंशतिलिप्ताश्च । ६।४।२० । स्वातिध्रुवस्तुलायां सप्तदशांशाः । ६।१७।० । [विशाखाध्रुवो वृश्चिके द्वौ भागौ । ७ । २ । ० ।] अनुराधाध्रुवो वृश्चिके द्वादशांशाः । ७ । १२ । ० । ज्येष्ठाध्रुवो वृश्चिकेऽष्टादशांशाः । ७ । १८ । ० । मूलध्रुवो धनुष्येको भागः । ८ । १ । ० । पूर्वाषाढध्रुवो धनुषि चतुर्दशांशाः । ८।१४।० । उत्तराषाढध्रुवो धनुषि सप्तविंशतिरंशा विंशतिलिप्ताश्च । ८।२७।२० । श्रवणध्रुवो मकरे त्रयोदशांशा दशलिप्ताश्च । ९।१३।१० । धनिष्ठाध्रुवो मकरे षड्विंशतिरंशा विंशतिलिप्ताश्च । ९।२६।२० । शतभिषग्ध्रुवः कुम्भे त्रयोदशांशा विंशतिलिप्ताश्च ।१०।१३।२०। पूर्वभाद्रपदध्रुवः कुम्भे सप्तविंशतिरंशाः । १०।२७।० । उत्तरभाद्रपदध्रुवो मीने पञ्चांशा विंशतिलिप्ताः । ११ । ५ । २० । रेवतीध्रुवो मीने व्येकत्रिंशदंशाः[1] । ११ । २९ । ० ॥ १-३ ॥

[ग्रहयुतिकालः]

ध्रुवकादधिके युतिर्गता
भवितोने विपरीतगेऽन्यथा ।
ग्रहसंयुतिवद् ग्रहेऽपरं
भशरा भध्रुवकापमादिमे ॥ ४ ॥

ग्रहस्य भध्रुवेण युतिः कथ्यते । कथमित्युक्ते—ऋजुगतिग्रहे भध्रुवादधिके चेद् युतिर्गता स्यात् । न्यूने चेद् युतिर्गम्या स्यात् । ततो वक्रगतिग्रहे भध्रुवादूने युतिर्गता स्यात् । अधिके चेद् युतिर्गम्या स्यात् । पूर्वोक्तग्रहयुतिवदेव ग्रहभुक्त्या गतगम्यदिनादिकं तात्कालिककरणं समकलिकं च संसाध्य युतिकालं साधयेत् ॥ ४ ॥

व्याख्या—1. Bina Chatterji had here मीनेऽप्येकत्रिंशदंशाः । ११ । ३१ । ० । which is wrong.

[नक्षत्राणां विक्षेपाः]

भध्रुवाणां स्वक्रान्त्यन्तादश्विन्यादीनां क्रमेण विक्षेपभागाः कथ्यन्ते--

१० १२ ५
दश लोचनभूमयः शरा
५ १० ११
विषया व्योमभुवः पिनाकिनः ।
६ ० ७ ०
षडथाम्बरमद्रयोऽम्बरं
१२ १३ ८ २
रवयो रामभुवो गजा यमौ ॥ ५ ॥

३७ १-३०
नगाग्नयोऽर्धेन विवर्जितं द्वयं
३ ४ ८-३०
त्रयोऽब्धयोऽर्धेन युता भुजङ्गमाः ।
५-२० ५
त्रिभागयुक्ता विषयाः शिलीशुखाः
३० ३६
खवह्नयः षट्कगुणा लवाः स्मृताः ॥ ६ ॥

०-२० २४ २६
ततस्त्रिभागोऽथ जिनाः षडश्विनो
० २४
नभश्च भागस्य मितिर्जिनाङ्गुलाः ।

दश लोचनेत्युक्तसार्धवृत्तद्वयेन विक्षेपाः पठिताः । कथमित्युक्ते-- अश्विन्या विक्षेपभागा दश । १० । भरण्या विक्षेपभागा द्वादश । १२ । कृत्तिकायाः पञ्च ।५। रोहिण्याः पञ्च । ५ । मृगशीर्षस्य दश । १० । आर्द्रायाः एकादश ।११। पुनर्वसोः षट् । ६ । पुष्यस्य नास्ति । आश्लेषायाः सप्त । ८ । मघाया नास्ति । पूर्वफल्गुन्या द्वादश । १२ । उत्तरफल्गुन्यास्त्रयोदश । १३ । हस्तस्याष्टौ । ८ । चित्रायाः द्वौ । २ । स्वातेः सप्तत्रिंशत् । ३७ । विशाखायाः सार्धमेकम् । १।३० । अनुराधायास्त्रयः । ३ । ज्येष्ठायाश्चत्वारः । ४ । मूलस्य सार्धभुजङ्गमाः । ८ । ३० । [पूर्वाषाढस्य सह्यंशाः पञ्च । ५ ।

२०।] उत्तराषाढस्य पञ्च। ५। श्रवणस्य त्रिंशत्। ३०। धनिष्ठायाः षट्त्रिंशत्। ३६। शतभिषजो विंशतिलिप्ताः। ०। २०। पूर्वभाद्रपदस्य चतुर्विंशतिः। २४। उत्तरभाद्रपदस्य षड्विंशतिः। २६। रेवत्या विक्षेपो नास्ति।

सार्धलिप्ताद्वयमेकमङ्गुलं कल्पितम्, इत्येकस्य भागस्याङ्गुलानि चतुर्विंशतिः प्रमाणं स्यात्। ग्रहान्तरं भागादिकम्। तदाङ्गुलादिकं कर्तुमिच्छता गणकेनेत्थमङ्गुलादिकं कुर्यात्॥ ५-७॥

[अगस्त्य-लुब्धक-अभिजिताः ध्रुव-विक्षेपाः]

२-२७
अगस्त्यनामा मिथुनेंऽशकैस्त्रिभि-
त्रिंवर्जिते योगमुपैति खेचरैः॥ ७॥

२-२६
चतुर्भिरंशैर्मृगयुर्विवर्जितै-
८-२७
स्त्रिभिश्च भागैरभिजिच्च कार्मुकैः।
८० ४०
क्रमाच्छरांशाः खगजाः खसागरा
६४ 1
यमस्य दिश्युत्तरतः कृतर्तवः॥ ८॥

अगस्त्यनामेत्युक्तसार्धवृत्तेनागस्तिलुब्धकाभिजितां ध्रुवविक्षेपाश्च कथ्यन्ते—मिथुनेंऽशाः सप्तविंशतिरगस्तिध्रुवः। २।२७।०। दक्षिणविक्षेपोऽशीतिभागाः। ८०। तथा मिथुनेंऽशाः षड्विंशतिर्लुब्धकध्रुवः। २।२६। दक्षिणविक्षेपोंऽशाश्चत्वारिंशत्। ४०। धनुष्यंशाः सप्तविंशतिरभिजिद्ध्रुवः। ८। २७। उत्तरविक्षेपोंऽशाश्चतुःषष्टिः। ६४।॥ ८॥

मूलम्— 1. B. Be. Bo_1. Bo_2. Bod. D. ऋमर्तवः। Be gives '(64)' within brackets.

व्याख्या—1. M_1. M_2. षट्त्रिंशत्। ३६।

[नक्षत्राणां दक्षिणोत्तरविक्षिप्तत्वम्]

रुद्रसार्प्यपुरुहूतभवेशा
ब्राह्ममूलकरमित्रभचित्राः ।
वारुणाप्यमृगशीर्षविशाखा
भान्यमूनि खलु याम्यशराणि ॥ ९ ॥

पुष्योऽथ पौष्णं पितृदैवतं च
क्रान्त्यग्रकाण्युत्तरतोऽपराणि ।
वैश्वान्त्यपादः श्रवणे चतस्रो[1]
नाड्यो[2] भभोगोऽभिजिदत्र दृष्टः ॥ १० ॥

रोहिणीमृगशीर्षार्द्राश्लेषाहस्तचित्राविशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाशतभिषगित्येतेषां त्रयोदशानां पूर्वोक्ता दक्षिणविक्षेपाः । तस्मादिमानि त्रयोदश नक्षत्राणि स्वक्रान्त्यन्ताद् दक्षिणतः स्वविक्षेपान्ते तिष्ठन्ति । पुष्यमघारेवतीनां विक्षेपा न सन्ति । तस्मादिमानि त्रीणि नक्षत्राणि स्वक्रान्त्यन्तेषु तिष्ठन्ति । अनुक्तानि धिष्ण्यान्यश्विनीभरणीकृत्तिकापुनर्वसुपूर्वोत्तरफल्गुनीस्वातिश्रवणधनिष्ठापूर्वभाद्रपदोत्तरभाद्रपदान्येतेषामेकादशानां पूर्वोक्ता उत्तरविक्षेपाः । तस्मादिमानि स्वक्रान्त्यन्तादुत्तरतः स्वविक्षेपान्ते तिष्ठन्ति । उत्तराषाढान्त्यपादश्रवणादौ चतस्रो घटिका अभिजिन्नक्षत्रसंज्ञकाः स्युः ॥ ९-१० ॥

[चन्द्रेण नक्षत्राणां छादनम्]

प्राजापत्यदले स्थितस्तु हिमगुर्याम्यैः शरांशैस्त्रिभि-
र्विंध्यंशैः शकटं भिनत्ति विदलैस्तैः पञ्चभी रोहिणीम् ।
सौम्यैः पञ्चभिरंशकैश्च विदलैस्तारां मघामध्यमां
विच्चेपेण विवर्जितस्तु गुरुभं पौष्णं तथा वारुणम् ॥ ११ ॥

---

1. B. Be. Bo_1. Bo_2. Bod. D. V_3. श्रवणाच्चतस्रो
2. D. नाड्योऽवयोगो

रोहिण्यर्धस्थितश्चन्द्रो वृषे सप्तदशांशे त्र्यंशोने तिष्ठति । १।१६।४० । तदा दक्षिणविक्षेपस्[त्र्यंशोनस्]त्र्यंशश्चेदसौ चन्द्रो रोहिणीशकटाभ्यन्तरे तिष्ठति । यदा दक्षिणविक्षेपः परमः सार्धचत्वारोंऽशाः । ४ । ३० । चेत् तदा रोहिणी प्रधानदीप्ततारामाच्छादयति ।

यदा चन्द्रो मघाध्रुवतुल्यश्चेत् [तदुत्तरविक्षेपोऽपि परमः सार्धचत्वारोंऽशाः । ४ । ३० । चेत्] तदा मघातारासूत्तरतृतीयतारामाच्छादयति । यदा चन्द्रः पुष्यरेवतीशतभिषक्तुल्य[स्तस्य] विक्षेपो नास्ति चेत् तदा पुष्यशतभिषग्रेवतीप्रधानतारामाच्छादयति ।

अत्र चन्द्रकथनं भौमादीनामप्युपलक्षणार्थम् । तस्माद् भौमादिकोऽपि तत्तुल्यविक्षेपश्चेत् तदैव रोहिणीशकटभेदकारी भवत्येव ।। ११ ।।

[चरार्धाद् अक्षदृक्कर्म]

ध्रुवापमज्याधनुषा युतोना
समान्यदिक्स्थेन शरेण जीवा ।
स्फुटापमज्या रविवद् विधेया
तया ज्यया चापि पृथक् चरार्धम् ।। १२ ।।

अश्विन्यादिध्रुवाणां नियतस्थानस्थित्या ग्रहवद्राश्यन्तरचलनं नास्ति । तस्मादायनदृक्कर्म न कर्तव्यम् । अक्षदृक्कर्मैकमेव कर्तव्यम् । अक्षदृक्कर्म प्रकारद्वयेन पूर्वमेवोक्तम् । अक्षज्यागुणिते लम्बकहृते क्षेपे फलमित्येकप्रकारः । द्वितीयप्रकारस्तु विक्षेपांशैर्विषुवच्छायाङ्गुलानि सङ्गुण्य द्वादशभिर्विभजेत् । लब्धं भागादिकं स्यात् । तदुत्तरविक्षेपश्चेद् भध्रुवे शोध्यम् । तत् स्वदेशोदयलग्नं स्यात् । तदेव भागादिकं भध्रुवे संयोज्यम् । तत्र राशिषट्कं संयोज्यम् । तत् स्वदेशास्तलग्नं स्यात् । तद्भध्रुवस्यैव तल्लब्धभागादिफलं दक्षिणविक्षेपश्चेद् भध्रुवे योज्यम् । तत् स्वदेशोदयलग्नं स्यात् । तद्भागादिकमेव ध्रुवे त्यक्त्वा राशिषट्कं योज्यम् । तदस्तलग्नं स्यात् ।

इत्थं स्वोदयलग्नगम्यमस्तलग्नगतं च मध्योदयसहितं घटिकादिकं स्वभध्रुवस्य दिनमानं स्यात् । तदर्धं दिनार्धं स्यात् । तद्भध्रुवस्य स्वदेशलग्नं रविं परिकल्प्य तद्गम्यमिष्टकाललग्नं, गतं च तन्मध्योदयसहितं घटिकादिकं तद्भध्रुवस्य द्युगतं स्यात् । तद्द्युगतदिनार्धान्तरं नतं स्यात् । तन्नतघटिकादिभिः स्वलब्धभागादिकं हत्वा दिनार्धेन विभजेत् । लब्धं भागादिकं स्यात् । तदुत्तरविक्षेपश्चेद् भध्रुवे पूर्वाह्णे शोध्यम्, अपराह्णे योज्यम् । दक्षिणविक्षेप-

श्चेद् भध्रुवे लब्धभागादिकं पूर्वाह्णे योज्यम्, अपराह्णे शोध्यम्। ततस्तात्कालिकः स्फुटः भध्रुवः स्यात्। तत्तुल्यग्रहेण तद्भध्रुवस्य दक्षिणोत्तरान्तरमल्पं चेत् तदा तयोर्युतिस्स्यात्। तदन्तरमधिकं चेत् पूर्वोक्तप्रकारेण युतिकालं साधयेत्।

पुनरप्यक्षदृक्कर्म तृतीयप्रकारेण वक्तुमनेन वृत्तेन प्राग्वद् भध्रुवस्य मध्यक्रान्त्या च मध्यचरार्धं स्फुटचरार्धं च कथ्येते। कथमित्युक्ते—भध्रुवादयनांशसंस्कृताद् भुजजीवामानीय तां त्रयोदशगुणितां द्वात्रिंशता विभजेत्। लब्धं मध्यक्रान्तिज्या स्यात्। तां पृथगेव धनुः कृत्वा तत्र विक्षेपं संस्कृत्य ततो जीवामानयेत्। सा स्फुटक्रान्तिज्या स्यात्। तन्मध्यक्रान्तिज्यावर्गं स्फुटक्रान्तिज्यावर्गं च पृथक् पृथक् त्रिज्यावर्गात् त्यक्त्वा मूले स्वस्वद्युज्ये भवतः। पुनः क्रान्तिज्ये पृथक् पृथग् विषुवच्छायया गुणिते द्वादशभिर्विभज्य त्रिज्यया हृत्वा स्वद्युज्यया विभजेत्। तत्फले द्वे क्रमेण मध्यचरज्या स्फुटचरज्या च स्यात्। तयोः स्वस्वधनुर्मध्यचरार्धं [स्फुटचरार्धं] च स्यात् ॥ १२ ॥

चरार्धयोस्तुल्यदिशोर्वियोगः
समागमो भिन्नदिशोर्विधेयः।
ततो विशोध्यं ध्रुवभुक्तकालं
विलोमतो राश्युदयांस्तथैव ॥ १३ ॥

शेषात् ३० खरामैर्गुणितादवाप्तं
भागाद्यशुद्धाभ्युदयासुभिर्यत्।
विशोधयेत् तद् ध्रुवकस्य भुक्तं
ततश्च शुद्धोदयतुल्यराशीन् ॥ १४ ॥

सौम्ये शरे ध्रुवदृगुद्गमलग्नमेव
याम्ये ध्रुवक्रमविशुद्धफलेन युक् स्यात्।
षड्भिर्गृहैः समधिके ध्रुवकेऽन्यदिक्स्थे
क्षेपे कृते भवति पूर्ववदस्तलग्नम् ॥ १५ ॥

तयोश्चरार्धयोर्दिगैक्येऽन्तरम्, भिन्नदिक्त्वे तच्चरार्धयोर्योगः कार्यः। ततस्तृतीयचरासुभ्य उत्तरविक्षेपश्चेद् ध्रुवभुक्तासून् संशोध्य पुनरुत्क्रमेण

ध्रुवभुक्तराश्युदयान् संशोध्य तच्छेषानपि त्रिंशता सङ्गुण्य तदुत्क्रमाशुद्धराश्युदयासुभिर्विभजेत्। लब्धं भागादिकं स्यात्। तद्भागादिकं ध्रुवे भुक्तभागादिकं च तदुत्क्रमशोधितराश्युदयतुल्यराशीनपि भध्रुवे विशोधयेत्। तच्छेषध्रुवो दृक्कर्मशुद्धस्वदेशोदयलग्नं स्यात्।

तदा पृथग् भध्रुवे राशिषट्कं संयोज्य तद्भोग्यासूनानीय तत्पूर्वचरासुभ्यस्त्यक्त्वा क्रमेण ध्रुवस्योपरितनराश्युदयासूनपि त्यक्त्वा तच्छेषासूनपि त्रिंशता सङ्गुण्य तत्परस्थितराश्युदयासुभिर्विभजेत्। लब्धं भागादिकं स्यात्। तद्भागादिकं ध्रुवस्य भोग्यभागादिकं च शुद्धराश्युदयासुतुल्यराशीनपि भध्रुवे राशिषट्कयुते युञ्ज्यात्। तद् दृक्कर्मशुद्धस्वदेशास्तलग्नं स्यात्।

तदा दक्षिणविक्षेपश्चेत् पूर्वसंस्कृतचरासुभ्यो ध्रुवस्य भोग्यासून् संशोध्य ततः क्रमेण ध्रुवात् परराश्युदयासूनपि त्यक्त्वा तच्छेषानपि त्रिंशता सङ्गुण्य भुक्तराश्युदयासुभिर्विभजेत्। लब्धं भागादिकं ध्रुवस्य भोग्यभागादिकं च तच्छुद्धराश्युदयासुतुल्यराशीनपि भध्रुवे युञ्ज्यात्। तद् दृक्कर्मशुद्धस्वदेशोदयलग्नं स्यात्। तदा पृथक् पृथग् भध्रुवे राशिषट्कं संयोज्य तद्भुक्तासूनानीय तत् पूर्वसंस्कृतचरासुभ्यस्त्यक्त्वा पुनरुत्क्रमेण ध्रुवभुक्तराश्युदयासूनपि त्यक्त्वा तच्छेषासून् त्रिंशता सङ्गुण्य तदुत्क्रमाच्छुद्धराश्युदयासुभिर्विभजेत्। लब्धं भागादिकं ध्रुवे भुक्तभागादिकं च तद्दृक्कर्मशोधितराश्युदयासुतुल्यराशीनपि राशिषट्कयुतभध्रुवे शोध्यम्। तच्छेषध्रुवो दृक्कर्मशुद्धस्वदेशास्तलग्नं स्यात्। ततः पूर्वोक्तप्रकारेणोदयास्तलग्नयोरन्तरालघटिका दिनप्रमाणं स्यात्। तदर्धं दिनार्धं स्यात्।

इत्थं भध्रुवस्वदेशोदयलग्नमर्कं परिकल्प्याभीष्टलग्नकालिकद्युगतदिनार्धान्तरं नतं स्यात्। ध्रुवस्वदेशोदयलग्नान्तरभागादिकं गतघटिकाभिः सङ्गुण्य दिनार्धेन विभजेत्। लब्धं भागादिकमुत्तरविक्षेपश्चेत् पूर्वाह्णे भध्रुवे शोध्यम्, अपराह्णे भध्रुवे योज्यम्। तदाभीष्टकालस्फुटध्रुवः स्यात्। दक्षिणविक्षेपश्चेत् पूर्वाह्णे भध्रुवे योज्यम्, अपराह्णे शोध्यम्। अभीष्टकालिकः स्फुटो ध्रुवः स्यात्। स्वमध्याह्ने स्वध्रुव एव स्यात्। इत्थं युतिकाले भध्रुवस्य दृक्कर्म कुर्यात्। इति कालात्मकाच्चरतस्तृतीयदृक्कर्मोक्तम् ॥ १३-१५ ॥

[नक्षत्राणामुदयास्तमयकालः]

लग्नोदये समुदयोऽस्ततनूदयेऽस्तो
भानां भवेद् भ्रमवशात् प्रवहस्य वायोः।
त्र्यंशान्वितं तु घटिकाद्वितयं तदिष्टं
षड्भागयुङ्मृगरिपोर्धटजस्य युग्मम् ॥ १६ ॥

उदयलग्नमभीष्टफलाधिकं
भवति यस्य समं पटुरश्मिना ।
समभुदेति विभार्धमपीतर-
द्विफलमस्तमुपैति च यस्य सः ॥ १७ ॥

प्रथमार्धेनाश्विन्यादीनां प्रतिदिनमुदयोऽस्तमयश्च कथ्येते । तत् कथमित्युक्ते—प्रवहाख्यवायुभ्रमणवशादश्विन्यादीनां नित्यं स्वदेशोदयलग्नस्योदयकाले स्वकीयोदयः स्यात् । ततः स्वदेशास्तलग्नस्योदयकालेऽश्विन्यादीनां नित्यं प्रतीच्यामस्तमयः स्यात् ।

उपरितनसार्धवृत्तेन रविवशादश्विन्यादीनामुदयोऽस्तमयश्च कथ्येते । तत् कथमित्युक्ते—घटिकाद्वयं विंशतिविघटिकाश्च ।२।२०। अर्कस्य नक्षत्रस्यान्तरालकालः । तद्घटिकादिकं षड्गुणितं कालभागाः स्युः । ते चतुर्दश । तानेवाष्टादशशतैर्हृत्वा ।१८००। स्वदेशोदयलग्नराश्युदयासुभिर्विभजेत् । लब्धं भागादिकं स्यात् । तत् स्वदेशोदयलग्ने योज्यम् । तल्लग्नतुल्येऽर्के प्राच्यां सूर्योदयकाले तन्नक्षत्रस्योदयः स्यात् । तथा कालांशाश्चतुर्दश अष्टादशशतैर्गुणिताः स्वदेशास्तलग्नराश्युदयासुभिर्भक्ता लब्धं भागादिकं स्यात् । तद्भागादिकं स्वदेशास्तलग्ने त्यक्त्वा तत्रैव राशिषट्कं त्यजेत् । तस्मिन् देशे तत्तुल्येऽर्के प्रतीच्यां सूर्यास्तकाले तन्नक्षत्रमस्तमेति ।

तथा लुब्धकार्कान्तरकालो घटिकाद्वयं दश विघटिकाश्च । २ । १० । तथा च अगस्त्या[र्का]न्तरकालो घटिकाद्वयं च । २ । षड्गुणितम् । लुब्धकस्य कालांशाशास्त्रयोदश । १३ । अगस्त्यकालांशा द्वादश । १२ । ते पृथक्पृथगष्टादशशतैर्गुणिताः । १८०० । स्वोदयलग्नास्तलग्नराश्युदयासुभिः पृथक् पृथग् भक्ता लब्धं भागादिकं स्यात् । तद्भागादिकं स्वोदयलग्नयोर्योज्यम्, अस्तलग्नयोः शोध्यम् । तदस्तलग्नयोः पुनरपि राशिषट्कं शोध्यम् । तत्तुल्येऽर्के प्राग्वल्लुब्धकागस्त्ययोः प्राच्यामुदयौ भवतः । प्रतीच्यामस्तमयौ नियतं भवतः ॥ १६-१७ ॥

[ध्रुवतारादर्शनकालः]

उदयास्तमयार्कमध्यगेऽर्के
दृश्यः स्याद् ध्रुवकः स्फुटोपमश्चेत् ।
फलहीनयुतोऽन्यतुल्यदिक्स्थो
लघुतामेति गृहत्रयांशकेभ्यः ॥ १८ ॥

भध्रुवस्य स्वोदयलग्नं स्वकालांशयुक्तं चेत् स्वकीयोदयार्कः स्यात्। तथा स्वास्तलग्ने राशिषट्कं त्यक्त्वा स्वकालांशानपि शोधयेत्। असौ स्वास्तार्कः स्यात्। उदयार्कास्तार्कयोर्मध्ये सञ्चरन् सूर्यो यावन्तो मासांस्तिष्ठति, तेषु मासेषु स्फुटध्रुवतारकं दृश्यते। तत्स्फुटध्रुवस्य क्रान्त्यंशाः स्वाक्षांशैः संस्कृतास्तदा नवतेरूनाः स्युः ॥ १८ ॥

[ध्रुवताराणां अदर्शनकालः]

अस्तोदयसूर्यमध्यगेऽर्के
ध्रुवकस्तिग्मकरे न दृश्यते।
उभयोरपि मध्यगाः कला
गतिभक्ता दिवसाः सहस्रगोः ॥ १९ ॥[1]

अस्तार्कोदयार्कयोर्मध्ये सञ्चरन् सूर्यो यावन्ति दिनानि तिष्ठति तेषु दिनेषु तत्तारकं न दृश्यते। अस्तार्कमुदयार्कात् त्यक्त्वा तच्छेषं कलीकृतं रविभुक्तिकलाभिर्विभजेत्। लब्धं दिनानि यावन्ति तेषु दिनेषु तद्ध्रुवतारकं न दृश्यते ॥ १९ ॥

[नक्षत्राणां विभिन्नदेशेषु दर्शनसाध्यता]

उदयसवितुर्यस्यास्तार्को ध्रुवस्य महान् भवेद्
दिनकरवशादस्तं गच्छत्यसौ न कदाचन।
यदपमधनुः क्षेपस्पष्टं पलेन च संस्कृतं
त्रिभवनमहद् यस्मिन् देशे स तत्र न दृश्यते ॥ २० ॥

यस्य नक्षत्रस्य ध्रुवस्य वा स्वोदयार्कादस्तार्कोऽधिकश्चेत् तन्नक्षत्रमर्करश्मिभिर्नास्तं गच्छति। तानि नक्षत्राणि कानीत्युक्ते—स्वात्यभिजिच्छ्रवणघनिष्ठापूर्वभाद्रपदोत्तरभाद्रपदाख्यानि। षण्णामेषामुत्तरविक्षेपभागानामाधिक्यात् केषुचिद्देशेष्वस्तमयो नास्ति। तत् कथमित्युक्ते—एषामक्षदृक्कर्मभागा यस्मिन् देशे चतुर्दशभ्योऽधिकास्तस्मिन् देशे नक्षत्रमस्तं गच्छति;

मूलम् — 1. B. Bo$_1$. Bo$_2$. Bod. D. give 19 as follows :

अस्तोदयसूर्यमध्यगो ध्रुवकस्तिग्मकरेण दृश्यते।
उभयोर्गतिमध्यमाः कला गतिभक्ता दिवसाः स्युरुष्णगोः ॥

Be. has same reading except that it has °मध्यगे in pāda *a*.

तन्नक्षत्रध्रुवोदयार्कश्चतुर्दशभागात्पः स्यात् । अस्तार्कश्चतुर्दशभागाधिकः स्यात् । तदुदयार्कस्फुटार्कयोस्तुल्यत्वे [तन्नक्षत्रं प्रातस्सन्ध्यायां न दृश्यते । सायं सन्ध्यायां दृश्यत एव । तथाऽस्तार्कस्फुटार्कयोस्तुल्यत्वे] सायंसन्ध्यायां न दृश्यते । प्रातःसन्ध्यायां दृश्यत एव । यस्मिन् देशे तन्नक्षत्राक्षदृक्कर्मभागाश्चतुर्दशभ्योऽल्पाश्चेत् तद्देशे स्वोदयार्कादस्तार्कोऽधिको यदि स्यात् तदापि तत्तस्य ध्रुवस्य नतांशाः स्युः । तच्छुद्धनवतिरुन्नतांशाः स्युः । खमध्याद् दक्षिणोत्तरयोर्यस्य ध्रुवस्य स्फुटक्रान्तिभागा दक्षिणाः स्वाक्षांशयुक्तास्ते दक्षिणनतभागाः स्युः । ते नतांशा यस्मिन् देशे नवतेरधिकास्तस्मिन् देशे तन्नक्षत्रं सर्वदा न दृश्यते । यत्र विषुवच्छाया अष्टाङ्गुला तद्देशेऽगस्त्यस्य दक्षिणनतभागा नवतेरधिकाः सम्भवन्ति तस्मिन् देशेऽगस्त्यो न दृश्यते ।।२०।।

[अगस्त्योदये पक्षभेदः]

गृहद्वयेनाक्षविवर्जितेन[1]
समे खवास्तमुपैत्यगस्त्यः ।
च्युतेन तेनैव समेन षड्भा-
दुदेति केचिज्जगुरेवमन्ये ॥ २१ ॥

आर्यभटशिष्यैरन्यैः केश्चिदगस्त्योदयास्तमयौ प्रकारान्तरेणोक्तौ । तत् कथमित्युक्ते—राशिद्वये स्वदेशाक्षांशांस्त्यक्त्वा तच्छेषराश्यादिकं यावद[व]धिकं तत्तुल्यसूर्ये तदागस्तेरस्तमयः स्यात् । तच्छेषराश्यादिकमेव राशिषट्काच्छोध्यम् । तच्छुद्धराश्यादिकं यावदिष्टं तत्तुल्येऽर्के तदागस्त्योदयः स्यात् ॥ २१ ॥

[मरीच्यादिमहर्षिभिर्मुक्तनक्षत्राणि]

चतुर्दशोने तु कलेः समागणे
शतोद्धृते भानि फलं जगुर्बुधाः ।
मरीचिपूर्वैर्मुनिभिर्विरञ्चिभाद्
भवन्ति भुक्तानि नभोविभूषणैः ॥ २२ ॥[2]

मूलम्— 1. D. गृहैककेनाष्टलवान्वितेन ८

2. After 22, the chapter in A_2. B. Be. Bo_1. Bo_2. Bod. D. M_2. M_3. S_2. V_1. V_2. V_3. ends.

शाके सहस्रत्रयमेकशतमेकोनाशीत्यधिकं च ।३१७९। संयोज्य तत् कलिगतं स्यात् । तस्मात् कलिगताब्दगणाच्चतुर्दश त्यक्त्वा शतेन । १०० । आप्तं लब्धं रोहिण्यादिगतनक्षत्राणि । तत्र त्रयं दत्वा सप्तविंशत्या भगणा-स्त्यजेत् । तच्छेषनक्षत्राणि मरीच्यादिसप्तमहर्षीणां भुक्तम् अश्विन्यादिनक्षत्राणि भवन्ति । मरीचिर्वसिष्ठोऽङ्गिरा अत्रिः पुलस्त्यः पुलहः [क्रतु]श्चेति सप्तर्षयः । एते एकस्मिन्नक्षत्रे वर्षशतं तिष्ठन्ति ।

शाके पञ्चत्रिंशदधिकसहस्रसम्मिते तदा कलियुगाब्दाः सहस्रचतुष्टयं शतद्वयं चतुर्दशाधिकं च ।४२१४। तस्माच्चतुर्दशोनिताच्छतोद्धृतलब्धं रोहिण्यादिगतनक्षत्राणि ।४२। तस्मात् त्रयान्वितात् सप्तविंशत्या पर्ययं त्यजेत् । तच्छेषाश्विन्यादिगतनक्षत्राण्यष्टादश । १८ । भवन्ति । ततः परतो वर्षशतं सप्तर्षयो मूलनक्षत्रे तिष्ठन्ति । इत्थं वर्तमानशाके सप्तर्षीणां वर्तमाननक्षत्रे गतगम्याब्दान् विजानीयात् ॥ २२ ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

भग्रहयोगाधिकारो नामैकादशोऽध्यायः ॥

अथ व्यतीपातवैधृत्यधिकारो नाम

द्वादशोऽध्यायः

अथ पाताधिकारो व्याख्यायते ।

[व्यतीपातवैधृतिसम्भवः]

तुल्येऽयने भिन्नदिशो रवीन्द्वोः
स्याद् वैधृतश्चक्रसमे समासे ।
भिन्नेऽयने तुल्यदिशोस्तु योगे
चक्रार्धतुल्ये व्यतिपातयोगः ॥ १ ॥

चन्द्रार्कौ द्वावपि दक्षिणायने वोत्तरायणे भिन्नगोलयोर्यदा स्थितौ तदा तयोरयनांशसंस्कृतयो रवीन्द्वोर्योगो द्वादशराशिश्चेद् वैधृतयोगः स्यात् । तच्चन्द्रार्कयोरेको दक्षिणायन, एक उत्तरायणे तुल्यगोलयोर्यदा स्थितौ तदा तयोरयनांशसंस्कृतयो रवीन्द्वोर्योगो राशिषट्कं चेद् व्यतिपातयोगः स्यात् ॥ १ ॥

[पातमध्यकालः]

$$\frac{६}{चक्रार्ध}\ \frac{१२}{चक्राधिकहीनलिप्ताः}$$
$$\frac{६०}{खषड्गुणा\ भुक्तिसमासभक्ताः ।}$$
भवन्ति नाड्यो गतगम्यसंज्ञा-
स्तात्कालिकौ तौ च तमश्च कुर्यात् ॥ २ ॥

तयोरपि क्रान्तिकलाः समाश्चेत्
तदा भवेन्मध्यमपातकालः ।

चक्रार्धेति सार्धवृत्तेन स्वेष्टदिने चन्द्रार्कौ चक्रचक्रार्धतुल्यौ कुर्यात् । कथमित्युक्ते—उक्तप्रकारेणायनांशसंस्कृतरवीन्द्वोर्योगे कृते चक्रचक्रार्धान्न्यूनाधिकलिप्ताः षष्टिगुणिता रवीन्दुयोगाप्ता लब्धं घटिकादिकं स्यात् । तदपि न्यूनलिप्ताफलं चेद् गम्यम्, अधिकलिप्ताफलं चेदं गतं स्यात् । तद्गतघटिकाभिश्चन्द्रार्करा हुभुक्तीः सङ्गुण्य षष्ट्या विभजेत् । लब्धं लिप्तादिकं स्यात् । तत्फलं रवीन्द्वोस्त्यक्त्वा चन्द्रार्कयोर्योगे कृते चक्रचक्रार्धतुल्ये भवतः । राहौ स्वफलं योज्यम् । तत्कालराहुः स्यात् ।

तल्लब्धं गम्यं घटिकादिकं चेत् तद्घटिकाभिश्चन्द्रार्करा हुभुक्तयो गुणिताः, षष्ट्याप्ता, लब्धं लिप्तादिकं स्यात् । तल्लिप्तादिकं रवीन्द्वोर्योज्यम्, राहौ शोध्यम् । तच्चन्द्रार्कयोर्गणितागतक्रान्तिकलास्तुल्या भवन्ति । तदा चन्द्रस्य विक्षेपो नास्ति [चेद् वैधृतिव्यतिपातयोः स्वस्वमध्यकालः स्यात् । विक्षेपो]ऽस्ति चेच्चन्द्रस्फुटक्रान्तिरर्कक्रान्तेर्न्यूनाधिका स्यात् । तस्मान्मध्यकालज्ञानार्थं क्रान्तिसाम्यसाधनं कर्तव्यमेव ।। २-३ ।।

[क्रान्तिसाम्यसाधनम्]

कल्प्योऽधिकोऽप्यूनक एव चन्द्रः
स्फुटोऽपमश्चन्द्रमसोऽन्यदिक्स्थः ॥ ३ ॥

सूर्यापमादोजपदोद्भवाच्चेद्
युग्मादिगश्चान्द्रमसो लघीयान् ।
अपक्रमः स्यान्न तदास्ति पात-
स्तदन्यथात्वेऽपमयोः समत्वम् ॥ ४ ॥

अयुग्मजश्चान्द्रमसोऽपमश्चे-
दपक्रमाद् भानुमतोऽधिकः स्यात् ।
समोद्भवो वापि लघुस्तदेतो
विपातकालो भवितान्यथातः ॥ ५ ॥

कल्प्योऽधिकोऽप्यूनेति सार्धवृत्तद्वयेन क्रान्तिसाम्यकालान्वेषणसद्भावस्तद्गतगम्यत्वं च कथ्यते । तत् कथमित्युक्ते—चन्द्रक्रान्तौ हीनायां यदि विक्षेपोऽधिकश्चेत् तदा चन्द्रस्फुटक्रान्तिश्चन्द्राक्रान्तदिग्व्यत्ययेनान्यदिक्

स्यात् । सा चन्द्रक्रान्तिरर्ककान्तेरधिकापि वा । तत्र कालान्वेषणसमयेऽल्पैव कल्पनीया ।

ओजपदान्तकालिकार्ककान्तेर्यद्योजपदस्था चन्द्रक्रान्तिरल्पा [चेत्] तदा पातकालो न सम्भवति । कथमित्युक्ते—परतोऽपि युग्मपदचन्द्रक्रान्तिरल्पा स्यात् । ततः प्रागपि चन्द्रोऽप्योजपदगश्चेत् क्रान्तिसाम्येऽपि तच्चन्द्रोऽर्को द्वावप्योजपादस्थौ वा युग्मपादस्थौ वा तदा पूर्वोक्तप्रकारेणोक्तलक्षणाभावात् वैधृतोऽपि न भवति, व्यतिपातोऽपि न भवति । तस्मादित्युक्तादस्मिन् काले क्रान्तिसाम्यं चेत् तयोः सम्भवकालः स्यात् । तत् कथमित्युक्ते—ओजपदचन्द्रक्रान्तिरर्ककान्तेरधिका चेत् तदा पातकालो गतः स्यात्, अल्पा चेद् गम्या स्यात् । गतगम्यकालो ज्ञेयः ॥ ४-५ ॥

[व्यतीपातवैधृतिकालः]

क्रान्त्योर्युतिरेकदिक्कयो-
र्विवरं भिन्नदिशोस्तु वैधृते[1] ।
विवरं समदिक्कयोस्तयो-
र्व्यतिपातेऽन्यदिशोः समागमः ॥ ६ ॥

प्रथमः स तथापरो युतै
रहितैरिष्टघटीफलेन तैः[2] ।
गतयोरथवापि गम्ययो-
र्विवरं संयुतिरन्यथा तयोः ॥ ७ ॥

प्रथमेष्टघटीवधेऽमुना
विहृते लब्धघटीमितेऽन्तरे ।
पातः प्रथमे गतागते
गतगम्यः प्रथमाख्यकालतः ॥ ८ ॥

मूलम्— 1. B. Be. Bo_1. Bo_2. omit. वैधृत to दिशोः, two lines below,

2. V_1. breaks off from here.

वैधृतमध्यकालान्वेषणार्थम् इष्टदिने समदिक्स्थयो रवीन्द्वोः क्रान्त्योर्योगो वा भिन्नक्रान्त्योश्चेत् तयोरन्तरं वा प्रथमराशिः स्यात् । व्यतीपातमध्यकालान्वेषणार्थमिष्टदिने भिन्नक्रान्त्योर्योगो वा समदिक्क्रान्त्योरन्तरं वा प्रथमराशिः स्यात् ।

ततो दश घटिका इष्टं परिकल्प्य ताभिश्चन्द्रार्कराहुभुक्तीः सङ्गुण्य षष्ट्या विभजेत् । लब्धं लिप्तादिकं स्यात् । तदा पातकालो गतश्चेत् तल्लिप्तादिकं रवीन्द्वोः शोध्यम् , गम्यश्चेत् तदा रवीन्द्वोर्योज्यम् । राहौ व्यस्तं संस्कार्यम् । तच्चन्द्रार्ककान्ती आनीय तदा पातकालगतगम्यं ज्ञात्वा वैधृतौ तत्क्रान्त्योस्तुल्यदिक्कयोर्योगो, भिन्नदिक्कयोरन्तरं द्वितीयराशिः स्यात् । व्यतीपाते तत्क्रान्त्योर्भिन्नदिक्कयोर्योगस्तुल्यदिक्कयोरन्तरं द्वितीयराशिः स्यात् ।

तौ द्वौ राशी गतौ गम्यौ चेत् तयोरन्तरं भागहारः स्यात् । तयो राश्योरेको गत एको गम्यश्चेत् तदा तयोर्योगो भागहारः स्यात् । ततः प्रथमराशिरिष्टघटिकाभिः सङ्गुणितो भागहारेण भक्तो लब्धं प्रथमराशिवद् गतं गम्यं वा घटिकादिकं स्यात् । तद्घटिकान्तरतुल्यः क्रान्तिसाम्यकालः स्यात् । इति प्रथमराशिकालादेव, प्रथमराशिकालो गतश्चेदेता लब्धघटिका गताः स्युः, प्रथमराशिकालो गम्यश्चेत् तस्मादेव प्रथमराशिकालाल्लब्धघटिका गम्या इति ज्ञातव्याः ॥ ८ ॥

तात्कालिकैरसकृदिष्टघटीफलोन-
युक्तैस्तथा प्रथमराशिरनेन भक्तम् ।
मानैक्यमिष्टघटिकाहतमाप्तनाड्यः[1]
पातस्थितिर्ग्रहणवत् प्रथमान्त्यकालौ[2] **॥ ९ ॥**

तात्कालिकैरिति । पूर्वसाधितलब्धस्वेष्टघटिकाभिश्चन्द्रार्कराहवस्तात्कालिकाः कार्याः । पुनरपि तथैवासकृत्कर्मणा रवीन्द्वोः क्रान्ती आनीयेत्थं यदा तयोः क्रान्त्योः साम्यं भवति तदा मध्यकालः स्यात् ।

तच्चन्द्रार्कमानैक्यलिप्ताः [अन्त्यलब्धं] स्वेष्टघटिकाभिः सङ्गुण्य प्रथमराशिना विभजेत् । लब्धं नाड्यो वैधृतव्यतिपातयोः स्वस्वस्थिति-

मूलम्— 1. M_1. M_2. M_3. मिष्ट for माप्त

2. M_1. M_2. M_3. कालात्

प्रमाणघटिकाः स्युः । तदर्धं ग्रहणवदेव स्थित्यर्धं स्यात् । पूर्वसाधित-मध्यकाले स्थित्यर्धशोधिते प्रवेशकालः स्यात् । तथा मध्यकाले स्थित्यर्धयुक्ते निर्गमकालः स्यात् ॥ ९ ॥

[पातकालः तस्मिन् कर्तव्याकर्तव्यौ च]

चन्द्रः सहस्रकरमण्डलमेकमार्गाद्
येन प्रयाति समयेन समस्तमेव ।
पुण्यः स दानजपहोमविधावनिष्टो
यात्रादिकेषु हि दिनत्रयमत्र दुष्टम् ॥ १० ॥

ओजयुग्मस्थयो रवीन्द्वोरुपर्यधोभावेन गच्छतोरेकस्यां कक्ष्यायामेक-मार्गेणाभिमुखेन दर्शनं स्यात् । तत्सम्मुखदर्शनकालो यावांस्तावानेव तत्कालः स्यात् । तत् कथमित्युक्ते—उपर्यधोभावेन सन्मुखमागच्छतोऽर्कस्य मण्डलं तत्सम्मुखं गच्छतश्चन्द्रस्य मण्डलं यदा स्पृशति तदा स्पर्शकालः स्यात् । यदार्कस्य मण्डलं सर्वं चन्द्रमण्डलमाच्छादयति तदा मध्यकालः स्यात् । सूर्य-मण्डलाग्रं यदा चन्द्रमण्डलाग्रं त्यक्त्वा निर्गच्छति तदा निर्गमकालः स्यात् । इत्थं प्रवेशनिर्गमयोर्मध्ये यावत्यो घटिकास्तावत्यः पातकालः स्यात् । तदा दानजपहोमादि कर्म महापुण्यफलदं स्यात् । तस्मिन् पातकाले विवाहदिकं शुभकार्यं महानिष्टफलदं स्याद् इत्युक्तम् ।

वैधृतो व्यतिपातश्च "विष्कम्भादियोगमध्ये व्यतिपातश्च" इति त्रयस्य व्यतिपाताख्य इति व्यतिपातत्रये स्वस्वकाले तावत्कालं शुभकार्यं न कुर्यात् । केषुचित् फलग्रन्थेषु व्यतिपातदिनं तत्पूर्वदिनमपरदिनं चेति दिनत्रयं शुभकार्येषु निषिद्धमिति कैश्चिदुक्तम् । सूर्यसिद्धान्ते पातकाल एव शुभकार्येषु दोषभाक् । गते पातकाले दोषो न स्याद् इति सुव्यक्तमुक्तम् । तस्माद्दिनत्रये तदुक्तदोषो न स्यात् ॥ १० ॥

[रवीन्द्वोः पातप्रवेशनिर्गमकालः]

६०
खरसैर्ग्रहबिम्बमाहतं
स्थितिनाडयः स्फुटभोगभाजितम् ।
स्वगतेरपि भान्तमुद्गतो
भवनान्तं च शशिग्रहोपमः ॥ ११ ॥

६०

मानैक्यार्धं गतियुतिहृतं ताडितं व्योमषड्भि-
र्योगस्यान्तं त्यजति शशिनः स्यात् स्थितेर्नाडिकादि ।
एवं भुक्त्योर्विवरविहृते मानयोरर्धयोगे
तिथ्यन्तं वा करणमथवा मण्डलं मुञ्चतीन्दोः ॥ १२ ॥[1]

यस्मिन् मार्गेऽभिगमनकाले चन्द्रमण्डलं रविमण्डलं स्पृष्टं तावता कालेनार्कमण्डलं सर्वमाच्छादयति, तावत्पर्यन्तं ग्रहणमण्डलमित्युच्यते । [तदाभिमुखीभूयार्कमण्डलमपि स्वगत्या चन्द्रमण्डलमाच्छादयति । तस्मात् प्राग्ग्रहणमण्डलमित्युच्यते ।] इति रवीन्दुस्पर्शकाले तन्मण्डलयोर्योग एव चन्द्रमण्डलस्याद्यपातमारभ्य अर्कमण्डलान्तपर्यन्तं परस्परग्रहणमण्डलं स्यात् । तदेव षष्टिगुणितं रवीन्द्वोः स्फुटक्रान्तिकलान्तराप्तलब्धं पातकालस्थितिप्रमाणघटिकाः स्युः ।

तत्प्रवेशनिर्गमकालयोर्ज्ञानं कथमित्युक्ते—गम्यकालिकार्केन्द्वोः क्रान्तिकलान्तरं मानैक्यार्धकलातुल्यं चेत् तदा प्रवेशः स्यात् । तथा गतकालिकार्केन्द्वोः क्रान्तिकलान्तरं मानैक्यार्धतुल्यं चेत् तदा निर्गमः स्यात् । अत्रापि ग्रहणवन्मध्यकाल एव पर्व स्यात् ।

तदेव तिथ्यन्तमिति कल्पितं ज्ञात्वा पूर्वोक्तस्थित्यर्धघटिकाभिश्चन्द्रार्कराहुभुक्तीः सङ्गुण्य षष्ट्या विभजेत् । लब्धं लिप्तादिकं स्यात् । तल्लिप्तादिकं क्रान्तिसमकालिकार्केन्द्वोस्त्यक्त्वा तयोरन्तरं कुर्यात् । तदन्तरकलादिकं मानैक्यार्धतुल्यं स्यात् । तथा तत्पूर्वस्थित्यर्धगुणितलब्धलिप्तादिकं क्रान्तिसाम्यकालिकार्केन्द्वोर्योज्यम् । तच्चन्द्रार्कक्रान्त्यन्तरं मानैक्यार्धतुल्यं स्यात् ।

इत्थं क्रान्त्यन्तरमेव मानैक्यार्धं परिकल्प्य स्पर्शस्थित्यर्धं मोक्षस्थित्यर्धं चानयेत् । तत् कथमित्युक्ते—क्रान्तिसाम्यकालिकार्केन्द्वोः स्वकीयस्फुटभुक्तिः शोध्या । ततस्तौ प्राग्दिने तात्कालिकार्केन्दू भवतः । तयोः स्फुटक्रान्ती आनीय तयोरेकदिक्त्वे योगो, भिन्नदिक्त्वेऽन्तरं भागहारः स्यात् । मानैक्यार्धं षष्टिघ्नं भागहाराप्तं मोक्षस्थित्यर्धं स्यात् इति ।

स्पर्शस्थित्यर्धोनितक्रान्तिसाम्यमध्यकालः प्रवेशकालः स्यात् । तथा क्रान्तिसाम्यमध्यकालः । स एव मोक्षस्थित्यर्धेन युक्तो मोक्षकालः स्यात् । स्पर्शमोक्षस्थित्यर्धयोगस्तस्य स्थितिनाड्यः स्युः ।

मूलम्— 1. After verse 12, the chapter in A_2. B, Be. Bo_1. Bo_2 Bod. D. M_2. M_3. S_2. V_2. V_3. ends.

स्पर्शकालचन्द्रक्रान्तिः क्रान्तिकक्ष्यायां चन्द्रबिम्बपर्यन्तं क्रान्तिमार्गतुल्या मोक्षकालचन्द्रक्रान्तिः स्यात् । तावदेव पातस्य क्षेत्रकालात्मकं तस्य कालस्थितिनाड्यः पूर्वोक्त एव भचन्द्रमार्गेण सूक्ष्मतः स्पर्शमोक्षविभागकल्पनया द्वितीयप्रकारेण निरूपिताः ।

अत्रोदाहरणम् । पूर्वोक्तव्याख्यानक्रमेण प्रकाशपट्टणे विषुवच्छाया ।५।४५। प्राग्योजनानि ।८०। शाके सप्ताधिकैकादशमिते ।११०७। कलिगताब्दाः । ४२८६ । चैत्रशुल्कद्वितीयायां भौमदिने रव्युदयकालिकद्युगणः । १५६५४७७ । अत्र दृष्टवारो गतवारः, शुक्रवारादिः । मध्यरविः । ११।८।३२ । चन्द्रः । ११।२९।२९ । चन्द्रोच्चम् । ७।८।१ । राहुः । ०।१३।३७ । स्फुटरविः । ११।१०।४० । भुक्तिः । ५९।३० । स्फुटचन्द्रः । ११।२६।७ । भुक्तिः । ८४३।३० । अयनांशाः ।१०।१७ ।

चन्द्रार्कयोगः । ११।२७।२१ । न्यूनलिप्ताः । १५९ । षष्टिघ्नाः भुक्तियोगाप्ता लब्धं गम्यघटिकायुतम् । १०।३४ । तत्कालरविः । ११।२१ । ७ । चन्द्रः । ०।८।५३ । राहुः । १।१३।३६ । रविदक्षिणक्रान्तिः । २१५ । चन्द्रोत्तरक्रान्तिः । २१५ । दक्षिणविक्षेपः । । १५५ । चन्द्रस्फुटोत्तरक्रान्तिः । ६० । तत्क्रान्त्यन्तरं प्रथमराशिः । १५५ ।

गम्यकालेष्टघटिकाः । १० । तत्कालरविः । ११।२१।२९ । चन्द्रः । ० । १४ । ४ । रविदक्षिणक्रान्तिः । २०६ । चन्द्रस्फुटोत्तरक्रान्तिः । २०६ । कान्तिसाम्यं जातम् । तदा वैधृतमध्यकालः ।

सूर्योदयादिघटिकाः । ३२।४३ । रविबिम्बम् । ३२ । ४३ । चन्द्रबिम्बम् । ३४।१२ । मानैक्यम् । ६६ । ५५ । पूर्वलब्धघटिकादिनानेन । २२ । ९ । मानैक्यं सङ्गुण्याद्यराशिनानेन । १५५ । भागहारेण विभजेत् । लब्धं घटिकादिकं वैधृतिस्थितिकालनाड्यः । ९।३४ । अस्यार्धं स्थित्यर्धम् । । ४ । ४५ । तन्मध्यकालाच्छोध्यं प्रवेशकालः स्यात् । एतदेव मध्ये काले योज्यम् । निर्गमकालः स्यात् ।

पुनरेतदेव द्वितीयप्रकारेण भचक्रस्य क्रान्तिकक्ष्यामार्गेण स्थित्वा कथ्यते । रवीन्दोर्बिम्बयोः परस्परसंस्पृष्टकाले मानैक्यं ग्रहणबिम्बमित्युच्यते । तदेव षष्ट्या सङ्गुण्य तद्दिवसार्केन्द्वोः क्रान्तियोगेन विभजेत् । लब्धं स्थितिघटिकाः स्युः । तत्पूर्वार्धं तयोर्बिम्बयोः परस्परसन्निकर्षकालः स्यात् । तदुत्तरार्धं तयोर्बिम्बयोर्विप्रकर्षकालः स्यात् ।

तत्पूर्वापरकालयोः सूक्ष्मानयनं कथमित्युक्ते—क्रान्तिसाम्यकालिकार्केन्द्वोः स्वस्वभुक्तिः शोध्या । तच्छुद्धरविः । ११।२०।२९ । तच्चन्द्रः । ०।०।० । रविदक्षिणक्रान्तिः । २३० । चन्द्रक्रान्तिः । ० । दक्षिणविक्षेपः ।

१८७। चन्द्रस्य विक्षेप एव दक्षिणस्फुटक्रान्तिः । १८७। मानैक्यार्धम् । ३३ । २७। एतत् षष्टिगुणितं भागहारेणाप्तं घटिकादिकं स्फुटस्थित्यर्धं स्यात् । ४।४९ । तथा क्रान्तिसाम्यकालिकार्केन्द्वोः स्वस्वभुक्तिर्योज्या । तदुक्तो-रविः । ११।२२।२९ । चन्द्रः । ०।२८।८ । रविदक्षिणक्रान्तिः । १८२ । चन्द्रोत्तरक्रान्तिः । ६६२ । दक्षिणविक्षेपः । ७४ । चन्द्रस्फुटोत्तरक्रान्तिः । ५८८ । वैधृतस्य तयोः क्रान्त्योर्भिन्नदिक्कयोरन्तरं भागहारोऽयम् । ४०६ । मानैक्यार्धं षष्टिघ्नं भागहाराप्तं घटिकादिकं स्फुटमोक्षस्थित्यर्धम् । ४।५६ । मध्यकालोदयं स्पर्शस्थित्यर्धेनोनितः प्रवेशकालः । २७ । ५४ । तन्मध्यकालः । ३२।४३ । मोक्षस्थित्यर्धेन युक्तो मोक्षकालः । ३७।३९ । स्पर्शमोक्षस्थित्यर्ध-योगः पुण्यकालः । ९।४५ ।

इत्थमनेनोदाहरणेन पूर्वोक्तव्याख्यानरूपेण पुण्यकालो ज्ञेयः । वैधृत-गते पातस्त्रयोदशेऽह्नि [व्यतीपातः । व्यतीपातगते परतः त्रयोदशेऽह्नि] वैधृतः । पुनरपि चन्द्रार्कौ यदा भुजप्रथमराशिगतौ तदा तत्कालोऽल्पः स्यात् । यदा भुजद्वितीयराश्यपरार्धगतौ तदा तत्कालो द्विगुणः स्यात् । यदा चन्द्रार्कौ भुजतृतीयराश्यपरार्धगतौ तदा तत्कालस्त्रिगुणः स्यात् । तत्रैव कदाचित् तत्कालस्यासम्भवोऽपि स्यात् । अनेन प्रकारेण वैधृतव्यतिपातयोस्तदा पुण्यकाले परिज्ञाते तस्माद् दानजपादि कर्तुर्महत्पुण्यफलदं स्यात् ॥ ११-१२ ॥

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

व्यतिपातवैधृत्यधिकारो नाम द्वादशोऽध्यायः ॥

अथ बीजवासनाधिकारो नाम

त्रयोदशोऽध्यायः

अथ बीजवासनाधिकारो व्याख्यायते ।

[लघुज्याः]

प्रत्यब्दशुद्धिविधिना ग्रहमध्यमत्व-
मुक्तं सुखावहमतो लघुशिञ्जिनीभिः ।
वच्मि स्फुटत्वमपि ताश्च दशांशकेभ्यो[1]
ज्ञेयश्च कार्मुकविधौ गुणको दशांशाः ॥ १ ॥

प्रतिसंवत्सरं वर्षान्ते सूर्यादिग्रहान् ज्ञात्वा लघुद्युगणेन मध्यमानयनं सुखार्थं प्रागुक्तम् । तथैवेदानीं लघुज्याभिस्तन्मध्यमात् स्फुटत्वं कथ्यते । तत् कथमित्युक्ते—यत्र यत्र दोःकोट्योर्दशभिर्भागैरेकैकज्या कल्पिता ततस्त-ज्ज्याया धनुःकरणे भागानां दशकं गुणकः स्यादिति ज्ञातव्यम् ॥ १ ॥

[खण्डज्याः]

२६ २५ २४
षड्विंशतिः शरयमा युगलोचनानि
२१ १९ १५ ११
रूपाश्विनो नवभुवस्तिथयस्त्रिनेत्राः ।
७ २
शैला यमौ च कथितानि नव क्रमेण
ज्याखण्डकानि कथयाम्यथ पिण्डितानि ॥ २ ॥

मूलम्—1. D. दशांशलब्ध्यो

षड्विंशतिः पञ्चविंशतिश्चतुर्विंशतिरेकविंशतिः [एकोनविंशतिः] पञ्चदशैकादश सप्त द्वौ । क्रमेणैतानि नव ज्याखण्डकानि कथितानि । अथानन्तरं नव पिण्डज्याः क्रमेण लिख्यन्ते ।। २ ।।

[पिण्डज्याः]

२६ ५१ ७५ 1
अङ्गाश्विनः कुविषया विषयस्वराः स्यु-
९६ ११५
स्तस्माच्चतुर्विरहितं च शतं शरेशाः ।
१३० १४१
व्योमाग्निशीतकिरणाः शशिवेदचन्द्राः
१४८ १५०
स्तम्बेरमाब्धिशशिनो गगनेषुचन्द्राः ॥ ३ ॥

षड्विंशतिः । २६ । एकपञ्चाशत् । ५१ । पञ्चसप्ततिः । ७५ । षण्णवतिः । ९६ । पञ्चदशाधिकं शतम् । ११५ । त्रिंशदधिकशतम् । १३० । एकचत्वारिंशदधिकशतम् । १४१ । अष्टचत्वारिंशदधिकशतम् । १४८ । सार्धशतम् । १५० । क्रमेण पिण्डज्याः ॥ ३ ॥

[रवीन्द्वोः स्फुटः भुक्तिश्च]

२
केन्द्रज्ये स्वगुणेन सूर्यशशिनोः ज्ञुएणे यमघ्ने हृते
७
शैलैस्ते कलिकादिके निजफले ताभ्यां स्फुटावुक्तवत् ।
११
भोग्यं खण्डमिनस्य कामदहनैर्भक्तं गतेः स्यात् फलं
७ 2
चन्द्रस्य त्रिगुणं स्वरांशरहितं प्राग्वद्धनर्णं गतौ ॥ ४ ॥

मध्यमार्कस्वतुङ्गोनिते केन्द्रे भुजाभागेभ्यो दशभिर्लब्धपिण्डज्यां विन्यस्य शेषभागादिकं भोग्य[खण्ड]ज्यया सङ्गुण्य दशभिर्विभजेत् । लब्धं

मूलम्— 1. B. Be. Bo_1. Bo_2. Bod. D. विषयस्वराख्याः; M_1. M_2. M_3. स्वरभूधराः

2. B. Be. Bo_1. Bo_2. Bod. D. V_3. गजांशरहितं ; V_2. नगांशरहितं

न्यस्तज्यापिण्डज्यायां योज्यम् । असौ भुजज्या स्यात् । तां द्वाभ्यां[1] सङ्गुण्य सप्तभिर्विभजेत् । लब्धं लिप्तादिकं स्यात् । तन्मध्यरवौ केन्द्रे पूर्वार्धे शोध्यम्, अपरार्धे योज्यम् । असौ स्फुटरविः ।

भोग्यखण्डमेकादशभिराप्तं । ११ । लब्धं लिप्तादिकं मध्यगतौ केन्द्राद्यान्त्यपादयोः शोध्यम् । द्वितीयतृतीयपादयोर्योज्यम् । सा स्फुटभुक्तिः स्यात् ।

तथा मध्यचन्द्रस्य स्वतुङ्गोनितात् प्राग्वदेव केन्द्रभुजज्यामानीय तामेव द्विगुणां कुर्यात् । [सप्तभिराप्तं][2] चन्द्रस्य फलम् । तदेव लिप्तादिकं स्यात् । तन्मध्यचन्द्रे रविवत् संस्कार्यम् । स एव स्फुटचन्द्रः स्यात् ।

भोग्यखण्डं त्रिगुणितं स्वसप्तमांशेनोनितं लिप्तादिकं स्यात् । तन्मध्यभुक्तौ रविभुक्तिवत् संस्कार्यम् । सा स्फुटभुक्तिः स्यात् ॥ ४ ॥

स्पष्टीकृतेन गुणकेन हताः कुजज्ञ-
जीवास्फुजिद्दिनकरात्मजमन्दजीवाः ।
२ ७
द्विघ्नास्तुरङ्गमहृताः स्वफलानि लिप्ता-
स्ताः पूर्ववद् धनमृणं खचरेषु कुर्यात् ॥ ५ ॥

भौमादीनां मन्दकेन्द्रगुणकाः क्रमेण मनु । १४ । शैल । ७ । [शैल ।७।] गो । ९ । सङ्ख्याः । [स्वेष्टदिन]दोर्ज्याः वेद । ४ । अक्षि । २ । इन्दु । १ । यम । २ । अब्धिभिः । ४ । गुणितास्त्रिज्याप्ता । १५० । लब्धं भौमगुरुसौरीणां गुणकेषु योज्यम्, बुधशुक्रयोर्गुणकयोः शोध्यम् । स्वस्वस्फुटमन्दगुणकाः स्युः ।

मूलम्— 1. D. द्विघ्न्यः

व्याख्या—1. M_1. M_2. षड्भिः for द्वाभ्यां । The reading षड्भिः, however, is the correct one. For, Sun's *guṇaka* is 3 and so Sun's *guṇaka* multiplied by 2 is 6. —*KSS*

2. सप्तभिराप्तं does not occur in Mallikārjuna's com. and seems to have been inserted here by Bina Chatterji. This addition, however, is wrong. For Moon's *guṇaka* being 7, it cancels with 7 in the denominator, —*KSS*

ग्रहान्मदोच्चोनितस्वमन्दकेन्द्रदोर्ज्या स्फुटगुणकगुणिता द्विगुणिता सप्ताप्ता लब्धं स्वमन्दफलं लिप्तादिकं स्यात् । तत् स्वमन्दफलं पूर्वोक्त-प्रकारेण दलितं तथैव संस्कुर्यात् । इत्थं तृतीयमन्दकर्मणि मन्दस्फुटग्रहः स्यात् ।

तद्भोग्यदोर्ज्याखण्डेन भुक्तिभागान् सङ्गुण्य दशभिर्विभजेत् । लब्ध स्वभुक्तेर्जीवा स्यात् । सा स्फुटगुणकगुणिता सप्तभिराप्ता लब्धं स्वभुक्तेः फलं लिप्तादिकं स्यात् । तत् स्वकेन्द्राद्यन्त्यपादयोः स्वभुक्तौ शोध्यम्, द्वितीयतृतीयपादयोः स्वभुक्तौ योज्यम् ।

अथवा प्रकारान्तरेण फलानयनम्—भौमादीनां स्वमन्दकेन्द्रदोर्ज्याः, ओजयुग्मपादगुणकैक्यात् कल्पितगुणकाः क्रमेण द्वात्रिंशद्, द्वादश, पञ्चदश, षट्कं, द्वाविंशतिः । ३२ । १२ । १५ । ६ । २२ । एतैः सङ्गुण्य सप्तभि-र्विभजेत् । लब्धं स्वस्वमन्दफललिप्तादिकं स्यात् । तत् स्वस्वग्रहेषु प्राग्वत् संस्कुर्यात् ।

स्वभोग्यखण्डकैर्भुक्तिभागान् सङ्गुण्य दशभिर्विभजेत् । लब्धं भुक्ति-जीवाः स्युः । ताः क्रमेण । ३२ । १२ । १५ । ६ । २२ । एतैः सङ्गुण्य सप्तभिर्विभजेत् । लब्धं भुक्तिफलं स्यात् । तत् स्वफलं प्राग्वत् स्वभुक्तिषु संस्कुर्यात् ॥ ५ ॥

प्राग्वच्च शीघ्रगुणकेन परिस्फुटेन
हत्वा हरेच्च खगजैर्भुजकोटिजीवे ।
शीघ्रादिकर्म विदधीत ततो यथोक्तं
चापीयमुक्तवदनेन खगाः स्फुटाः स्युः ॥ ६ ॥

भौमादीनां शीघ्रकेन्द्रगुणकाः क्रमेण—रामशराः । ५३ । शशाङ्कदहनाः । ३१ । भूपाः । १६ । त्रिवर्गेषवः । ५९ । नन्दाः । ९ । स्युः । स्वेष्टदिनदोर्ज्याः क्रमेण—द्विद्वीन्दुद्विकुभिर्गुणिताः । २ । २ । १ । २ । १ । त्रिज्याप्ता लब्धं भौम-बुधगुरुशुक्रसौरीणां गुणकेषु शोध्यम् । स्वस्वस्फुटगुणकाः स्युः । स्वशीघ्रोच्चाद्-ग्रहोनितस्वस्वकेन्द्रदोर्ज्याः कोटिज्याश्च स्फुटगुणकगुणिता अशीत्याप्ता लब्धं

मूलम्— 1. In place of हरेच्च खगजैः some mss. read हरेत् खभुजगैः । —*KSS*

2. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_2. V_3. कर्णादिकर्म

3. A_2. B. Be. Bo_1. Bo_2. Bod, D. S_2. V_3. खगः स्फुटः स्यात्

स्वस्वभुजकोटचोः फले भवतः । तत् कोटिफलं केन्द्रादद्यन्तपादयोस्त्रिज्यायां योज्यम् । द्वितीयतृतीयपादयोस्त्रिज्यायां शोध्यम् । तद्वर्गभुजफलवर्गैक्य-मूलं शीघ्रकर्णः स्यात् । तद्भुजफलं त्रिज्याभ्यस्तं शीघ्रकर्णेनाप्तं फलं जीवा स्यात् । तस्या न्यूनज्या शोध्या । तत्सङ्ख्या दशभिर्गुणिता भागाः स्युः । तन्न्यूनज्याशेषा दशाभ्यस्ता ज्यान्तरखण्डकाप्ता लब्धं भागादिकं स्यात् । तद् भागादिकं पूर्वराशौ योज्यम् । तत् स्वशीघ्रफलं स्यात् । तत् केन्द्रपूर्वार्धे स्वग्रहे धनं स्यात् । केन्द्रपरार्धे ऋणं स्यात् । इति शीघ्रफलं प्रथमकर्मणि दलितं ततश्चतुर्थकर्मणि सकलं स्वग्रहे संस्कार्यम् । प्राग्वदनेन कर्मणा ग्रहाः स्फुटाः स्युः ।

अथ भौमादीनां प्राग्वदेव शीघ्रकेन्द्रदोर्ज्याः कोटिज्याश्च क्रमेण-[1]त्रिपञ्चाशतैकत्रिंशता [2]षोडशभिरेकोनषष्टचा नवभिः । ५३।३१ । १६ ।५९। ९ ।[3] सङ्गुण्याशीत्या विभजेत् । लब्धं दोःकोटी भवतः । प्राग्वदेव कोटिफलं त्रिज्यायां संस्कृत्य कर्णमानीय स्वग्रहेषु संस्कुर्यात् । ते ग्रहाः स्फुटाः स्युः ।

स्वशीघ्रोच्चभुक्तितो ग्रहभुक्तिं संशोध्य तच्छेषभागादिकं स्वशीघ्र-केन्द्रभोग्यदोर्ज्याखण्डेन सङ्गुण्य दशभिर्विभजेत् । लब्धं केन्द्रभुक्तिजीवा स्यात् । तां पूर्वोक्तशीघ्रगुणकैः सङ्गुण्याशीत्या विभजेत् । लब्धं त्रिज्याभ्यस्तं । १५० । शीघ्रकर्णाप्तं फलजीवा स्यात् । तां दशभिः सङ्गुण्य षड्विंशत्या । २६ । विभजेत् । लब्धं भुक्तिफलं भागादिकं स्यात् । तत् फलं त्रिज्यातः कर्णेऽधिके धनं स्वभुक्तौ, त्रिज्यातः कर्णे न्यूने भुक्तौ शोध्यम् । इत्थं चतुर्थशीघ्र-कर्मणि स्फुटभुक्तिः स्यात् । ऋणफलं मन्दभुक्तेरधिकं चेत् तदा तयोरन्तरं वक्रभुक्तिः स्यात् ॥ ६ ॥

[प्रकारान्तरेण मन्दफलम्]

स्पष्टेन वा स्वगुणकेन हृता त्रिमौर्वी
८०
खाष्टोद्धृता भवति चान्त्यफलस्य जीवा ।
सा दोर्ज्यया विगुणिता विहृता त्रिमौर्व्या
काष्ठीकृता भवति मन्दफलं ग्रहाणाम् ॥ ७॥

व्याख्या—1. M_1. M_2. द्विपञ्चाशता

2. M_1. M_2. अष्टपञ्चाशता in place of एकोनषष्टचा ।

3. These numbers should actually be ५२ । ३० । १५$\frac{1}{2}$ । ५८ । ८$\frac{1}{2}$ । —*KSS*

प्रकारान्तरेण मन्दफलं शीघ्रफलं च कथ्येते । तत् कथमित्युक्ते—भौमादीनां मन्दगुणकाः क्रमेण— । १८ । ५ । ८ । २ । १३ । तज्जनितान्त्यफलज्याः— भौमस्य । ३३ । ४५ । बुधस्य । ९ । २३ । गुरोः । १५ । ० । शुक्रस्य । ३ । ४५ । शनेः । २४ । २२ । इति ।

एकस्मिन् मते भौमगुरुसौरीणां फलान्यधिकानि । बुधशुक्रयोः फले स्वे स्वे भवतः ।

तस्मात् **केषांचिन्मते** मन्दगुणकस्फुटगुणकयोर्योगार्धं स्फुटगुणकाः स्युः, क्रमेण । १६ । ६ । ७ । ३ । ११ ।[1] तज्जनितान्त्यफलज्याः— भौमस्य । ३० । बुधस्य । ११ । १५ । गुरोः । १४ । ४ । शुक्रस्य । ५ । ३७ । सौरेः । २० । ३७ ।

खण्डखाद्यपक्षे— भौमस्य । २८ । ५५ । बुधस्य । ११ । ३७ । गुरोः । १३ । १६ । शुक्रस्य ५ । ४८ । सौरेः । १९ । ५४ ।

स्वेष्टदिने भौमादीनां मन्दकेन्द्रदोर्ज्याः स्वस्वप्रागुक्तमन्दान्त्यफलज्याभिर्गुणितास्त्रिज्याप्ता [१५०] लब्धं स्वफलज्याः स्युः । तद्धनुःकरणं पूर्वोक्तप्रकारेण स्वफलज्यातो न्यूनज्यां त्यक्त्वा तत्सङ्ख्या दशभिर्गुणिता भागाः स्युः । तच्छेषाद् दशाभ्यस्ताज्ज्यान्तराप्तं भागादिकम् । तत्पूर्वभागादिषु योज्यम् । तन्मन्दफलं स्यात् । तत्फलं स्वग्रहे प्राग्वत् संस्कुर्यात् । स्वफलज्या षड्विंशतेरल्पा चेत् तदा तद् दशाभ्यस्ता षड्विंशत्याप्ता लब्धं भागादिफलं स्यात् । तद्धनुः । तदेव स्वग्रहे संस्कुर्यात् ।

अनेनापि प्रकारेण रवीन्द्वोः स्फटीकरणार्थम् —रवेरन्त्यफलज्या । ५ । । ३५ । चन्द्रस्य । १३ । ० ।

खण्डखाद्यकपक्षे रवेरन्त्यफलज्या । ५ । ४० । चन्द्रस्य । १३ । ४ ।

तथैव रवीन्द्वोः केन्द्रदोर्ज्या स्वान्त्यफलज्याहता त्रिज्याप्ता [१५०] लब्धं स्वेष्टदिने स्वफलज्या स्यात् । तद्धनुः स्वमन्दफलं स्यात् । तत्संस्कृतौ चन्द्रार्कौ स्फुटौ भवतः ।

भौमादीनां स्फुटार्थं शीघ्रस्फुटगुणकाः— भौमस्य । ५१ । ३७ । बुधस्य । २९ । १६ । गुरोः । १५ । ३ । शुक्रस्य । ५७ । ४५ । सौरेः । ८ । १ । तज्जनितशीघ्रान्त्यफलज्याः— भौमस्य । ९६ । ४५ । बुधस्य । ५४ । ५३ । गुरोः । २८ । १३ । शुक्रस्य । १०८ । १७ । सौरेः । १५ । २ ।

व्याख्या - 1. These numbers should actually be १६ । ६ । ७½ । ३ । ११ ।
—*KSS*

मन्दस्फुटगुणैक्यार्धं स्फुटगुणको भौमस्य । ५२ । १८ । बुधस्य । ३० । ८ । गुरोः । १५ । ३२ । शुक्रस्य । ५८ । २२ । शनेः । ८ । ३१ । तज्जनितशीघ्रान्त्यफलज्याः— भौमस्य । ९८ । ४ । बुधस्य । ५६ । ३० । गुरोः । २९ । ८ । शुक्रस्य । १०९ । २६ । सौरेः । १५ । ५८ ।

खण्डखाद्यपक्षे शीघ्रान्त्यफलज्या— भौमस्य । ९६ । ५७ । बुधस्य । ५७ । ५० । गुरोः । २९ । ४५ । शुक्रस्य । १०७ । ५२ । सौरेः । १६ । २८ ॥ ७ ॥

[प्रकारान्तरेण शीघ्रफलम्]

कोटिज्यान्त्यफलज्ययोश्चलभवे केन्द्रे मृगाद्ये युतिं
कुर्यात् कर्कटकादिके च विवरं तद्वर्गयुक्ताद् भवेत् ।
बाहुज्याकृतितः पदं श्रुतिरतः कर्णेन भक्तो वधो[1]
बाहुज्यान्त्यफलज्ययोः फलधनुः स्याच्छीघ्रसंज्ञं फलम् ॥ ८ ॥[2]

स्वशीघ्रोच्चाद् ग्रहोनिताच्छीघ्रकेन्द्रदोःकोटिजीवां पृथक् पृथगानीय तत्केन्द्राद्यन्तपादयोस्तत्कोटिज्यां स्वशीघ्रान्त्यफलज्यायां युञ्ज्यात् । तद्वर्गं भुजवर्गे युञ्ज्यात् । असौ करणीत्युच्यते । स एव कर्णवर्गः । तन्मूलं कर्णः स्यात् । तत्केन्द्रद्वितीयतृतीयपादयोस्तत्कोटिज्याशीघ्रान्त्यफलज्ययोरन्तरं तस्य वर्गं भुजज्यावर्गे युञ्ज्यात् । असौ करणी । तन्मूलं कर्णः स्यात् । तद्भुजज्यां स्वशीघ्रान्त्यफलज्यया सङ्गुण्य कर्णेन विभजेत् । लब्धं स्वशीघ्रफलज्या स्यात् । सा षड्विंशतेरल्पा चेत् तामेव दशभिः सङ्गुण्य षड्विंशत्या विभजेत् । लब्धं भागादिकं शीघ्रफलं स्यात् । तल्लब्धशीघ्रफलज्या षड्विंशतेरधिका चेत् तस्यां न्यूनज्यां त्यक्त्वा तत्सङ्ख्या दशभिर्गुणिता भागाः स्युः । तच्छेषाद्दशगुणिताज्यान्तरेणाप्तं भागादिकं तत्पूर्वभागेषु योज्यम् । तत् स्वशीघ्रफलं स्यात् । इत्थं प्रथमशीघ्रफलार्धं मध्यग्रहे । तज्जनितद्वितीयमन्दफलार्धं तत्रैव । पुनस्तज्जनिततृतीयमान्दफलं सकलं मूलमध्यग्रहे संस्कार्यम् । असौ मन्दस्फुटग्रहः स्यात् । तज्जनितचतुर्थशीघ्रफलं सकलं तन्मन्दस्फुटग्रहे संस्कार्यम् । इति कर्मचतुष्टयाद् भौमादिकस्फुटग्रहः स्यात् ।

मूलम्— 1. M_1. M_2. M_3. बाहुज्याकरणे हृतेः कृतिरथो मूलेन भक्तः पदे

2. After verse 8, M_3. inserts व्याख्याकारश्लोकः । Then दोर्ज्या etc. (*vide* p. 184).

इति स्फुटगुणकान्त्यफलज्याभिर्मध्यस्फुटैक्यार्धगुणकान्त्यफलज्याभिश्च **खण्डखाद्योक्तान्त्यफलज्याभिश्चेति** त्रिभिः प्रकारैर्ग्रहाणां स्पष्टीकरणमुक्तम् । इति मतत्रये **खण्डखाद्योक्तस्पष्टीकरणं** सम्मतम् ।

विन्ध्यादुत्तरजानां तस्मात् खण्डखाद्यात् फलज्याभिर्मन्दफलशीघ्रफलान्यानीय ग्रहेषु संस्कुर्यात् । ते स्फुटग्रहाः स्युः । तत्र[1] रवेः परमफलं लिप्ताः । १३१ । चन्द्रस्य । ३०२ । भौमस्य परममन्दफललिप्ताः । ६७० । बुधस्य ।२६८। गुरोः । ३०६ । शुक्रस्य । १३१ । सौरेः । ४५९ ।

तथा मौमस्य परमशीघ्रफललिप्ताः । २४३० । बुधस्य । १३७१ । गुरोः । ६९० । शुक्रस्य । २७७७ । सौरेः । ३८० ।

इत्येतेषां फलानामन्येष्वपि **सिद्धान्तेषु तन्त्रेषु करणेषूक्त**जीवानां प्रकारेणान्यभुजजीवा आनयेत् । ता एव मन्दशीघ्रपरमफलज्याः स्युः । ताभिर्ज्याभिरत्रोक्तानेन प्रकारेण स्वेष्टदिने मन्दफलशीघ्रफलान्यानीय ग्रहान् स्पष्टीकुर्यात् ।

खण्डखाद्यपक्षेऽपि शुक्रस्य प्राग्गतिकालेऽस्तमयोदये भौमादीनां युतिरपि कदाचिद् गणितागतकाले न स्यात् , इति शुक्रस्यास्तमयश्चोदयश्च भौमादीनां परस्परयुतिश्च गणितागतकालादन्यथैव प्रत्यक्षदृष्टा स्यात्, मन्दोच्चशीघ्रोच्चाकर्षणाच्च स्फुटकर्मणा दुर्लभत्वात् ।

तस्मा**दार्यभटसिद्धान्ते** बहुभिः प्रकारैः स्पष्टीकरणमुक्तम् । अत्राप्युक्तप्रकारैस्त्रिभिरपि गणितागतकालस्यान्यथा तेषां स्पष्टीकरणं कर्तव्यमेव ।

फलज्याभिः स्पष्टीकृतभौमादीनां भुक्तिफलानि त्रिभिर**स्मदीयैः श्लोकै**रानयेत् । तत् कथमित्युक्ते—

दोर्ज्यान्तर[घ्न]भुक्त्यंशा दिगाप्तास्तद्गतज्यकाः ।
तद्गुणान्त्यफलज्यायास्त्रिज्याप्ताः फलकार्मुकम् ॥

मान्दं फलं गतौ स्वर्णं केन्द्रे कर्किमृगादिके ।
शैघ्र्ये स्वकेन्द्रभुक्तिज्या गुणितान्त्यफलज्यया ॥

कर्णाप्ता तद्धनुर्भुक्तौ कर्णे त्रिज्याधिके धनम् ।
कर्णे न्यून ऋणं भुक्तौ वक्रभुक्तिर्महत्यृणे ॥

भौमादीनां भुक्तिलिप्ताभ्यो भागादिभुक्तिं परिकल्प्य मन्दकेन्द्रदोर्ज्यान्तरेण हृत्वा दशभिर्विभजेत् । लब्धं स्वस्वभुक्तिजीवा स्यात् । [तां

व्याख्या—1. See *Notes* below.

स्वस्वमन्दपरमफलज्यया सङ्गुण्य त्रिज्यया विभजेत् । लब्धं भुक्तिफलजीवा स्यात् ।] तां दशभिः सङ्गुण्य षड्विंशत्या विभजेत् । लब्धं भागादिकं स्वस्वमन्दफलं स्यात् । तच्चन्द्रस्य भागादिकं सम्भवति । अन्येषां लिप्तादिकं स्यात् । तत् स्वस्वभुक्तौ केन्द्राद्यन्तपादयोः शोध्यम् । द्वितीयतृतीयपादयोर्योज्यम् ।

ततो भुक्तिशीघ्रफलानयनार्थं मन्दस्फुटभुक्तिशीघ्रोच्चभुक्त्योरन्तरं तच्छीघ्रकेन्द्रभुक्तिरित्युच्यते । तद्भागादिकं परिकल्प्य शीघ्रकेन्द्रदोर्ज्यान्तरेण सङ्गुण्य दशभिर्विभजेत् । लब्धं केन्द्रभुक्तिजीवा स्यात् । तां स्वस्वशीघ्रान्त्यफलज्यया सङ्गुण्य स्वशीघ्रकर्णेन विभजेत् । लब्धं भुक्तिफलजीवा स्यात् । तां दशभिः सङ्गुण्य षड्विंशत्या विभजेत् । लब्धं स्वस्वभुक्तिशीघ्रफलं स्यात् । तत् स्वस्वमन्दस्फुटभुक्तौ त्रिज्यातः कर्णेऽधिके योज्यम्, त्रिज्यातः कर्णे न्यूने शोध्यम् । इत्थं ग्रहाणां स्वस्वस्फुटभुक्तिः स्यात् ।

यदा शीघ्रफलं मन्दस्फुटभुक्तेरधिकं चेत् तयोरन्तरं ग्रहस्य तदा वक्रभुक्तिः स्यात् ।

तथा **अन्यसिद्धान्ततन्त्रकरणेष्वपि** ज्यान्तरैः परमफलज्याभिश्च भुक्तिफलं साधयेत् । इत्थं भौमादीनामतिस्फुटत्वं तद्भुक्तीनां च परिस्फुटत्वं सुव्यक्तं तज्ज्ञैर्विज्ञेयम् ॥ ८ ॥

[दिनप्रमाणम्]

$$\frac{६०}{\text{पलद्युतिघ्नाः}}\ \frac{४९}{\text{खरसा नवाब्धयः}}$$

$$\frac{२०}{\text{खबाहवः स्युश्चरखण्डकासवः ।}}$$

क्रमेण मेषादिगृहत्रयस्य तै-

श्चरार्धसिद्धिः सवितुर्भुजीकृतात् ॥ ९ ॥

अस्य व्याख्यानं **चन्द्रच्छायाधिकारे** पूर्वमेव "आयनेतरजदृक्फलोनयुक्" (९.३) इत्यादिवृत्तव्याख्याने सुव्यक्तमुक्तम् । अत्रापि प्रयोजनमात्रं

कथ्यते । तत् कथमित्युक्ते—विषुवच्छायां क्रमेण त्रिधा स्थाप्य षष्टया । ६० । एकोनपञ्चाशता । ४९ । विंशत्या ।२०। सङ्गुण्य षड्भिर्विभजेत् । लब्धं भुजराशित्रयस्य स्वदेशचरखण्डविनाड्यः स्युः । स्वेष्टदिने स्फुटार्कादयनांशसंस्कृताद्गतराशिसमं चरखण्डैक्यं संस्थाप्य तद्भागादिकं भोग्यचरखण्डकेन सङ्गुण्य त्रिंशता विभजेत् । लब्धं न्यस्तचरखण्डैक्ये योज्यम् । ता अर्कस्य स्फुट[चरार्ध]विनाड्यः स्युः । तच्चरार्धमुत्तरं चेत् पञ्चदशघटिकासु योज्यम् । दक्षिणं चेच्छोध्यम् । तच्चेष्टदिनेऽर्कस्य दिनार्धं स्यात् ।

तथैव दृक्कर्मकृततात्कालिकचन्द्रादयनांशसंस्कृताद् भुजस्य प्राग्वच्चरार्धमानयेत् । तच्चन्द्रस्य मध्यचरार्धं स्यात् । भौमादीनामपि चन्द्रवदेव चरार्धमानीय दिनार्धमानयेत् । स्वस्वदिनार्धं द्विगुणीकृतं स्वदिनप्रमाणं स्यात् । ततस्तत्कालचन्द्रविक्षेपलिप्ता विषुवच्छायाङ्गुलैर्हृत्वा षष्टया विभजेत् । लब्धं क्षेपजनितचरविनाड्यः स्युः । तल्लब्धचरस्य क्षेपदिगेव दिक् स्यात् । चन्द्रमध्यचरक्षेप[चर]योर्दिगैक्ये योगो भिन्नदिक्त्वेऽन्तरं चन्द्रस्य स्फुटचरार्धं स्यात् । तच्चरार्धं पञ्चदशघटिकास्वर्कवदेव संस्कार्यम् । तच्चन्द्रदिनार्धं स्यात् । भौमादीनामपि चन्द्रवदेव चरार्धमानीय दिनार्धमानयेत् । स्वस्वदिनार्धं द्विगुणीकृतं स्वस्वदिनप्रमाणं स्यात् ॥ ९ ॥

[चन्द्रविक्षेपः]

२४ ६०-५० 1
जिनांशजीवा कुरसोनषड्लवाः
३७००
तदीयवर्गः खखशैलवह्नयः ।
५
व्यगोर्भवेयुर्भुजशिञ्जिनीषुहृ-
९ 2
न्नवाहता क्षेपकलाः कलापतेः ॥ १० ॥

भानोः परमक्रान्तिभागाश्चतुर्विंशतिः । २४ । तस्य ज्या षष्ठांशोनैकषष्टिः । ६० ।५०। तद्वर्गः सहस्रत्रयं सप्तशताधिकम् । ३७०० । स्वेष्टकालिकस्फुटचन्द्राद्राहुं त्यक्त्वा भुजजीवामानीय नवभिः सङ्गुण्य पञ्चभिर्विभजेत् । लब्धं लिप्तादिकं चन्द्रविक्षेपः स्यात् ॥ १० ॥

मूलम्—1. A_2. B. Be. Bo_2. Bod. D. S_2. V_3. कुरसा विषड्लवाः । This reading is better. —*KSS*

2. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. V_2. V_3 कलावतः

[लम्बननाडिकाः]

त्रिराशिजीवा वलनज्यका हृता
५
शिलीमुखैरङ्गुलतां व्रजन्ति ताः ।
७५
द्विसङ्गुणा दृष्टिगतिः शराचलै-
र्विभाजिता लम्बननाडिकाः फलम् ॥ ११ ॥

ग्रहणद्वयेऽपि परिलेखनार्थं स्पर्शमोक्षकालिकवलनज्याश्च पृथक् पृथक् पञ्चभिराप्ता । ५ । लब्धं त्रिज्यावलनज्यानामङ्गुलानि स्युः । सूर्यग्रहणे

तिथ्यन्तं रजनीदलेन सहितं कृत्वा (६. २)

इत्यादिपाठेन मध्यलग्नमानीय तत्क्रान्त्यक्षांशानां दिगैक्ये योगो, भिन्नदिक्त्वेऽन्तरं मध्यांशाः स्युः । तज्ज्या मध्यज्या स्यात् । ततस्तन्मध्यज्यांशान् नवतेः संशोध्य शेषभागानां जीवामानयेत् । असौ मध्यलग्नशङ्कुः स्यात् । 'इनोदयात् तिथ्यवसानलग्नम्' (६. ४) इत्यादिपाठेन प्राग्वदुदयज्यामानीय मध्यज्यया सङ्गुण्य त्रिज्यया विभजेत् । लब्धवर्गमध्यज्यावर्गयोरन्तरान्मूलं दृक्क्षेपः स्यात् । ततः पर्वान्तोन्नतविघटिकाराशेरुत्तरचरार्धं शोध्यम् । दक्षिणचरार्धं संयोज्यम् । ततः शतेन विभजेत् । लब्धस्य क्रमजीवामानीय तद्दिवसद्युज्यया सङ्गुण्य त्रिज्यया हृत्वा तत्रोत्तरगोलक्षितिज्या योज्या । दक्षिणगोलक्षितिज्या शोध्या । सा तिथ्यन्तकालिका ज्या स्यात् । तां लम्बज्यया हृत्वा त्रिज्यया विभजेत् । लब्धं पर्वान्तशङ्कुः स्यात् । तच्छङ्कुवर्गं त्रिज्यावर्गात् । २२५०० । त्यक्त्वा मूलं तिथ्यन्तकालिकदृग्ज्या स्यात् । तद्दृग्ज्यावर्गदृक्क्षेपवर्गयोरन्तरान्मूलं दृग्गतिरित्युच्यते । तद् द्विगुणीकृत्य पञ्चसप्तत्या विभजेत् । लब्धं लम्बनघटिकाः स्युः ॥ ११ ॥

[प्रकारान्तरेण लम्बनं नतिश्च]

1
नतक्रमज्याम्बरशङ्कुनिघ्ना
५६२५
स्याल्लम्बनं तत्त्वरसेषुहृद् वा ।

मूलम्— 1. Be. नतक्रमज्या शरशिञ्जनीघ्नी ।
Bod. D. नतोत्क्रमज्या त्रिभशिञ्जिनीघ्नी ।
V_2. नतोत्क्रमज्याम्बरशङ्कुनिघ्नम् ।

दृक्क्षेपभुक्त्यन्तरयोश्च घातः

२२५०
खबाणयुग्माद्विहृतो नतिः स्यात् ॥ १२ ॥[1]

प्रकारान्तरेण लम्बनं कथ्यते। तत् कथमित्युक्ते—तिथ्यन्तनतघटिकाराशिं सप्तलब्धसङ्ख्यायाम् 'अङ्काश्विन' (१३. ३) इत्यादिपाठपिण्डज्यां संस्थाप्य तच्छेषं ज्यान्तराभ्यस्तं छेदेनाप्तं न्यस्तपिण्डज्यायां युञ्ज्यात्। तत् क्रमजीवा स्यात्। तां पूर्वोक्तखमध्यलग्नशङ्कुना सङ्गुण्यैकराशिज्यावर्गेण तत्त्वरसेषुनानेन। ५६२५। विभजेत्। लब्धं घटिकादिलम्बनं स्यात्।

ततः पूर्वोक्तदृक्क्षेपेण रवीन्दुभुक्त्यन्तरकलाः सङ्गुण्य तिथिघ्नत्रिज्यया खतत्त्वाक्षिसङ्ख्या। २२५०। विभजेत्। लब्धं लिप्तादि नतिः स्यात्। इमां नतिमन्त्यदृक्क्षेपेण वानयेत् ॥ १२ ॥

[पुनः प्रकारान्तरेण नतिलम्बने]

क्षमार्धदृक्क्षेपवधे च दृग्गतौ[2]
क्षमार्धघाते श्रुतियोजनोद्धृते।
यदाप्यते तद्धनुषोः कलान्तरे[3]
नतिर्भवेल्लम्बनमुक्तवत् कृते[4] ॥ १३ ॥

मूलम्— 1. After verse 12, B. Be. Bo_1. Bo_2. Bod. D. V_3. insert :

१३
त्रयोदशघ्नी लघुमध्यजीवा
८०
नतिर्भवेत् खाब्धिविभाजिता च।
क्षेपस्वनत्योः समभिन्नगोलयो-
र्योगान्तरस्पष्टकृतोऽन्यदुक्तवत् ॥

2. Bod. क्षेपार्धहृत्क्षेपवधेन दृग्गति।
D. त्रिभोनजक्षेपयुतोनदृङ्नतिः।
M_1. M_2. दृग्गती। It should be दृग्गतौ (क्षमार्धघातायां श्रुतियोजनहृतायाम्।)

3. Bod. D. कलान्तरं

4. Bod, D. फले for कृते

भूव्यासार्धयोजनानि । ५२५ । रविश्रुतेर्योजनानि लक्षचतुष्टयमेकोनषष्टिसहस्राणि पञ्चशतानि पञ्चाशीत्यधिकानि । ४५९५८५ । चन्द्रश्रुतियोजनानि चतुस्त्रिंशत्सहस्राणि त्रीणि शतानि सप्तसप्तत्यधिकानि । ३४३७७ । रवीन्द्वोः श्रुतियोजनानि स्वस्वमध्यभुक्तिलिप्ताभिः सङ्गुण्य स्वस्वस्फुटभुक्तिलिप्ताभिर्विभजेत् । लब्धं स्फुटश्रुतियोजनानि स्युः ।

असकृत्कर्मणा स्थिरीकृतदृक्क्षेपेण भूव्यासार्धं सङ्गुण्य द्विधा स्थाप्य क्रमेणार्कचन्द्रयोः स्फुटश्रुतियोजनैर्विभजेत् । स्वस्वलब्धं पृथक् पृथग् दशभिः सङ्गुण्य षड्विंशत्या विभजेत् । लब्धं भागादि स्वस्वधनुः स्यात् । तयोर्धनुषोरन्तरं लिप्तादि नतिः स्यात् । तन्नतेर्दिङ् मध्यज्यादिगेव । तत्काल[चन्द्र]-विक्षेपो नतिसंस्कृतस्फुटविक्षेपः स्यात् ।

ततस्तृतीयप्रकारेण लम्बनं कथ्यते । कथमित्युक्ते—पूर्वोक्तदृग्गत्या व्यासार्धं सङ्गुण्य द्विधा स्थाप्यार्केन्द्वोः स्फुटश्रुतियोजनैर्विभजेत् । लब्धं पृथक् पृथग् दशभिः सङ्गुण्य षड्विंशत्या विभजेत् । लब्धं भागादि स्वस्वधनुः स्यात् । तयोर्धनुषोरन्तरं लिप्तादिकं षष्ट्या सङ्गुण्य रवीन्द्वोः स्फुटभुक्त्यन्तरकलाभिर्विभजेत् । लब्धं धटिकादि लम्बनं स्यात् । तल्लम्बनं प्रर्वान्तधटिकासु ऋणं धनमसकृत्कृत्वा पूर्वोक्तप्रकारेण लम्बनमानयेत् ॥ १३ ॥

[दृक्फलम्]

राशित्रयान्वितखगोत्क्रमजातमौर्वी
६०-५०
क्षेपेण षष्टिलववर्जितभूरसैश्च । 1
२२५००
हत्वा हरेत् खखशराक्षियमैः फलं स्या-
ल्लिप्तादि दृष्टिभवकर्मणि खेचरस्य ॥ १४ ॥

तात्कालिकस्फुटचन्द्रादेर्ग्रहाद्राशित्रययुतादयनांशसंस्कृताद् भुजभागेभ्यो दशभिराप्तलब्धसङ्ख्ययोत्क्रमेण खण्डज्यैक्यं संस्थाप्य तच्छेषादनन्तरखण्डज्यागुणितादृशभिराप्ताल्लब्धं न्यस्तखण्डज्जैक्ये योज्यम् । असावुत्क्रमज्या स्यात् । तां स्वस्वविक्षेपलिप्ताभिः परमक्रान्तिज्यया । ६० । ५० । च सङ्गुण्य त्रिज्यावर्गेणानेन । २२५०० । विभजेत् । लब्धं लिप्तादिकमयनदृक्कर्मजनितफलं स्यात् । तत्फलस्य राशित्रयान्वितस्य ग्रहस्य विक्षेपस्य च दिगैक्ये स्वस्वग्रहे ऋणं कर्तव्यम् । भिन्नदिक्त्वे स्वस्वग्रहे धनम् ॥ १४ ॥

मूलम्— 1. V_2, क्षेपेण वर्जितविदिग्लवभूरसैश्च

यथास्थितव्योमगदोर्ज्यया वा
विवर्जिता ज्या भवनत्रयस्य ।
३७०
क्षेपाहता पूर्णतुरङ्गरामै-
[1]भाज्याद्यदृक्कर्मभवं फलं स्यात् ॥ १५ ॥

प्रकारान्तरेण दृक्कर्मफलं कथ्यते । तत् कथमित्युक्ते—तात्कालिक-स्फुटग्रहादयनांशसंस्कृताद् ग्रहस्थितायनं ज्ञात्वा तद्भुजाभागानां प्राग्वत् क्रमजीवामानीय त्रिज्यातः शोधयेत् । तच्छेष उत्क्रमज्या स्यात् । तां तात्कालिक-विक्षेपेण सङ्गुण्य सप्तत्यधिकशतत्रयेण । ३७० । विभजेत् । कलादि फलं स्यात् । तत्फलं ग्रहस्थितायनस्य विक्षेपस्य च दिगैक्ये ऋणं, भिन्नदिक्त्वे धनं स्यात् । क्षेपघ्नोत्क्रमजीवां पूर्वोक्तां जिनांशजीवया सङ्गुण्य त्रिज्यावर्गेणाप्तं यत्फलं तदेव त्रिज्यावर्गाज्जिनांशजीवयाप्तं फलं भागहारं परिकल्प्यानेन । ३७० । भागहारेण क्षेपघ्नग्रहोत्क्रमज्यायाः फलं लिप्तादिकमयनदृक्कर्मजनितं स्यादित्युक्तम् ।

ततो ग्रहस्याक्षजदृक्कर्मफलम् । प्राग्वद् विक्षेपगुणितां विषुवच्छायां द्वादशभिर्भजेत् । तत् फलं स्वनतघटिकाभ्यस्तं स्वदिनार्धाप्तलब्धमुत्तरविक्षेपे तात्कालिकग्रहे प्राक्कपाले शोध्यम् । अपरकपाले योज्यम् । दक्षिणविक्षेपे प्राक्कपाले योज्यम् । अपरकपाले शोध्यम् । इत्थं दृक्कर्मद्वयशुद्धतात्कालिकग्रहः स्यात् ।

अश्विन्यादिध्रुवेष्वप्यक्षदृक्कर्मैकमेवानेन प्रकारेण कुर्यात् । तात्कालिक-दृक्कर्मशुद्धध्रुवः स्यात् ॥ १५ ॥

[चन्द्रशृङ्गोन्नतिः]

अमृतदीधितिशृङ्गसमुन्नतिं
समवगन्तुमपूर्णगुणैः कृतान् ।
श्रवणकोटिभुजान् नवभिर्भजेद्
[2]गततुषाष्टयवाङ्गुलसिद्धये ॥ १६ ॥ [3]

मूलम्— 1. Bod. D. भाज्याथ दृक्कर्म ; V_2. भक्ताथ दृक्कर्म

2. M_1. M_2. M_3. have a lacuna : ग[तषाष्ट]य

3. After verse 16, B. Be. Bo_1. Bo_2. Bod. D. V_3 insert

इदानीं नवपिण्डज्याभिस्त्रिज्यासार्धशतेन चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं भुजकोटिकर्णान् साधयेत् । तत् कथमित्युक्ते—शुक्लपक्षद्वितीयायां सायं चन्द्रार्कौ स्फुटौ कृत्वा चन्द्रस्य दृक्कर्मद्वयं कुर्यात् । ततश्चन्द्रार्कयोः स्फुटचरार्धे आनीय तदर्कगम्यं चन्द्रगतमानीय तयोर्योगः कार्यः । तच्चन्द्रभोग्योन्नतघटिकादिकं स्यात् । तत्र चन्द्रस्योत्तरचरार्धं [चेत्] शोध्यम् । दक्षिणचरार्धं चेद् योज्यम् ।

तद्विघटिकाभ्यः शतेनाप्तफलस्वक्रमजीवामानीय स्वद्युज्यया सङ्गुण्य त्रिज्यया विभजेत् । लब्धं चन्द्रस्योत्तरक्षितिज्यया सहितं दक्षिणक्षितिज्यया रहितं तदेव तात्कालिकच्छेदः स्यात् । तस्माल्लम्बज्ययाभ्यस्ता त्रिज्ययाप्ता फलं तात्कालिकचन्द्रशङ्कुः स्यात् । तं विषुवच्छायया सङ्गुण्य द्वादशभिर्विभजेत् । लब्धं शङ्कुतलं स्यात् । तस्य दिग् दक्षिणैव । त्रिज्या द्वादशाभ्यस्ता स्वाक्षकर्णेनाप्ता फलं लम्बज्या स्यात् । तच्चन्द्रार्कयोरयनांशसंस्कृतयोः स्वस्वदोर्ज्या त्रयोदशगुणिता द्वात्रिंशद्भक्ता चन्द्रार्कयोः स्वस्वक्रान्तिज्या स्यात् । तच्चन्द्रक्रान्तिज्यायाधनुः कृत्वा तद्धनुभागेषु तत्कालचन्द्रविक्षेपभागान् संस्कृत्य ततस्तज्ज्यामानयेत् । सा चन्द्रस्फुटक्रान्तिज्या स्यात् ।

पृथक् तत्क्रान्तिज्यावर्गं त्रिज्यावर्गात् । १२५००। त्यक्त्वा मूलं चन्द्रद्युज्या स्यात् । स्फुटचन्द्रक्रान्तिज्या विषुवच्छायाभ्यस्ता द्वादशाप्ता चन्द्रक्षितिज्या स्यात् । इति चन्द्रद्युज्याचन्द्रक्षितिज्ययोरुक्तप्रयोजनं चन्द्रस्य तत्कालशङ्क्वग्रार्थमेव । नान्यत् ।

त्रिज्यार्ककान्तिज्याभ्यस्ता लम्बज्याप्ता रवेरग्रज्या स्यात् । चन्द्रस्फुटक्रान्तिज्याभ्यस्ता लम्बज्याप्ता चन्द्राग्रज्या स्यात् । तस्याश्चन्द्रक्रान्तिदिगेव दिक् स्यात् । अग्रज्याशङ्कुतलयोः समदिक्कयोर्योगो, भिन्नदिक्कयोरन्तरम् । अधिकदिक् चन्द्रभुजः स्यात् ।

ततः शुक्लद्वितीयायामन्यतिथिषु वा स्वेष्टकाले सूर्योदयघटिकानां लग्नमानीय चन्द्रं तात्कालिकं कृत्वा दृक्कर्मद्वयं कुर्यात् । तच्चन्द्रः स्वपूर्वाह्णे चेच्चन्द्रस्य भोग्यं लग्नस्य भुक्तं च मध्योदयसहितं चन्द्रभुक्तोन्नतं स्यात् । तथा तत्कालदृक्कर्मसंस्कृतश्चन्द्रः स्वापराह्णगश्चेत् तत्काललग्ने राशिषट्कं

(repeat) शाके etc. and स्तम्बेरमा etc. (p. 15 fn.), followed by verse 17. After verse 16, M_3 inserts व्याख्यानकारश्लोकाः—बिम्बार्धं to बुधैः (see pp. 193), below. After verse 16, the chapter in V_2 ends and the above two verses begin a new chapter, followed by verse 17.

योज्यम् । तदस्तलग्नं स्यात् । तल्लग्नभोग्यं चन्द्रभुक्तं च मध्योदयसहितं तच्चन्द्रभोग्योन्नतं स्यात् । ततस्तदुन्नतघटिकाकाले प्रागुक्तप्रकारेण चन्द्रशङ्कुमानीय तच्छङ्कुतलाग्रज्ययोर्योगान्तराच्च चन्द्रभुजमानयेत् । ततस्तात्कालिकोदयलग्नं च रविं परिकल्प्य तस्माल्लग्नादयनांशसंस्कृताद् भुजजीवामानीय त्रयोदशभिः सङ्गुण्य द्वात्रिंशता विभजेत् । लब्धं क्रान्तिज्या स्यात् । क्रान्तिज्यया त्रिज्यां । १५० । सङ्गुण्य लम्बज्यया विभजेत् । लब्धमग्रज्या स्यात् । अग्रावेव रविभुजः स्यात् ।

इत्थं शुक्लद्वितीयायां रवीन्द्वोर्भुजयोर्वान्यतिथिषु रवीन्द्वोर्भुजयोर्भिन्नदिक्कयोर्योगः स्फुटभुजः स्यात् । तस्य चन्द्रभुजदिगेव दिक् स्यात् । अथवा रवीन्द्वोर्भुजयोः समदिक्कयोरन्तरे तच्छेषः स्फुटभुजः स्यात् । तत्र चन्द्रभुजः स्वल्पश्चेद् तदा व्यस्तदिक् स्यात् । चन्द्रभुजोऽधिकश्चेत् तदा चन्द्रभुजस्य दिगेव स्फुटभुजस्य दिक् स्यात् । रवीन्द्वोर्भुजयो[स्समदिक्कयो]रन्तरे कृते निःशेषश्चेत् तदा चन्द्रशृङ्ग[द्वयं] सममेव स्यात् । स्फुटभुजो यदोत्तरस्तदा दक्षिणशृङ्गमुन्नतं स्यात् । स्फुटभुजो यदा दक्षिणस्तदोत्तरशृङ्गमुन्नतं स्यात् ।

शुक्लद्वितीयायामन्यतिथिष्वपि चन्द्रोन्नतघटिका आनयेत् । चन्द्रशङ्कुरेव स्फुटभुजस्य कोटिः स्यात् । तद्भुजकोट्योर्व[र्गयो]र्योगान्मूलं कर्णः स्यात् । इत्थं भुजकोटिकर्णान् नवभिर्विभजेत् । लब्धमङ्गुलादिका भुजकोटिकर्णाः स्युः ।

शृङ्गोन्नत्यधिकारे पूर्वोक्तभुजकोटिकर्णान् शतद्वयेन भक्त्वा तल्लब्धतुल्याङ्गुलादिकाः स्युः इत्युक्ताङ्गुलेष्वेकैकमङ्गुलं तिर्यक्स्थितवितुषयवोदराष्टकतुल्यप्रमाणं स्यात् ।

शुक्लपक्षे व्यर्केन्दुभागेभ्यः पञ्चदशभिराप्तं फलं शुक्लाङ्गुलानि स्युः । कृष्णपक्षे राशिषट्कयुतार्कोनेन्दुभागेभ्यः पञ्चदशभिराप्तं कृष्णाङ्गुलानि स्युः ।

दिक्साधितवृत्तमध्यबिन्दुतः स्वदिशि दक्षिणोत्तररेखायां स्फुटभुजाङ्गुलानि प्रसार्य अन्ते बिन्दुं दत्वा तद्बिन्दुतः कोटयङ्गुलानि चन्द्रः स्वापराह्णगश्चेत् तदा प्राक् प्रसारयेत् । चन्द्रः पूर्वाह्णगश्चेत् तदा कोटयङ्गुलानि प्रत्यक् प्रसारयेत् । तदन्ते बिन्दुं दद्यात् । ततो दिङ्मध्यबिन्दुतः कर्णाङ्गुलानि तिर्यक् प्रसार्य कोटयग्रबिन्दुमध्ये न्यसेत् । तद्बिन्दुं मध्यं कृत्वा षडङ्गुलसूत्रप्रमाणेन मण्डलं विलिखेत् । तद् द्वादशाङ्गुलं चन्द्रमण्डलं स्यात् । तत्कर्णाङ्गुलान्येव पूर्वापररेखां परिकल्प्य तामेव चन्द्रमण्डलमध्यात् पूर्वापरपरिधिसंस्पृष्टां प्रसार्य तदग्रे दद्यात् ।

तत्पूर्वापरबिन्दुद्वयं मध्यं कृत्वा पृथक् पृथग् द्वादशाङ्गुलप्रमाणसूत्रेण वृत्तद्वयं विलिखेत् । तत्र दक्षिणोत्तरस्थितं मत्स्यद्वयमुत्पद्यते । तन्मुखपुच्छसक्तरेखा दक्षिणोत्तररेखा स्यात् । तद्रेखासंलग्नपरिधौ चन्द्रमण्डलदक्षिणोत्तरयोर्बिन्दुद्वयं स्यात् । चन्द्रमण्डलपश्चिमबिन्दुतः शुक्लाङ्गुलानि शुक्लपक्षे कर्णरेखागत्या प्राक् प्रसार्य तदग्रे बिन्दुं दद्यात् । तथा कृष्णपक्षे कृष्णाङ्गुलानि प्राक् प्रसार्य तदग्रे बिन्दुं दद्यात् । ततः पूर्वोक्तप्रकारेण कृष्णाङ्गुलाग्रबिन्दुं चन्द्र[मण्डल]दक्षिणोत्तरयोर्बिन्दुद्वयं च मध्यं कृत्वा पृथक् पृथक् षडङ्गुलप्रमाणसूत्रेण वृत्तद्वयं विलिखेत् । तद्वृत्तत्रयसंयोगान्मत्स्यद्वयमुत्पद्यते । तन्मत्स्यद्वयमुखपुच्छसक्तसूत्रद्वययोगस्थानबिन्दुदक्षिणोत्तरशुक्लकृष्णाग्रबिन्दुत्रयसंसक्तार्धवृत्तं विलिख्य चन्द्रस्य शृङ्गोन्नतिं विजानीयात् ।

अथवा बिन्दुत्रयाग्रवृत्तत्रयलेखनं विना सुखोपायेन शृङ्गोन्नतिं विजानीयात् । तत् कथमित्युक्ते—तदर्थं अस्मदीयश्लोकाः । ते विज्ञातव्याः ।

बिम्बार्धशुक्लविश्लेषवर्गात् षड्गुणितात् पुनः ।
बिम्बवर्गान्वितं मूलं धनुः कृष्णेऽपि कृष्णतः ॥

बिम्बव्यासो धनुर्ज्या स्यान्मध्या स्याद् दक्षिणोत्तरा ।
विन्यस्य धनुषो मध्यं शुक्लकृष्णाग्रबिन्दुतः ॥

दक्षिणोत्तरबिन्द्वोस्तु धनुः कोटिद्वयं न्यसेत् ।
धनुषा खण्डितं बिम्बं यथा भेऽस्ति तथेक्ष्यते ॥

शुक्लखण्डं सिते पक्षे प्रत्यक् स्याद् विधुमण्डले ।
प्राचीनं कृष्णखण्डं स्यात् कृष्णं व्यक्तं सितासितम् ॥

अष्टम्या ऊर्ध्वतोऽधस्तात् प्राक्प्रत्यक्खण्डयोः क्रमात् ।
इन्दोः शृङ्गोन्नतिर्ज्ञेया पक्षयोरुभयोर्बुधैः ॥

इदानीं कल्पितबिम्बार्धषडङ्गुलानि । तेषां शुक्लपक्षे शुक्लाङ्गुलैः सहान्तरम् । तच्छेषाङ्गुलानि वर्गीकृत्य तद्वर्गं षड्भिः सङ्गुण्य तद्बिम्बाङ्गुलवर्गे चतुश्चत्वारिंशदधिकशते । १४४ । संयोज्य तन्मूलमङ्गुलादिकं धनुः स्यात् । तद्धनुषोर्बिम्बव्यासो द्वादशाङ्गुलानि । दक्षिणोत्तरबिन्दुद्वयमध्यस्थितानि जीवा स्यात् । सैव ज्या तद्धनुषि संयोज्या ।

तत् कथमित्युक्ते—शुक्लपक्षकृष्णपक्षयोः क्रमेण शुक्लकृष्णाङ्गुलाग्रबिन्दुमध्ये धनुरङ्गुलप्रमाणशलाकां मध्यं विन्यस्य तदुभयाग्रमुभयपार्श्वयोर्धनू-

रूपं वक्रं कृत्वा दक्षिणोत्तरबिन्दुद्वये न्यसेत् । तद्धनुरष्टम्याः प्राक्तिथिषु विम्बापरभागे प्राङ्मुखं तिष्ठति । अष्टमीमध्यकाले तद्धनुषोरभावात् तन्मध्यज्याखण्डिते शुक्लकृष्णदले तुल्ये भवतः । अष्टम्याः परतिथिषु तद्धनुर्बिम्बपूर्वभागे प्रत्यङ्मुखं तिष्ठति । इत्थमनेन धनुषा खण्डितं चन्द्रमण्डलं परिलिखितकाले समभूमौ यादृग् दृष्टं स्पष्टमाकाशे तादृगेव दृश्यते । खण्डितं तत् खण्डद्वये शुक्लपक्षे प्रतीचीनं शुक्लखण्डं, प्राचीनं कृष्णखण्डं स्यात् । कृष्णपक्षे प्रतीचीनं कृष्णखण्डं, प्राचीनं शुक्लखण्डं स्यात् । शुक्लपक्षेऽष्टम्याः प्राक्तिथिषु चन्द्रबिम्बे पश्चिमखण्डे शुष्लशृङ्गोन्नतिर्ज्ञेया । ततोऽष्टम्याः परतिथिषु पूर्वखण्डे कृष्णशृङ्गोन्नतिर्ज्ञेया । शुक्लपक्ष इव कृष्णपक्षे तु पश्चिमखण्डेऽष्टम्याः प्रागेव कृष्णशृङ्गोन्नतिर्ज्ञेया । अष्टम्याः परतः प्राचीनखण्डे चन्द्रस्य शुक्लशृङ्गोन्नतिर्ज्ञेया ।

इत्युभयपक्षेऽपि गणितशास्त्रेषु बुद्धिमद्भिर्गणकैश्चन्द्रस्य शृङ्गयोरुन्नतिर्ज्ञेया ॥ १६ ॥

[कविवृत्तम्]

इति गुणगणमङ्गलालयायाः[1]
कमलनिभं कमलासनात्मजायाः ।
अभिहितमभिवन्द्य देवताया-[2]
श्चरणयुगं ग्रहकर्म तत्प्रभावात् ॥ १७ ॥[3]

आसीदशेषबुधवन्दितपादपद्म-
स्तालध्वजो[4] गुणवदग्रजवंशजन्मा ।
साम्बस्ततोऽजनि जनेत्तणकैरवेन्दु-
र्भट्टस्त्रिविक्रम इति प्रथितः पृथिव्याम् ॥ १८ ॥

मूलम् —1. Bod. D. मण्डनामलायाः

2. A_2. B. Be. Bo_1. Bo_2. Bod. D. S_2. अभिमत

3. Bod. D. दृक्प्रभावात्

4. Except M_1. M_2. M_3, all complete Mss. and D. have तल्लब्धजो

लल्लेन तस्य तनयेन शशाङ्कमौलेः
शैलाधिराजतनयादयितस्य शम्भोः ।
सम्पूज्य पादयुगमार्यभटाभिधानं
सिद्धान्ततुल्यफलमेतदकारि तन्त्रम् ॥ १९ ॥[1]

शिष्यधीवृद्धिदं कृत्वा लल्लोऽहं स्तौमि पार्वतीम् ।
ब्रह्मविद्यां महामायां ब्रह्मविष्णुशिवार्चिताम् ॥ २० ॥[2]

पद्मासनस्य मुखजा, गुणानामाश्रया, शुभसरस्वती । तस्याः सरस्वत्याः पद्मनिभं पादयुगं प्रणम्य तत्सरस्वतीप्रभावाद् ग्रहगणितमभिहितम् ।

तत् केन कस्मादित्युक्ते—विद्वन्मुखः **तालध्वजो** गणितज्ञो विप्रः । तत्पुत्रः **साम्बो**, रूपवान् गुणवान्, नाम्ना भट्टत्रिविक्रम इति प्रख्यातः ।

तत्पुत्रेण **लल्लेन** चन्द्रमौलेः पार्वतीवल्लभस्य शम्भोः पादयुगलं सम्पूज्य **आर्यभटसिद्धान्तार्थवेदिना** तत्तुल्यफल**शिष्यधीवृद्धिदं** महातन्त्रमेतत् सम्यक् प्रोक्तम् ।

इत्युक्तवृत्तत्रयेण **लल्लाचार्येण** सरस्वतीप्रभावात् ग्रन्थकर्तृत्वलक्षणं स्वसामर्थ्यं प्रतिपादितम् ।

मूलम्— 1. After verse 19, B. Be. Bo. Bo_2. Bod. D. S_2. V_3. insert :

आदौ व्योमगतिस्ततः स्फुटगतिस्त्रिप्रश्नचन्द्रग्रहा-
वादित्यग्रहपौर्णमासकरणं चन्द्रोदयः संयुतिः ।
एवं तन्त्रमिहाष्टधा स्थितमिदं यो वेत्ति सम्यग् ग्रहं
तं दैवज्ञमिति ब्रुवन्ति गणकाः शेषाः कुसांवत्सराः ॥

With this verse the chapter in these Mss. and the Mss., except D end. Ms. D. continues with the *Goladhyaya*.

After verse 19, the chapter in A_2. ends and the Ms. also ends. After verse 19, the new chapter in V_2 ends; the Ms. too ends with the verse.

2. After verse 20, M_3. ends.

इत्थं शिष्यधीमहातन्त्रस्य व्याख्यानं सम्पूर्णमिति शुभम् ।

इति श्रीमल्लिकार्जुनसूरिविरचिते शिष्यधीमहातन्त्रतात्पर्यव्याख्याने

शुद्धग्रहाध्याये बीजवासनाध्यायस्त्रयोदशः[1] ॥

देवीप्रसादसमुपार्जितधर्मकर्म सामर्थ्यसन्ततिवशेन समस्तमेतत् ।

अस्तं प्रयात्वपि च सुस्थितबान्धवस्य सभ्रातृमित्रतनयस्य ममास्तु शर्म ॥

इति श्रीवेङ्गिदेशसमुद्भवेन[1] कौण्डिन्यान्वयेन महाप्रख्यातेन

श्रीभदनन्तनारायणाचार्यपौत्रेण सर्वज्ञ-नङ्गनार्यानुजेन

श्रीशैल-मल्लिकार्जुनदेवस्य नाम्ना प्रख्यातमल्लिकार्जुनसूरिणा विरचितं

शिष्यधीमहाभाष्यमेतत् सम्पूर्णम् ॥

व्याख्या—1. M_1. M. °चतुर्दश

2. M_1. वङ्ग°

अथ छेद्यकाधिकारो नाम

चतुर्दशोऽध्यायः

[मङ्गलाचरणम्]

जगदिदमखिलं समस्तसिद्धं
द्रुतमधिगच्छति यत्प्रसादतस्तम् ।
वदनसरसिजे मनीषिणां या
वसति च तां प्रणिपत्य वच्मि गोलम् ॥ १ ॥

[गोलप्रशंसा]

शशधरकिरणैर्विना प्रदोषः
कुचरहितं ललनाजनस्य वक्त्रः ।
मधुररसविवर्जितं च भोज्यं
न किमपि गोलविवर्जितं च तन्त्रम् ॥ २ ॥

वादी यथाऽव्याकरणो न भाति
श्रुतिस्मृतिभ्यां रहितश्च यज्वा ।
भिषग् यथा सम्यगदृष्टकर्मा
सांवत्सरस्तद्वदगोलवेदी ॥ ३ ॥

सङ्ख्याय[1] शास्त्रविद एव वदन्ति गोलं
गोलागमे पटुधियो ग्रहचेष्टितज्ञाः ।
ये जानते न गणितं न च गोलतत्त्वं
जानन्ति ते ग्रहगतिं न कथंचिदज्ञाः[2] ॥ ४ ॥[3]

यो वेत्ति सम्यगमुमर्कपुरःसराणां
नानाप्रकारवरचारुविचारचारुम् ।
प्रत्यक्षवत् सकलमेव स वेत्ति विश्वं
धर्मार्थमोक्षयशसामपि भाजनं स्यात् ॥ ५ ॥

यन्मध्यादिकमुक्तं तत् प्रत्यक्षं च दृश्यते गोले[4] ।
छेद्यकविधौ ग्रहाणां विशेषतस्तद्विदाचार्यैः ॥ ६ ॥

[छेद्यकविधिः]

निजकक्षावृत्तं यत्तस्माद् व्यासार्धमण्डलं विलिखेत् ।
तद् द्वादशराश्यङ्कयं तस्योर्वी मध्यतः कल्प्या ॥ ७ ॥

मूलम्— 1. A_3 सङ्ख्यानि 2. Mss. other than D. कथं यदज्ञाः

3. Verse 4 should probably read as follows :

संख्यानशास्त्रविद एव विदन्ति गोलं
गोलागमे पटुधियो ग्रहचेष्टितज्ञाः ।
ये जानते न गणितं न च गोलतत्त्वं
जानन्ति ते ग्रहगतिं न कथंचिदज्ञाः ॥

—*KSS*

4. Yallaya (in his Com. on *SūSi*, xii) quotes this hemistitch in the form :

यन्मध्यादिकमुक्तं प्रत्यक्षं तत्प्रदृश्यते गोले ।

—*KSS*

द्युचरस्यान्त्यफलज्यासमानमपि वर्धितं नयेत् सूत्रम् ।
भूमध्यात् स्वाभिमुखं[1] त्रिभज्यया केन्द्रवृत्तमत्र लिखेत् ॥ ८ ॥

परमफलजीवया स्वोच्चनीचवृत्तं लिखेत् स्वकक्षाग्रे ।
स्वोच्चसमानो मध्यो यदा तदोच्चे ग्रहस्थानम् ॥ ९ ॥

स्वोच्चात् षड्भाभ्यधिको यदा तदा भवति स्वनीचस्थः ।
दूरेणोच्चग उर्व्याः[2] कर्णवशान्नोच्चगो निकटे ॥ १० ॥

अत एव द्युचराणामणुता भवति क्रमान्महत्वं वा ।
सवितुश्चासन्नानां दूरगतानां क्रमेणैव ॥ ११ ॥

अनुलोमं निजमन्दात् प्रतिलोमं गच्छति स्वशीघ्रोच्चात् ।
कक्षावृत्ते मध्यः स्वकेन्द्रवृत्ते ग्रहः स्पष्टः[3] ॥ १२ ॥

वेगः स्वकेन्द्रवृत्ते यः कक्षामण्डलेऽपि स एव ।
मध्यैव गतिः स्पष्टा वृत्तद्वययोगगे द्युचरे ॥ १३ ॥

मध्यमतुल्यं स्पष्टं भान्तगते भार्धगेऽपि वा केन्द्रे ।
द्रष्टा पश्यति यस्मात् मध्यस्यातः फलाभावः ॥ १४ ॥

स्पष्टं पश्यति यस्मात् मध्यादूनाधिकं नरस्तस्मात् ।
विवरं तयोः फलमृणं धनं च मध्यग्रहे क्रियते[4] ॥ १५ ॥

मूलम्— 1. Probably स्वोच्चमुखं । —*KSS*

2. Probably दूरे स्वोच्चग । —*KSS*

3. Bod. D, ग्रहाः स्पष्टाः ।

4. After 15, A_3 inserts इति नीचोच्चवृत्तभङ्गिः ।

अन्त्यफलज्याग्रात् कोटिरुपरि केन्द्रे मृगादिगे यस्मात् ।
कीटादिगते चाधस्तत्र तदैक्यान्तरं कोटिः ॥ १६ ॥[1]

कोटिफलमुपरि यस्माद् वान्त्ये प्रथमे पदे भवेत् त्रिगुणात् ।
मध्यमयोश्च यतोऽधस्ततो युतिर्वान्तरं कोटिः ॥ १७ ॥

भूग्रहमध्ये कर्णः स्वकर्णमध्यग्रहान्तरे च फलम् ।
भवति सदा बाहुज्या ग्रहनीचोच्चरेखान्तः ॥ १८ ॥

मध्यैव योक्ता हि गतिर्ग्रहाणां
स्पष्टा गतिः सैव च पर्ययास्ते ।
वक्रोदये[2] दृष्टिवशाद् विकारा-
स्तेभ्यो हि नान्ये भगणा भवन्ति ॥ १९ ॥

इति श्रीलल्लाचार्यविरचिते गोले छेद्यकाध्यायः प्रथमः ॥

[इति शिष्यधीवृद्धिदतन्त्रे चतुर्दशोऽध्यायः]

मूलम् — 1. After 16, Bod. inserts इति नीचोच्चवृत्तभङ्गिः ।
2. Probably वक्रादयो । —*KSS*

अथ गोलबन्धाधिकारो नाम

पञ्चदशोऽध्यायः

अथ खगोलबन्धः

पूर्वापरमूर्ध्वमधः प्रथमं सममण्डलं जगुर्वृत्तम् ।
याम्योत्तरं च तद्वत् तथैव वृत्तद्वयं च विदिशोः ॥ १ ॥

आवेष्ट्यमानमेतान्यर्धच्छेदेन यद् भवेद् वृत्तम् ।
तत् क्षितिजमण्डलं स्यादुदयास्तमयाविह द्युसदाम् ॥ २ ॥

वृत्ते प्रागपरे कुजाक्षभवयोः सक्तं द्वयो संज्ञयोः
सौम्यक्षमाभववृत्तयोगजनितादङ्कात् ध्रुवे चोपरि ।
स्वाक्षांशाङ्कगतेऽथ याम्यकुजयोर्योगादधोऽक्षांशकै-
र्वृद्धिर्हानी विधाय वासरनिशोरुन्मण्डलं मण्डलम् ॥ ३ ॥

षडमूनि नभोगोले भगणांशैरङ्कितानि षष्ट्यङ्कम् ।
विषुवद्वृत्तं नाड्याह्वयं भगोले स्थितमस्याधः ॥ ४ ॥

॥ इति खगोलबन्धः ॥

अथ भगोलबन्धः

समवृत्तादक्षांशैर्दक्षिणतो भवति नाडिकावृत्तम् ।
खस्वस्तिकादधस्तादुत्तरतोऽक्षांशकैरेव ॥ ५ ॥

याम्योत्तरमत्रान्यद् विवेष्टमानं समन्ततः कुजवत् ।
ध्रुवयाम्योदक्स्वस्तिकसक्ता ध्रुवयष्टिरन्तर्भूः ॥ ६ ॥

मेषतुलादौ लग्नं नाडीवृत्तेऽपमण्डलं तदुदक् ।
२४
जिनभागैः कर्क्यादौ याम्यैस्तैरेव मकरादौ ॥ ७ ॥

भ्रमति रविरत्र वलये ग्रहाश्च चन्द्रादयः स्वपातयुताः ।
भूभा भार्धे भानोः[1] स्वशीघ्रवृत्ते ज्ञसितपातौ[2] ॥ ८ ॥

विक्षेपमण्डलदलं पूर्वं क्षेपांशकैरुदक् पातात् ।
षड्भयुताद् दक्षिणतो दिङ्मण्डलार्धं द्वितीयं स्यात् ॥ ९ ॥

वृत्तत्रयमपमांशैर्नाडीवृत्ताद् भवत्यजादीनाम् ।
व्यस्तं कर्क्यादीनामेवं षण्णां तुलादीनाम् ॥ १० ॥

इष्टक्रान्तेरग्रे तद्द्युज्यामण्डलं च बध्नीयात् ।
मध्येऽस्य ग्रहगोला[3] भवन्ति[4] वृत्तैर्भगोलस्य ॥ ११ ॥

॥ इति भगोलबन्धः ॥

अथ ग्रहगोलबन्धः

विषुवद्वृत्तस्थित्या खचराणां कक्षया समं वृत्तम् ।
याम्योत्तरं च कार्यं परिकरसंस्थं क्षितिजवच्च ॥ १२ ॥

---

1. V_1 भानोर्भार्धं
2. V_1 सितज्ञपातौ
3. A_3. V_1 ग्रहगोलो
4. A_3. V_1 भवति

नाडीवृत्तादपमण्डलं भवेद् यत् तदेव दातव्यम् ।
कक्षावृत्तात् खचरापमण्डलं ग्रहभवृत्तं तत् ॥ १३ ॥

[1]
सप्तमृदुकेन्द्रवृत्तान्यन्यानि च शीघ्रकेन्द्रवृत्तानि ।
प्रतिमण्डलानि तद्वद् ग्रहगोलाधो महीगोलः ॥ १४ ॥

उन्मण्डले विलग्नं क्रान्तिज्याग्रे परे च पूर्वे च ।
याम्योत्तरे नतांशैश्चलग्रहभ्रमभवं वलयम् ॥ १५ ॥

॥ इति ग्रहगोलबन्धः ॥

अथ सामान्यगोलबन्धः

याम्योदग् वा मध्यज्यावृत्तं मध्यलग्नमत्र वृतौ ।
दृङ्मण्डलमुपरिष्टाद् दृष्टः स्यात् तद्वृतौ खचरः ॥ १६ ॥

दृग्गतिजीवावलयं मध्यविलग्नस्य संस्थितं पुरतः ।
छायाग्रभ्रमवृत्तं ग्रहभ्रमव्यत्ययं च स्यात् ॥ १७ ॥

क्षितिजेऽग्रा परपूर्वद्युज्यावृत्तान्तरालभागज्या ।
अग्रायाः परिवृत्तं प्रथमक्षितिजे[2] च पूर्वे च ॥ १८ ॥

क्षितिजोन्मण्डलमध्ये द्युज्यावृत्तस्थिता महीजीवा ।
मध्ये चरार्धजीवा त्रिज्यावृत्ते तयोरेव ॥ १९ ॥

पूर्वक्षितिजापममण्डलयोर्योगाद् विलग्नमुद्दिष्टम् ।
पाश्चात्यकुजवलयापवृत्तयोगोऽस्तलग्नं स्यात् ॥ २० ॥

---

1. सप्त —*KSS*
2. प्रत्यक्क्षितिजे —*KSS*

पूर्वापरकुजवृत्तादुन्नतलवशिञ्जिनी[1] शङ्कुः ।
तस्याग्रे दिनकरो नरोऽर्कबिम्बावलम्बो वा ॥ २१ ॥

समशङ्कुः समपूर्वाद् विदिक्कुजात् कोणशङ्कुरेव स्यात् ।
समदक्षिणोत्तरकुजादुन्नतजीवा द्युदलशङ्कुः ॥ २२ ॥

अम्बरमध्यांशुमतो मध्यांशज्या भवेन्नतज्या खे ।
शङ्कोर्मूलाद् दिङ्मध्यगामिनी भूतले दृग्ज्या ॥ २३ ॥

विषुवद्दिवसे द्युदले पलो नतांशाः समुन्नता लम्बः ।
उन्नतनतभागज्ये तदावलम्बाच्चजीवे स्तः ॥ २४ ॥

लम्बाग्राद् दिङ्मध्यप्रापि तलाद् यत् खमध्यगं सूत्रम् ।
सा त्रिज्यान्यत्रापि च कर्णः क्षेत्रे चतुर्बाहौ ॥ २५ ॥

सौम्ये ध्रुवोन्नतिसमा कार्या नतिरुन्नतिश्च दक्षिणतः ।
सोन्नतिनतिबद्धायां रज्जोरर्धं पलज्या स्यात् ॥ २६ ॥

उन्नत्योर्नत्योर्वा संसक्ता तस्य सूत्रस्य ।
अर्धमवलम्बजीवा नत्युन्नत्योर्दलं त्रिज्या ॥२७ ॥

लङ्कावृत्ते[2] द्युसदां कक्षाव्यासार्धमुच्यते द्युज्या ।
दृग्ज्या तु सा सुराणामपक्रमज्या भवेच्छङ्कुः ॥ २८ ॥

याम्योदग् या गगने कक्षान्तरमथ नतिर्नभोमध्यात् ।
पूर्वापरं यदन्तरमुभयोस्तल्लम्बनं ग्रहयोः ॥ २९ ॥

कक्षावृत्तं पूर्वापरं तथा दक्षिणोत्तरं क्षितिजम् ।
विषुवद्वलयोद्वृत्ते स्थिराणि भानां ग्रहाणां च ॥ ३० ॥

---

1. D. शिञ्जिनीष्टभा शङ्कुः 2. Bod. D. वृत्ताद्

मन्दोच्चनीचवृत्तानि सप्त पञ्च स्वशीघ्रवृत्तानि ।
प्रतिमण्डलान्यपि तथा दिग्दृक्क्षेपापवलयानि[1] ॥ ३१ ॥

प्रत्येकमिनादीनां चन्द्रादीनां विमण्डलानि च षट् ।
पञ्चाशदेकयुक्ता च वृत्तानां भवत्येवम् ॥ ३२ ॥

॥ इति सामान्यगोलबन्धः ॥

इति श्रीलल्लाचार्यविरचिते गोले गोलबन्धाध्यायो द्वितीयः ॥


[॥ इति पञ्चदशोऽध्यायः ॥]

---

1. Bod. दिक्क्षेपापवलयानि ; V_1 दृग्दृक्षेपापमवलयानि

अथ मध्यगतिवासना नाम

षोडशोऽध्यायः



[सावनदिनादिमानम्]

नित्यं रविगतिलिप्तासमासुमिः सावनो भाहः ।
यस्माद्रविभगणदिनान्यतः सरूपाणि भाहाः स्युः ॥ १ ॥

घटिकाष्टाविंशत्या दशपलयुतयोनिते सावने मासे[1] ।
रविचन्द्रमसोर्योगो भवति स मासस्तु चान्द्रमसः ॥ २ ॥

चैत्रादिः खाग्निदिनैः[2] षड्विंशतिनाडिकाधिकैरेकः ।
मासः सहस्ररश्मेर्धृतिविघटीसंयुतैर्भवति ॥ ३ ॥

चान्द्रान्मासात् पातङ्गो मासो यस्मात् सदाभ्यधिकः ।
अधिमासकस्ततः स्यात् पञ्चरसैः शीतगोः पक्षैः ॥ ४ ॥

तेन च दिनकरमासाः साधिकमासाः शशाङ्कमासाः स्युः ।
अत एव च चन्द्राहाः सावनरहितास्तिथिप्रलयाः ॥ ५ ॥

1. D. अवनेर्मासे
2. Bod. D. त्रिंशद्भिः सात्र दिनैः । [त्रिंशद्भिः सोत्र दिनैः seems to be the correct reading.] —*KSS*

[देशान्तरादिवासना]

पश्चात् पश्चादर्कः प्राक् प्राक् च यतोऽभ्युदेति रेखायाः ।
तद्देशान्तरजातं तेन स्वमृणं ग्रहे क्रियते ॥ ६ ॥

मध्यस्योदयकालो यः स रवेः स्वे चिरेण शीघ्रमृणे ।
तत्फलकलासुभिरतः स्वगतित्रैराशिकं स्वर्णम् ॥ ७ ॥

प्रागपरोन्मण्डलयोरुदयास्तमयौ रवेरिह निबद्धौ ।
याम्योत्तरध्रुववशात् तत्र नतिं चोन्नतिं नीतौ ॥ ८ ॥

उन्मण्डलादधस्तात् क्षितिजमुदग् दक्षिणे तदुपरिष्टात् ।
तेन प्रागुदयोऽस्तमयः स्यात् तेन रविचारेण ॥ ९ ॥

याम्ये गोले रव्युदयश्चिरेण शीघ्रं भवेद् यतोऽस्तमयः ।
तेन तदन्तरभूतं कालफलमृणधने स्वमृणम् ॥ १० ॥

अत एव महान् दिवसस्तनीयसी रात्रिरुत्तरे गोले ।
व्यस्तं याम्ये स्पष्टं विकारणं छेद्यकेऽभिहितम् ॥ ११ ॥

[चरादीनां वासना]

लङ्कावृत्ते मध्यस्थिते ध्रुवो यत्कुजं तदुद्वृत्तम् ।
तेन न तत्र चरदलं सदा समत्वं च दिवसनिशोः ॥ १२ ॥

तत्राक्षाभावेऽपि स्वस्वक्रान्त्या स्थितौ तिरश्चीनौ ।
ज्यायस्या मेषवृषौ यतोऽल्पकालोदयौ तेन ॥ १३ ॥

मिथुनान्तोऽल्पक्रान्त्या पदान्तगत्वादृजुस्थितो यस्मात् ।
तस्माच्चिरोदयोऽसावक्षवशाच्चान्यविषयेषु ॥ १४ ॥

1. Mss. other than Bod. D. रविश्चिरेण

आद्यान्त्यचक्रपादौ द्युनिशचतुर्थेन चरदलोनेन ।
उदगच्छतः पलवशाद् भ्रमाच्च युक्तेन मध्यस्थौ ॥ १५ ॥

प्रागायतं कुलीरान्मकरादुदगायतं यतः षट्कम् ।
अक्षे भ्रमवशगत्वादधिकन्यूनोदयं तस्मात् ॥ १६ ॥

उदगायतोदया ये यान्त्यस्तं ते परायताः पश्चात् ।
प्रागायतोदया ये गच्छन्त्युदगायतास्तेऽस्तम् ॥ १७ ॥

स्वचरार्धेनोनयुता ये दृश्या राशयो भवन्त्यत्र ।
तेन युतोनाः क्रमशस्तेऽक्षवशादस्तमुपयान्ति ॥ १८ ॥

यस्य स्वचरार्धसमा निरक्षविषयोदयासवो राशेः ।
दृश्यः स सदा तस्मिन् दृश्योऽदृश्योऽन्यथा भवति ॥ १९ ॥

पञ्चभिरधिकाः सप्ततिरंशा यस्मिन् पलस्य विषये स्युः ।
तत्र न वृश्चिककार्मुकमकरघटा दृश्यतां यान्ति ॥ २० ॥

ये यत्र न दृश्यन्ते दक्षिणगोलस्थिता ग्रहा विषये ।
तत्रैते समापक्रमा न सौम्येऽस्तमुपयान्ति ॥ २१ ॥

मेषान्तमितः सविता नगदिग्भिर्योजनैरुदगुदेति ।
नवधृतिभिर्वृषभान्तं मिथुनान्तं नखयमैरेव ॥ २२ ॥

---

1. A_3. आद्यन्त्य
2. A_3. V_1. अक्षभ्र°
3. D. तत्रैतत् समापक्रमान्न

[दृक्कर्मवासना]

द्रष्टा समकलकाले भूदलमध्यस्थितः सूर्यम् ।
पश्यति शशिना पिहितं न तदा भूगोलपृष्ठस्थः ॥ २३ ॥

भूपृष्ठगतो द्रष्टा पूर्वनतं पूर्वमेव तिथ्यन्तात् ।
पश्यति समुच्छ्रितत्वाच्छशिना रविमण्डलं पिहितम् ॥ २४ ॥

पश्यति समकलकालात् परतोऽन्तरधीयते गतं नीचम् ।
तेन प्राक्पश्चिमयोः कुदलकलालम्बनमृणं स्वम् ॥ २५ ॥

भूदल[1]मध्यस्थस्य द्रष्टुर्भूपृष्ठगस्य वा दृष्टिः ।
स्वाभिमुखं याति समं न लम्बनं तेन मध्याह्ने ॥ २६ ॥

पूर्वापरे कुवृत्ते लम्बनलिप्तोपपत्तिरुक्ता या ।
याम्योदक्क्षितिजवशात् सा ज्ञेयाऽवनतिलिप्तानाम् ॥ २७ ॥

[ग्रहणवासना]

अथवा नतिः खमध्यान्मध्यज्याग्रं तदुत्थनतभागैः ।
याम्यमुदग् वा यद्वद् ग्रहयोः कक्षान्तरं तद्वत् ॥ २८ ॥

जलदवदि[2]न्दुर्दिनपं छादयति समागतो यतः पश्चात् ।
प्रग्रहण[मतः] पश्चात् प्राग्भागे दिन[3]करे मोक्षः ॥ २९ ॥

---

1. Mss. other than Bod. D. भूतल°
2. Mss. other than Bod. D. जलवदिहेन्दु
3. Mss. othe than Bod. D. दिनकृतो

आवरणस्य लघुत्वात् तीक्ष्णविषाणोऽर्धखण्डितः सविता ।
भवति स्थितिश्च लघ्वी प्रतिविषयं ग्रासनानात्वम् ॥ ३० ॥

प्रविशति यद् भूच्छायावृत्तं त्रैराशिकात् स्वकक्षास्थम् ।
तेन न लम्बनमिन्दोर्नावनतिस्तुल्यकक्षत्वात् ॥ ३१ ॥

प्रत्यङ्मुखं व्रजन्त्यां पूर्वाभिमुखो व्रजति शशी यस्मात्[1] ।
तस्मात् प्राक् प्रग्रहणं पश्चान्मोक्षः शिशिररश्मेः ॥ ३२ ॥

छादकबिम्बमहत्वाद् विषाणयोः कुण्ठतार्धसंच्छन्ने ।
चन्द्रे स्थितिश्च महती भवति न च ग्रासवैचित्र्यम् ॥ ३३ ॥

ग्रहणे ग्रहमोक्षदिशो रविशशिनोः खण्डकालवैचित्र्यात् ।
शशिभूच्छाये कारणमकारणं राहुरिति सिद्धम् ॥ ३४ ॥

आवरणात् स्वग्रहणे क्षेपेण क्षिप्यते यतश्चन्द्रः ।
ग्राह्यादर्कग्रहणे व्यस्ताव्यस्तौ ततः क्षेपौ ॥ ३५ ॥

बिम्बप्राची याम्यां याति यदान्यद्दिशस्तदा सौम्याम् ।
भ्रमत्यसव्यं सव्यं व्यस्तं तेनापरं वलनम् ॥ ३६ ॥

[चन्द्रादीनां सितासितवासना]

दिनकरकरसङ्गादङ्ग यः शीतरश्मि-
व्रजति धवलिमानं मानिनी मानहस्तैः ।
घट इव दिशि भानोरातपस्थोऽन्यभागे
भजति च शितिमानं छाययैवात्ममूर्तेः ॥ ३७ ॥

---

1. A_3 V_3. व्रजन् विशति यस्मात्

सकलमसितं[1] मासान्ते दलं शशिमण्डले[2]
धवलमखिलं पक्षान्ते स्यान्नृलोचनगोचरम् ।
असितमसिते शुक्ले शुक्लं क्रमादुपचीयते
रविमभि यतः प्रालेयांशोस्तथा च विमुञ्चतः ॥ ३८ ॥

दर्पणेऽर्ककिरणा यथा स्थिता नाशयन्ति गृहमध्यगं तमः ।
नैशमन्धतमसं महीकृतं तद्वदेव शशिबिम्बसंस्थिताः ॥ ३९ ॥

सर्व एव खचराः सतारकाश्चन्द्रवत् कुवलयेन संयुताः ।
उज्ज्वला दिशि सहस्रदीधितेः श्यामलस्तदितरत्र निश्चयः ॥ ४० ॥

ऊर्ध्वगस्य नरदृष्टिगोचरं खेचरर्क्षनिवहस्य यद्दलम् ।
तत् सदार्ककिरणैः समुज्ज्वलं दृश्यते च तत एव नासितम् ॥ ४१ ॥

भार्गवेन्दुसुतयोरधःस्थयोर्दृश्यते यदसितं न चन्द्रवत् ।
तद्रवेर्निकटवर्तिनोस्तयोः सर्वमेव वपुरुज्ज्वलं भवेत् ॥ ४२ ॥

[ग्रहबिम्बदर्शनवासना]

यत्र लग्नमुदितं शशी तथा यत्र चास्तमुदयं व्रजत्यहः ।
अन्तरालमनयोर्भुजस्ततः कोटिरिन्द्वभिमुखो यतो नरः ॥ ४३ ॥

तत्र भास्करमशीतदीधितिं कृच्छ्रदृश्यमनुरु प्रपश्यति ।
यत्र रश्मिनिकरेण सर्वतः सूर्यबिम्बपरिधिः पिधीयते ॥ ४४ ॥

कर्णिकेव कमलस्य केसरैस्तेन लाघवमुपैति मध्यगः ।
व्याप्नुवन्ति सकलं नभस्तलं रश्मयो गगनमध्यगे रवौ ॥ ४५ ॥

---

1. Mss. other than D. कृष्णमसित°
2. A_3. °मण्डलं

तत्कदम्बपरिवेष्टितो नरो भास्करं दिवसनाथमीक्षते ।
दूरजः क्षितिजमण्डलोपगो भूमिरुद्धकिरणश्च तिग्मगुः ॥ ४६ ॥

यत्सुखं समवलोक्यते तथा भात्युरुर्विकिरणश्च सोऽरुणः ।
यद् विमण्डलवतोऽपमण्डलं क्षेपसंस्कृतिमुपैति तेन तत् ॥ ४७ ॥

[दृक्कर्मसंस्कारवासना]

आयनाख्यमिह दृष्टिकर्म तत् तद्वशेन पलजं तथा बुधैः ।
दृष्टिकर्म कुजयोर्विधीयते खेचरे चरदलोपपत्तिवत् ॥ ४८ ॥

क्षेपयोः समदिशोः समानयोः खेचरौ चरत एकवर्त्मना ।
गच्छतोरिह दिशोर्यतो यथा लघ्विषुर्भवति तेन सोऽन्यथा ॥ ४९ ॥

इति युक्तिरियं मयेषदुक्ता विदुषान्यत्र विचारयोजनीया ।
उपदेशलवं करोति शास्त्रं सुधियस्ते प्रथयन्ति तैलवत् के ॥ ५० ॥

इति श्रीलल्लाचार्यविरचिते गोले [मध्यगति]वासनाध्यायस्तृतीयः

[॥ इति षोडशोऽध्यायः ॥]

अथ भूगोलाध्यायो नाम

सप्तदशोऽध्यायः

[भूगोलस्वरूपम्]

गगनमरुदग्निजलमृण्मयो महाभूतगुणयुतः खस्थः ।
कक्षाभिरावृतोऽयं भपञ्जरान्तश्च भूगोलः ॥ १ ॥

मध्येऽयस्कान्तानां यथा स्थितोऽयोगुडः खमध्यस्थः ।
तद्वदनाधारोऽपि हि सर्वाधारो महीगोलः ॥ २ ॥

लङ्काप्राग् यमकोटिः पश्चाद्रोमकमधश्च सिद्धपुरम् ।
मेरुः स्थित उत्तरतो दक्षिणतो दैत्यनिलयः स्यात् ॥ ३ ॥

एते जलस्थलस्था मेरुः स्थलगोऽसुरालयो जलगः[1] ।
कुपरिधिपादान्तरगा मन्यन्ते तिर्यगन्योऽन्यम् ॥ ४ ॥

भूपरिधिदलान्तरगाः के नृच्छाये यथा तथोर्ध्वमधः ।
सर्वेषामुपरि नभस्तदधो भूरुपरि ते भूमेः ॥ ५ ॥

तरुनगनगरसुरासुरनरैरयं केसरैरिव समन्तात् ।
गोलः कादम्बो मधुकरीभिरिव सर्वतः प्रचितः ॥ ६ ॥

---

1. D. मेरुस्थलगेऽसुरालये जलगाः

[भुवः केन्द्राकर्षणशक्तिः]

भवनभावतुलोपतुलास्खलं स्थितवती च यथा गृहगोधिका ।
समभिधावति नूनमनाकुला कुवलयस्य तथैव जनोऽप्यधः ॥ ७ ॥

शिखिशिखा गगनं गुरुमेदिनीं
व्रजति यद्वदिहास्मदवस्थितौ ।
तलगतामितरेष्वपि तत्तथा
न तलमस्ति भुवः क्व पतत्वसौ ॥ ८ ॥

[भुवो धारणशक्तिः]

शिशिरता शशिनोऽर्कहविर्भुजो-
रशिशिरत्वममार्दवमश्मनाम्[1] ।
सततगस्य चलत्वमपांपतेः[2]
प्रकृतिरेव कुजादिनभःस्थितिः ॥ ९ ॥

सकलभूतभरोद्धरणक्षमा[3]
किमपरैरियमुद्ध्रियते क्षमा ।
वरवशेन कुशेशयजन्मनो
न चलतीति वदन्ति मनीषिणः ॥ १० ॥

[भूतलमानम्]

२,८५,६३,३८,५५७

नगशिलीमुखबाणभुजङ्गम-
ज्वलनवह्निरसेषुगजाशिनः ।
कुवलयस्य बहिःपरियोजना-
न्यथ जगुः खलु कन्दुकजालवत् ॥ ११ ॥

---

1. A_3. V_1. अश्मनि
2. Mss. other than D. °मपां द्युतिः
3. D. सकलभूनभसद्धरणक्षमा [This reading is metrical and more appropriate. —*KSS*]

[भुवश्चतुर्भागे चतुर्नगर्यः]

उदयमेति यदा पुरि रक्षसां
व्रजति सिद्धपुरेऽस्तमयं तदा ।
दिनदलं यमकोटिपुरे रवी
रजनिमध्यमुपैति च रोमके ॥ १२ ॥

इति श्रीलल्लाचार्यविरचिते गोले भूगोलाध्यायश्चतुर्थः ॥

[इति सप्तदशोऽध्यायः]

अथ ग्रहभ्रमसंस्थानाध्यायो नाम

अष्टादशोऽध्यायः

[सप्त वायवः]

आवहः प्रवह उद्वहस्तथा
संवहः सुपरिपूर्वकौ वहौ ।
सप्तमस्तु पवनः परावहः
कीर्तितः क्रुमरुदावहोऽपरैः ॥ १ ॥

३३७५
शराद्रिरामानलयोजनानि
कुवायुकक्षा परितः पृथिव्याम् ।
१०७४
समुद्रशैलाम्बरशीतभास-
स्तदीयविष्कम्भमुशन्ति सन्तः ॥ २ ॥

[भूभ्रमणम्]

सदैव नित्यं प्रवहेण वायुना
निरक्षदेशोपरिगो भपञ्जरः ।
स्वपश्चिमाशाभिमुखोऽपि नीयते-
ऽसुरासुराणामपसव्यसव्यगः[1] ॥ ३ ॥

---

1. D. सुरासुराणां सव्यासव्यम्

[ध्रुवो विन्यासः]

निरक्षदेशोपरिगौ ध्रुवावुभौ
स्वदक्षिणोदक्क्षितिजप्रसक्तौ ।
सदात्र पश्यन्ति[1] तदुत्तरं सुराः
स्वमूर्ध्वगं[2] दक्षिणमिन्द्रशत्रवः ॥ ४ ॥

सदैव दैत्यैस्तनयैस्तथादिते-
र्भचक्रमुर्वीजगतं प्रदृश्यते ।
न दृश्यतेऽपक्रमवृत्तदक्षिणं
दलं सुरैर्नान्यदपीतरैः क्वचित् ॥ ५ ॥

सुरासुराणां विषयाद्[3] यतो यतो
यथा यथा गच्छति यश्च कश्चन ।
स तत्र तत्रोन्नतमृक्षमण्डलं
तथा तथा पश्यति खान्नतं ध्रुवम् ॥ ६ ॥

भवेत् खमध्याद् ध्रुवकस्य या नति-
र्भपञ्जरस्योन्नतिरेव साथवा ।
स्वलम्बभागाः स्वषडंशगोहता
$९\frac{1}{6}$
नरापसारः फलयोजनैर्भवेत् ॥ ७ ॥

---

1. Bod. D. V_1. सदा प्रपश्यन्ति [This reading is better. —*KSS*]
2. Bod. D. मूर्ध्वजं
3. Bod. D. विषयोद्यतो यतो

समुन्नतिर्या क्षितिजाद् ध्रुवस्य सा
भपञ्जरस्य प्रणतिर्नभस्तलात् ।
फलांशका वा गुणिताश्च पूर्ववत्
निरक्षदेशात् कथयन्ति योजनैः ॥ ८ ॥

इनस्य कक्षा गुणिता नतांशकै-
३६०
र्नतिः खमध्यात् खषडग्निहृद् भवेत् ।
यदा स्वकक्षा चरणेन सम्मिता
५२५
वितत्त्रबाणेन कुजे तदा रविः ॥ ९ ॥

तुलाद्यजाद्योः स्थितमर्कमण्डलं
समं समीक्षन्ति परिभ्रमं कुजे ।
त्रिभागयुक्तेऽह्निगतेऽसुरामराः
क्रमाद्धि मुक्तं क्षितिजं ततस्ततः ॥ १० ॥

[रविचारः]

तुलादिधन्वन्तमुपैति भास्कर-
स्त्रिभिस्तु मासैर्मिथुनान्तमप्यजात् ।
२४
रवेर्जिनांशान्तसमा परोन्नति-
र्दितेः सुतानामदितेश्च वासरे ॥ ११ ॥

भवेत् खमध्यं क्षितिजाद् गृहत्रयं
फलं निरक्षे तिथयोऽस्य नाडिकाः ।
यतोऽत एषां परमेऽपमे रवेः
परोन्नतिः स्यात् स्वदिने क्षणद्वयम् ॥ १२ ॥

ततो हि सङ्क्रान्तिवशेन च त्रिभिः
क्रमेण मासैः क्षितिजं समाप्नुयात् ।
गतोऽथ यत्र प्रथमं च दृक्पथं
पुनश्च तद्वाममियात् प्रदर्शनम् ॥ १३ ॥

समार्धमाद्यं विबुधा दिवाकरं
द्वितीयमीक्षन्ति दलं सुरद्विषः ।
दिनप्रमाणं मनुजाः स्ववासरे
सितं च पक्षं पितरः शशिस्थिताः ॥ १४ ॥

[चन्द्रचारः]

सितेऽधिके पक्ष इहोच्यते सितो
यतोऽसितश्चाप्यसिते विधोस्ततः ।
तदीयसन्ध्यासमयोऽष्टमीद्वयं
निशाद्युमध्ये सितकृष्णपर्वणी ॥ १५ ॥

शशाङ्कबिम्बोपरि सूर्यमण्डलं
यतो भवेत् पर्वणि कृष्णपक्षजे ।
अतः स्वमूर्ध्नोर्ध्वगतं प्रपश्यतां
भवेत् पितॄणां द्युदलं नृणां यथा ॥ १६ ॥

यथा यथा सूर्यतलं त्यजेच्छशी
तथा तथैषां नतिमेति भास्करः ।
गृहत्रयेणान्तरितोऽष्टमीदले
कुजस्थितो वा समुपैति दर्शनम् ॥ १७ ॥

शशाङ्कबिम्बान्तरितोऽर्धरात्रगो
गृहैश्च षड्भिः सितपक्षपर्वणि ।
इनान्तिकं गच्छति पक्षमध्यगे
विधौ व्रजेद् दर्शनमुन्नतिं ततः ॥ १८ ॥

[ब्रह्मणो दिवसः, जगतः सृष्टिक्षयौ च]

चतुर्मुखो दूरगतो दिवाकरं
सदेक्षतेऽतः सुरवासरात् पृथक् ।
दिनं तदीयं रजनी ततो भवेत्
क्रमेण चक्षुर्यदयं निमीलयेत् ॥ १९ ॥

हिरण्यगर्भस्य दिने तु काश्यपी
समन्ततो वृद्धिमुपैति योजनम् ।
पुनश्च नाशं समुपैति वेधसो
निशात्यये कृत्रिममृण्मयश्च यः ॥ २० ॥

समस्तमेतद् भुवनादि वेधसः
क्षये क्षयं याति विहाय शाश्वतम् ।
दिनावसाने च जगत्त्रयं तथा
मनुक्षये यत् पुनरत्र जायते ॥ २१ ॥

समस्तभूतानि धरादितो यथा
क्रमात् क्षयं यान्ति पदे निरामये ।
ततः क्रमेणैव पुनस्ततोऽमुना
भवन्ति सृष्टेः प्रमुखे तदिच्छया ॥ २२ ॥

विहायसा गच्छति यः स मारुतो
विनाशमायाति विनाशमागते ।
ध्वनिप्रणाशे नभसः क्षयो यथा
व्यसोः शरीरस्य सतो मृताद्भयः ॥ २३ ॥

शुभाशुभस्यार्जितकर्मणः क्षयः
सदोपभोगेन भवेच्छरीरिणाम् ।
विनाशकालेऽम्बुजजन्मनस्तदा
त एव गच्छन्ति लयं पदे पदे ॥ २४ ॥

व्रजन्ति ये कालवशात् क्षये लयं
पृथक् क्रियन्ते तदमी सिसृक्षुणा ।
अतो बुधा ज्ञानमयेन वह्निना
शुभाशुभं कर्म दहन्त्यशेषतः ॥ २५ ॥

[लोकोपदेशः]

न तत्तपोभिः फलमत्र लभ्यते
न वा मखैर्नापि च तीर्थयात्रया ।
यदाप्यते निर्गुणमेकमव्ययं
स्वकायगं योगदृशा प्रपश्यता ॥ २६ ॥

सृजत्ययं पाति च सर्वमीश्वरो
विनाशयत्येष गुणत्रयात्मकः ।
समस्तचेष्टाः कुरुते शरीरगः
सुखेन दुःखेन च नैव सृज्यते ॥ २७ ॥

सहस्ररश्मिं कमलासनं तथा
पतिं पशूनां यमजं पिनाकिनम् ।
जनार्दनं सत्यवतीसुतादयो
विचित्ररूपं श्रुतयश्च यं विदुः ॥ २८ ॥

नरैः स संसारमसारमापदां
पदं विजानद्भिरनन्तसौख्यदः ।
गुरोः सकाशादवगम्य तत्त्वतः
प्रपूजनीयः सुमनोभिरादरात् ॥ २९ ॥

पठन् सनादं प्रणवं यथोदितं
यथोदितं सूर्यसहस्रमेकधा ।
विचिन्तयन् धाम तथान्तरात्मनो
य उन्नतिं स्वां सभुवं समुज्झति ॥ ३० ॥

प्रतिदिनमथ भक्त्या अक्षरं योऽर्कमन्त्रं
सदमतमथ वर्णं शक्तिबीजं तथैव ।
हुतवहवदनां वा रुद्रयुक्तां च दुर्गां
जपति स कमलानि प्राप्नुयान्मङ्गलानि ॥ ३१ ॥

इति श्रीलल्लाचार्यविरचिते गोले ग्रहभ्रमसंस्थानाध्यायः पञ्चमः ॥

[इति अष्टादशोऽध्यायः]

अथ भुवनकोशो नाम

ऊनविंशोऽध्यायः



[सप्तसमुद्राः]

क्षाराम्भोधिर्दक्षिणे व्यक्षगानां
जम्बूद्वीपं तस्य सौम्ये मही या ।
क्षाराम्भोधेर्दक्षिणे क्षीरसिन्धुः
शाकद्वीपं मध्यमाहुस्तयोश्च ॥ १ ॥

क्षीराम्भोधेर्दक्षिणेऽब्धिश्च दध्नः
कौशद्वीपं मध्यभूमिस्तयोर्या ।
दध्नः सर्पिर्दक्षिणे क्रौञ्चमन्तः
शाल्मल्याख्यं स्यात् ततोऽब्धी रसोदः ॥ २ ॥

गोमेदं स्याद् द्वीपमस्मात् सुराब्धि-
स्तस्माद् याम्ये पुष्करं पुष्कराख्यात् ।
स्वादूदः स्याद् दक्षिणे वाडवोऽस्मिन्
दैत्यावासो यातना दुष्कृतीनाम् ॥ ३ ॥

पक्षस्यान्ते शीतगोः स्वोदयेऽस्ते
सौम्ये रोधो वीचयो यान्ति सिन्धोः ।
और्वस्याग्नेः सम्मुखं[1] यान्ति चन्द्रे
व्योम्नो मध्ये पक्षमध्यस्थिते च ॥ ४ ॥

वह्निं तोयं गां च गीर्वाणसंघं
मन्यन्तेऽधोऽवस्थितं दानवेन्द्राः ।
भूमिं तोयं पावकं दैत्यसंघं
देवस्तोमो मन्यतेऽधः क्रमेण ॥ ५ ॥

[पाताललोकः]

भूगोलान्तः सप्त पातालदेशा-
स्ते चावासा दानवानामहीनाम् ।
दिव्यौषध्यो रत्नसंघा रसाश्च
सिद्धद्रव्याण्यत्र सन्त्याकराश्च ॥ ६ ॥

मृगशिशुदृशः स्निग्धा नीलप्रकुञ्चितकुन्तलाः
परभृतगिरः पीनोत्तुङ्गस्तनद्वितयानताः ।
ललितवपुषश्चारुश्रोण्यो मनोभवमार्गणा
मुदितमनसो विद्याधारस्त्रियः प्रवरोरवः ॥ ७ ॥

[पर्वताः]

लङ्कादेशात् क्षारसिन्धोश्च सौम्ये
जम्बूद्वीपे ज्यावदम्भोधितज्ज्यः ।
प्रालेयाद्रिः संगतस्तत्पयोध्यो-
र्मध्ये खण्डं चापरं भारताख्यम् ॥ ८ ॥

---

1. D. संमुखे

हेमकूट उदगायतो नगात्
किंमनुष्यमनयोर्यदन्तरम् ।
उत्तरे च निषधस्ततो नगा-
दन्तरे च हरिसंज्ञितं तयोः ॥ ९ ॥

शृङ्गवानपि तु सिद्धपत्तना-[1]
दुत्तरस्तुहिनशैलवत् स्थितः ।
क्षारवारिनिधिशृङ्गमध्यगं
चापवच्च कुरुखण्डमुच्यते ॥ १० ॥

श्वेतशैलमपि चोत्तरे ततः
प्राहुरन्तरनयोर्हिरण्मयम् ।
नीलशैलमत उत्तरस्थितं
रम्यमूचुरनयोर्यदन्तरम् ॥ ११ ॥

नीलशैलनिषधान्तरोपगां
गामुशन्ति शकलत्रयीकृताम् ।
गन्धशैल उदगत्र रोमकान्
माल्यवांश्च यमकोटिपत्तनात् ॥ १२ ॥

गन्धशैलजलराशिमध्यगं
केतुमालमिह खण्डमीरितम् ।
माल्यवज्जलधिमध्यवर्ति यत्
तच्च भद्रयुतमश्वमुच्यते ॥ १३ ॥

1. Bod. सिद्धि°

माल्यवन्नगसुगन्धशैलयो-
मध्यसंस्थितमिलावृताह्वयम् ।
मेरुरत्र शकले प्रतिष्ठितो
रत्नकाञ्चनमयः सुरालयः ॥ १४ ॥

माल्यवत् ककुभि तस्य मन्दरो
गन्धयुक्तनिषधस्य मादनः ।
नीलदिश्यय सुपार्श्वपर्वतः
पर्वतश्च विपुलोऽन्यदिग्गतः ॥ १५ ॥

अरुणाख्यमथैषु मानसं
क्रमशश्चापि महाह्रदं सरः ।
ससितोदममूनि बिभ्रति
श्रियमब्जैर्विहगैश्च काञ्चनैः ॥ १६ ॥

मज्जन्नाकनितम्बिनीप्रजघनप्रोत्तुङ्गवक्षोरुह-
द्वन्द्वप्रच्युतकुङ्कुमारुणमलं पीतं सुवर्णत्विषा ।
प्रभ्रष्टप्रवरेन्द्रनीलशकलं प्राच्यां तु नीलं क्वचित्
तेष्वम्भश्च सहस्रलोचनधनुर्लीलांशमालम्बते ॥ १७ ॥

कदम्बजम्बूवटपिप्पलाह्वयान्
वदन्ति तेष्वेव तरून् मनीषिणः ।
वनं तथा चैत्ररथं सुनन्दनं
धृत्याह्वयं भ्राजमतीव सुन्दरम् ॥ १८ ॥

त्रिभिः सुमेरुः शिखरैर्विराजते
सुरालयैः काञ्चनतारनिर्मितैः ।
महेशपद्मासनविष्णुधामभिः
सविस्तृतैर्योजनमुच्छ्रितैरपि ॥ १९ ॥

महेन्द्रवह्न्यन्तकरक्षसामधो
जलेशवाताधिपशूलिनां क्रमात् ।
पुराणि शेषामरमन्दिराणि च
त्रिविष्टपं शास्ति च पाकशासनः ॥ २० ॥

[इन्द्रादीनां स्थानादयः]

दुर्वारवैरिवरवारणकुम्भपीठ-
निर्दारणे रणमुखे शतकोटिरस्त्रम् ।
उच्चैःश्रवाश्च तुरगस्तुरगः करेणु-
रैरावतोऽस्य सचिवो वचसामधीशः ॥ २१ ॥

प्रमत्ता मातङ्गाः प्रचुररथयुक्ताश्च तुरगा-
स्तनुत्राणास्त्राणि प्रबलपुरमादुर्गवसतिः ।
द्विषां सामग्रीयं प्रसरति तदीये मतिविधौ
दिवा कृत्स्नं तत्प्रव्रजति हि हिमानीव विलयम् ॥२२॥[1]

शशधरमुखी हंसाध्वानासिताम्बुरुहेक्षणा
मलयजरजःपङ्का पाण्डुप्रपीनपयोधरा ।
दशशतदृशः प्रेयस्येका जिगीषुमहीपतेः
शरदिव दिवः शोभाभूतिः सुगन्धवहा शची ॥२३॥

1. D. numbers this verse as 23 and continues the wrong numbering.

[भारतभागाः]

ऐन्द्रं कशेरुश्च सताम्रपर्णं गभस्तिमत् खण्डमतश्च कन्या ।
ससौम्यनागाह्वयवारुणं च गान्धर्वमेतान्यथ भारताख्ये ॥ २४ ॥

माहेन्द्रशुक्त्याह्वयसह्यविन्ध्याः सपारियाता मलयर्क्षसंज्ञौ ।
कुलाचला वर्णचतुष्कयुक्ते कुमारिकाख्येऽन्त्यजवन्त्यथाष्टौ ॥ २५ ॥

[भुवोपरिभुवः]

अप्सरसो विद्याधरमुनिकिन्नरसिद्धयक्षगन्धर्वाः ।
गन्धाचलमाल्यवतोस्तुहिनाचलशृङ्गिनोर्मध्ये ॥ २६ ॥

निर्वातोल्कापरिवेषविद्युच्छक्रचापसलिलमुचः ।
गन्धर्वनगरपूर्वा मध्ये भूवायुकक्षायाः ॥ २७ ॥

विषुवद्याम्ये लोकः पातालगतश्च भूरिति प्रथितः ।
भुव इति मानवगम्यः स्वरिति सुमेरुः सुकृतिनां धाम ॥ २८ ॥

उपरि महस्तदनु जनस्ततस्तपः सत्यलोक उपरिष्टात् ।
अधिकाधिकपुण्यवतां क्रमशः स्थानान्यमी लोकाः ॥ २९ ॥

ब्रह्माण्डकुण्डमध्यगमिदमखिलं यत् प्रकीर्तितं क्रमशः ।
तस्य परिधिः स्वकक्षा लोकालोकोऽपि च स उक्तः ॥ ३० ॥

पूर्वापरयाम्योत्तरपार्श्वगतैस्तत्समैस्त्रिभिर्वृत्तैः ।
सर्वेषामेव बहिः स्थाप्यो ब्रह्माण्डगोलोऽयम् ॥ ३१ ॥

जम्बूद्वीपगतानां याम्ये दैत्यालयं सुमेरुरुदक्।
मेरोर्न काचिदपि दिक् समन्ततोऽर्कोदयो यस्मात् ॥ ३२ ॥

[ध्रुवः]

नुःपदमधस्तदाशामूर्ध्वोपरि तस्य चोर्ध्वकाष्ठा स्यात्[1]।
यत्रोदेति प्राची यत्रास्तमितोऽपरा सा दिक् ॥ ३३ ॥

सौम्यो ध्रुवश्च यस्मिन् शेषा दिग् दक्षिणा समुद्दिष्टा।
द्रष्टा यस्मिन् देशे तत्राशानां भवति सम्पातः ॥ ३४ ॥

[ग्रहचारः]

सर्वेषां कक्षार्धं सममभितः कुदलवर्जितं दृश्यम्।
भूगोलान्तरितं यत् कुदलेन संयुतमदृश्यम् ॥ ३५ ॥

कक्षा मध्यगतिघ्न्यः स्फुटगत्याप्ताः परिस्फुटा भवन्ति।
स्वमृदुकर्णकलाहता विभाजितास्त्रिगृहमौर्व्या वा ॥ ३६ ॥

मध्यमकक्षावृत्ते मध्यमया गच्छति ग्रहो गत्या।
उपरिष्टात् तल्लघ्व्या तदधिकगत्या त्वधस्थः स्यात् ॥ ३७ ॥

वक्री यात्यपराशां निसर्गतो गच्छति ग्रहः प्राचीम्।
क्रान्त्या याम्योदीच्योर्ग्रहगतिरेवं भवेत् षोढा ॥ ३८ ॥

---

1. D. नुस्तल

स्फुटकृत्या यदाप्तं नाड्यादि क्ष्मार्धषष्टिसंवर्गात् ।
तेनोदितोऽप्यनुदितो नास्तमितोऽप्यस्तमुपयाति ॥ ३९ ॥

[अवन्तिपुरी समरेखा च]

रेखाविषयेषु खमध्यमेति युगपद् ग्रहः समस्तेषु ।
भूपरिधेरष्ट्यंशेऽवन्ती स्यात् सौम्यदिग्भागे ॥ ४० ॥

[चन्द्रचारः]

६१२
क्रान्तिकलाभिरिनर्तुभिरुदक् शशी क्षितिजमुज्झति सुराणाम् ।
कक्षाल्पत्वाद् गच्छत्यपक्रमे तादृशेऽस्तेऽस्तम् ॥ ४१ ॥

२५
तत्त्वपलाग्रं नाडीद्वयं निजं दृश्यते च शशिमासे ।
देवैः सौम्यक्षिप्तो रवेरुपर्यन्यथा सोऽधः ॥ ४२ ॥

[ध्रिष्ण्यमण्डलम्]

सकलमपि ध्रिष्ण्यमण्डलमवनिनिबद्धं विनिर्मितं धात्रा ।
तत्र ग्रहाग्रहेष्वपि शुभाशुभं सर्वजन्तूनाम् ॥ ४३ ॥

[सुराणां विशेषः]

न सदोदयो ग्रहाणां नार्कग्रहौ न दृश्यतेऽगस्यः ।
न सितासितौ च पक्षौ क्षणद्वयं नोन्नतः सुरैश्चार्कः ॥ ४४ ॥

[एको रविर्दीपकः]

प्रोक्तास्तिर्यगधस्तथोपरि च ये लोकाः सुराश्चासुरा
रक्षोभूतपिशाचकिन्नरनरा विद्याधरा नायकाः।
ज्योतिष्का गगनेचराः सपितरः सिद्धास्तथा तापसा-
स्तेषां ब्रह्मकटाहधाम्नि वसतामेको रविर्दीपकः ॥ ४५ ॥

इति श्रीलल्लाचार्यविरचिते गोले भुवनकोशाध्यायः षष्ठः ॥

[इति ऊनविंशोऽध्यायः]

अथ मिथ्याज्ञानं नाम

विंशत्यध्यायः

[मिथ्याज्ञाननिराकरणप्रयोजनम्]

संस्थानमशेषमीरितं ब्रह्माण्डोदरवर्तिनामिदम् ।
प्रतिवादिवचांसि शृण्वतो मनसि भ्रान्तिरिवावतिष्ठते ॥ १ ॥

यत एवमतः कुहेतुमद्वचनानि प्रथमं ब्रवीम्यहम् ।
उपपत्तिमदागमं ततो मनसः स्थैर्यकरं परिस्फुटम् ॥ २ ॥

[मिथ्याज्ञानानि]

असुरामरवासरं क्रमादयनं दक्षिणमुत्तरं जगुः ।
हिमदीधितितिग्मतेजसोर्ग्रहणं राहुकृतं तथापरे ॥ ३ ॥

उपरीन्दुमधो दिवाकरं तमसा मेरुभुवा विभावरी ।
प्रतिवासरमिन्दुमण्डलं विबुधैः पीयत इत्यतः कृशम् ॥ ४ ॥

ककुभश्च सुमेरुभूभृतो युगलं चन्द्रमसोस्तथार्कयोः ।
पितृवासरमादितो सितं सितपक्षं च वदन्ति शर्वरीम् ॥ ५ ॥

अमितामवनीं प्रचक्षते सुसमां केचन दर्पणोपमाम् ।
अपरे बहुयोजनामिमां सलिलस्थामथ यानपात्रवत् ॥ ६ ॥

कमठाहिवराहदिग्गजैः कुलशैलैर्विधृतामथापरे ।
जगुरूर्ध्वमथ प्रयात्यधो[1] रथचक्रभ्रमवद् भ्रमत्यपि ॥ ७ ॥

[अयनोपरि मिथ्याज्ञाननिराकरणम्]

मिथुनान्तसमीपसंस्थितो यदि यज्ञांशभुजां दिवाकरः ।
सततं समुपैति दक्पथं न कुलीरे वद केन हेतुना ॥ ८ ॥

अपमस्य वशात् समुन्नमन् क्रमशो यत्र स यत्र वीक्षितः ।
विनमन्नपि तद्वशात् तथा विपरीतं च कथं न दृश्यते ॥ ९ ॥

[निशासम्बन्धि मिथ्याज्ञाननिराकरणम्]

रज्ज्वा सहितो यथा हयो भ्रममाणो निकटेऽथ दूरगः ।
तद्वद् रविमीक्षते सुरा रजनीचक्रपदे समं कथम् ॥ १० ॥

पिहिते यदि मेरुणा रवौ मनुजानामिह शर्वरी भवेत् ।
कथयस्व कथं सुधाभुजां रजनी जायत इत्ययुक्तिमत् ॥ ११ ॥

दिनभर्तरि याति दक्षिणां वणिजो मेरुसदां सदा निशा ।
सौम्यां सुरविद्विषामजादपरां भूपिहिते नृणामपि ॥ १२ ॥

विपरीतदिशा दिवाकराच्छाया दीर्घतरा तरोर्यथा ।
अवनेरपि जायते तथा सुरदैतेयनृणां तथा निशा ॥ १३ ॥

---

1. D. जगुरूर्ध्वमुपैति यात्यधो

[मेरुसम्बन्धि मिथ्याज्ञाननिराकरणम्]

यदुदेति रविः समन्ततः कथमाशास्तदमर्त्यभूभृतः ।
प्राची प्रथमोदयेन चेत् तत्रैवास्तमयेन का भवेत् ॥ १४ ॥

केषांचिदुदग् दिवाकरः पुरतः पृष्ठगतः परस्य च ।
इतरस्य तदैव दक्षिणः परमार्थात् ककुभो न कुत्रचित् ॥ १५ ॥

[पितृणां चन्द्रदर्शनम्]

सवितारमवेक्ष्य शीतगोरुपरिष्टात् पितरः स्वमूर्ध्वगम् ।
असितान्ततिथौ ततः परं न च पश्यन्ति कथं सिते दले ॥१६॥

[ग्रहणसम्बन्धि मिथ्याज्ञाननिराकरणम्]

उदयेऽस्तमये यथा नरैर्ग्रहणं तिग्मकरस्य दृश्यते ।
निकटोत्तरदिग्गते विधौ किल तद्वद्विबुधैर्न तत् तथा ॥ १७ ॥

अरिणा हरिणा किलामृतं पिबतो देवरिपोर्दितं शिरः ।
व्यसुतां न गतं ग्रहाधिपो ग्रसितः प्राहुरिदं च राहुवत् ॥१८॥

रविशीतगुमण्डलाकृति द्युगतं कृष्णतया न दृश्यते ।
किल पर्वणि याति दर्शनं वरदानादरविन्दजन्मनः ॥ १९ ॥

मुखपुच्छयुतं भुजङ्गमं जगुरेके तम एव केवलम् ।
अपरेऽसुरमेव यायिनं द्वयमन्येऽथ परे यथेष्टगम् ॥ २० ॥

यदि काययुतोऽथ मण्डली भविचारी खचरः शिरोऽथवा ।
नियतां गतिमुद्वहन् कथं भगणार्धान्तरितो ग्रसत्यगुः ॥२१॥

असुरो यदि मायया युतो नियतोऽतिग्रसतीति ते मतम् ।
गणितेन कथं स लभ्यते ग्रहकृत्पर्व विना कथञ्चन ॥ २२ ॥

यदि राहुयुते मिथोऽस्तगे क्षितिजस्थे हिमधाम्नि सग्रहे ।
इतरेण कथं दिवाकरो दृतबिम्बः समगेन नेक्ष्यते ॥ २३ ॥

पुच्छेन मुखेन यद्यहिर्ग्रसतीति प्रतिवादिनो जगुः ।
मध्ये मुखपुच्छयोः स्थितं भगणार्धं न समावृणोति किम् ॥२४॥

प्रथमं रविमण्डलं यतो न ततः खण्डितमिन्दुमण्डलम् ।
न समाकृतिरीक्ष्यते स्थितिर्यदतो राहुकृतो न स ग्रहः ॥२५॥

सवितुश्च यदन्यथाऽन्यथा प्रतिदेशं सकलं समीक्ष्यते ।
न च कुत्रचिदित्यवेत्य कः कुरुते राहुकृते ग्रहे ग्रहम् ॥ २६ ॥

ग्रहणे कमलासनानुभावाद्धुतदत्तांशभुजोऽस्य सन्निधानम् ।
यदतः स्मृतिवेदसंहितासु ग्रहणं राहुकृतं गतं प्रसिद्धम् ॥२७॥

[रवेरधश्चन्द्र इति निरूपणम्]

यदि शीतगुरूर्ध्वमुष्णरश्मेरुडुवत् किन्न भवेत् सदा सितोऽसौ ।
ग्रहणं स भवेद्रवेर्न चेन्दोर्भूच्छायाग्रमपास्य दूरगस्य ॥ २८ ॥

[चन्द्रसम्बन्धि मिथ्याज्ञाननिराकरणम्]

अथ शापवशात् परिक्षयः स्याद्
विबुधैर्वा शशिनो निपीतमूर्तिः ।
गणितेन चयक्षयौ कथं स्तो
यदि पीतश्च समीक्ष्यते स कृष्णः ॥ २९ ॥

[भूरनन्तेति मिथ्याज्ञाननिराकरणम्]

अमिता यदि भूरियोजना वा
क्षितिरह्ना परिवर्त्यते कथं भैः ।
परिधेः खलु षोडशे स्थितांशे
न च लङ्कावियाद् भवत्यवन्ती ॥ ३० ॥

ग्रहणं ग्रहसङ्गमोदयौ
शशिशृङ्गोन्नतिरिष्टभाविधिः ।
स्यात् प्रत्ययपञ्चकं स्फुटं
क्षितिमानेन भवेत् महत् कथम् ॥ ३१ ॥

२१६००
खखषट्कुयमैर्मिताः कला
ग्रहचक्रे[1] वलये व्यवस्थिताः ।
स्वफलस्य कुवृत्तयोजनै-
रनुपातादमिता कथं मही ॥ ३२ ॥

यदि वृत्तवशेन गच्छता-
ममिता भात्यथ भूरियोजना ।
परितस्तु तदा तथाविधा
परिमाणं त्विदमेव नापरम् ॥ ३३ ॥

---

1. A_3. V_1. ग्रहगत्या

[भूः समतलेति मिथ्याज्ञाननिराकरणम्]

यदि दर्पणवत् समा मही
कथमम्भो गगनात् परिच्युतम् ।
स्थिरतामपहाय यात्यहो
जवमाश्रित्य दिशैकया महत् ॥ ३४ ॥

प्रगुणः परिधेः शतांशको-
गणितज्ञाः कथयन्ति दृश्यते ।
प्रतिभाति तदा समा मही
विषये यत्र तथैव गम्यते ॥ ३५ ॥

समता यदि विद्यते भुव-
स्तरवस्तालनिभा बहूच्छ्रयाः ।
कथमेव न दृष्टिगोचरं
नुरहो यान्ति सुदूरसंस्थिताः ॥ ३६ ॥

परितः क्षितिजे प्रदृश्यते
गगनं सङ्गमुपागतं नृभिः ।
तस्यावनिरन्तरे स्थिता
सुसमा दर्पणवद् विभाव्यते ॥ ३७ ॥

[भुवश्चलनोपरि मिथ्याज्ञाननिराकरणम्]

यदि गच्छति भूरधोमुखी
गगने क्षिप्तमुपैति नो महीम् ।
यदि चोर्ध्वमुपैति सा तदा
निकटं किं न भवेत् भपञ्जरः ॥ ३८ ॥

[भुव आधारसम्बन्धि मिथ्याज्ञाननिराकरणम्]

सलिले विलयो मृदो भवे-
दिति गोरप्सु न युज्यते स्थितिः ।
अथ पात्रगतेति तत् कथं
न भवेद्यावदिलैव पार्थिवम् ॥ ३९ ॥

यदि वाम्भसि संस्थिता मही
सलिलं तद् द्युवदप्रतिष्ठितम् ।
गुरुणोऽम्भसि चेत् स्थितिर्भवेत्
क्षितिगोलस्य न किं विहायसि ॥ ४० ॥

कमठादिभिरुद्धृता मही
यदि ते केन धृता नभःस्थिताः ।
अत एषां वियति स्थितिर्यदि
क्षितिगोलस्य तु केन वार्यते ॥ ४१ ॥

[भुवश्चलननिराकरणम्]

यदि च भ्रमति क्षमा तदा
स्वकुलायं कथमाप्नुयुः खगाः ।
इषवोऽभिनभः समुज्झिता-
निपतन्तः स्युरपांपतेर्दिशि ॥ ४२ ॥

पूर्वाभिमुखे भ्रमे भुवो
वरुणाशाभिमुखो व्रजेद् घनः ।
अथ मन्दगमात्तदा भवेत्
कथमेकेन दिवा परिभ्रमः ॥ ४३ ॥

[रविचन्द्रद्वितयमिथ्यानिराकरणम्]

द्वितयं दिनरात्रिनाथयोः
कथमेकान्तरितं तदुद्व्रजेत् ।
यदि किं ध्रुवतारकातिमे-
र्दिवसेनैव भवेत् परिभ्रमः ॥ ४४ ॥

[भुव आकाशसंस्थाननिरूपणम्]

तडिताहतवृत्तकीलकः
किल संयोगमवाप्य भेषजैः ।
गगने निहितोऽवतिष्ठते
रसमौल्यादिविधेर्यथाम्बुजम् ॥ ४५ ॥

रसतैलजलैः स्वयंवहं
क्रियते यन्त्रमचिन्तनं यथा ।
परमात्मवशेन स्वस्थिति-
र्ग्रहचक्रस्य परिभ्रमस्तथा ॥ ४६ ॥

[भुवः सृष्टिनिरूपणम्]

आसीद् ध्वान्तमिदं ततोऽम्भसि बभूवाण्डं स्वरूपदिलं
तस्मिन् विश्वकृदर्कचन्द्रनयनो ब्रह्मा किलाभूत् पुरा ।
द्रव्यादीन् कणभुक् प्रधानपुरुषौ[1] साङ्ख्योऽवदत् कारणं
विश्वस्यास्य तथा स्वभावमपरे कर्मार्थकालं जगुः ॥४७॥

1. D. प्रधानपुरुषं

रजोगुणसमन्वितात् कमलजन्मनः प्राणिनो
भवन्ति भगवानवत्यपि च सत्ययुक्तो हरिः ।
हरो हरति तामसीं समवलम्ब्य वृत्तिं परे
जगुस्त्रितयमप्यजः क्रियत इच्छयैवैककः ॥ ४८ ॥

जगदिदमखिलं कृतं येन केनापि पृथ्वीनगाम्भोधिदेवापगादानवै-
र्नरहयखरकुञ्जराजातिसिंहैर्गगोसैरिसैर्वानरोलोष्ट्रपक्ष्यादिभिः ।
अहिनकुलशृगालमार्जारगोधाशशद्वीपिखड्गाम्बुजस्वेदजोद्भिज्जकै-
र्मणिरजतसुवर्णताम्रैस्तथा वाल्यवार्धक्यकामादिभिश्चापि तस्मै नमः ॥४९॥

इति श्रीलल्लाचार्यविरचिते गोले मिथ्याज्ञानाध्यायः सप्तमः ॥

[इति विंशत्यध्यायः]

अथ यन्त्राध्यायो नाम

एकविंशोऽध्यायः

[भूभगोलरचना]

इष्टं सुवृत्तवलयं लघुशुष्कदारु-
निर्मापितं विविधशिल्पवदाततक्ष्णा[1] ।
गोलं समं सलिलतैलवृषाङ्कबीजैः
कालानुसारिणममुं भ्रमयेत् स्वबुद्ध्या ॥ १ ॥

त्रिंशत् पलं तरति यद्रसतैलकेषु
तत् सार्यते त्रिभिरिदं स्ववहस्य बीजम् ।
वृत्तं भ्रमत् त्रिचतुरस्रमुपैति कर्णा-
ल्लम्बाच्च सिद्धिमध ऊर्ध्वमिला समाद्धिः ॥ २ ॥

अथ लग्नकालसिद्ध्यै पूर्वापरपरिकरोत्तरैर्नवभिः ।
निर्मापयेद् भगोलं प्राग्विधिना क्रान्तिवृत्तमिह ॥ ३ ॥

तस्य बहिश्च खगोलं समवृत्तक्षितिजदक्षिणोत्तरगैः ।
उन्मण्डलेन च तथा[2] ध्रुवयष्ट्या पूर्ववत् सभुवा ॥ ४ ॥

---

1. विविधशिल्पविदा सुतक्ष्णा seems to be the correct reading. —*KSS*

2. A_3. V_1. तथा to सभुवा, missing.

षष्ट्याङ्कयेद् भगोलं प्रागपराणीतराणि चक्रांशैः ।
कुर्याद् दृढं खगोलं श्लथं[1] भगोलं च नलिकाभ्याम् ॥ ५ ॥

यस्मिन्नंशे सविता तत्र शलाकां क्षिपेदपमवृत्ते ।
नाडीवृत्तस्थां तामुदये[2] क्षितिजाद्रविवशेन ॥ ६ ॥

भ्रमयेच्छश्वत् तद्वत् यथा न केन्द्रं त्यजेच्छलाकाभा ।
रविचिह्नक्षितिजान्तरमुदितांशस्तृणकुजान्तरा[3] घटिकाः ॥ ७ ॥

लम्बः समैश्चतुर्भिः क्षितिजस्वस्तिकगतैः समो विधृतः ।
गर्ताधेनिमग्नेन[4] करणैर्बीजेन वा भ्राम्यः ॥ ८ ॥

ध्रुवयष्ट्यां च शलाका नाडीवृत्तानुसारिणी शिथिला ।
अग्रद्वयावलम्बा[5] स्पृशति घटीर्या गतास्ता वा ॥ ९ ॥

[घटिकायन्त्रम्]

जलकुण्डेऽधश्छिद्रे घटिकाकालाङ्किते जलस्तुत्या ।
गोले वेष्टनसूत्राग्रबद्धतुम्बं क्षिपेत् सरसम् ॥ १० ॥

स्रवति च यथायथाम्भस्तथा तथालाबु गच्छमानमधः ।
भ्रमयति गोलकमम्भो मुक्ताङ्का नाडिका याताः ॥ ११ ॥

---

1. A_3. V_1. श्लथं भगोलं च, missing.
2. A_3. V_1. तामुदये to वशेन, missing.
3. A_3. V_1. मुदितांशस्तृण, missing.
4. A_3. V_1. निमग्नेन करणै, missing.
5. A_3. V_1. वलम्बा स्पृशति, missing.

[नरकूर्ममयूरादियन्त्राणि]

घटिकाङ्गुलसङ्ख्यां बुध्वा चीर्यां निवेशयेद् घटिकाः ।
तदनेन ता निरुध्यादुदरेण नतवदनमनुजस्य[1] ॥ १२ ॥

चीर्येत बद्धसूत्रे तिर्यक्स्थितवदनकीलकनलेन ।
नीत्वा जठरच्छिद्रेण केनचिद् तद् बहिः कुर्यात् ॥ १३ ॥

तत्र निबद्धमलाबु प्राग्वत् सलिलेन नीयमानमधः ।
चीरीमाकृष्यान्यां जपत्यमुं नाडिकां गुटिकाम् ॥ १४ ॥

कुर्यादयोऽपि चैवं घटिकां जह्युर्यथेष्टकालेन ।
मेषादीनां युद्धं सूत्रे सक्ते भवेदुभयोः ॥ १५ ॥

परिकल्पितकालाध्वनि युक्त्या योगो भवेद्ध्रुवरयोः ।
घटिकाङ्गुलाङ्कितं वा ग्रसति मयूरः क्रमादुरगम् ॥ १६ ॥

हन्ति मनुष्यः पटहं छादयति छादकस्तथा छाद्यम् ।
एवंविधानि यन्त्राण्येवमनेकानि सिद्ध्यन्ति ॥ १७ ॥

[चक्रयन्त्रम्]

श्रीपर्णीदारुमयं चक्रं सदरं सुनेमि सन्नाभि ।
अर्धं पारदपूर्णं युक्त्याराणां स्वयं भ्रमति ॥ १८ ॥

---

1. Babua Misra (in his Com. on *SSe.*, xix. 9-10) quotes this hemistich in the form :

अक्षोऽस्य ध्रुवयष्टिर्नाभिः श्रोणी भगोलनलिकेव ।
एवंकृतो भगोलः स्वयमेव[1] भ्रमति चक्रवशात् ॥ १९ ॥

वृत्तं कृत्वा फलकं षड्वर्गाङ्कं तथा च षष्ट्यङ्कम् ।
मध्यस्थितावलम्बं मध्यस्थित्या प्रविष्टोष्णम् ॥ २० ॥

तदधोलम्बविमुक्तं गृहादि यत्तदुदितं दिनकरांशात् ।
नाडघः पूर्वकपाले द्युगतास्ताः पश्चिमे द्युदलात् ॥ २१ ॥

[धनुर्यन्त्रम्]

चक्राख्यं यन्त्रमिदं दलं धनुर्यन्त्रमाहुरस्यैव ।
ज्याकार्मुकभृच्छिद्रप्रविष्टदिनकरकरं धार्यम् ॥ २२ ॥

मध्यस्थलम्बमुक्ताः कोटेरारभ्य नाडिका द्युगताः ।
उदिताश्च दिनकरांशादारभ्य भवन्ति गृहभागाः ॥ २३ ॥

[कर्तरीयन्त्रम्]

समपूर्वापरमेतत् स्थिरं स्थितं भवति कर्तरीयन्त्रम् ।
ज्यामध्यस्थिततिर्यक्कीलच्छायोज्झिता घटिकाः ॥ २४ ॥

[कपालयन्त्रं पीठयन्त्रं च]

इदमेवोर्ध्वशलाकं भुवि स्थितं स्यात् कपालकं यन्त्रम् ।
चक्रे चोर्ध्वशलाकं वदन्ति पीठं सुसिद्धाशम् ॥ २५ ॥

---

1. A_3. V_1. omit स्वयमेव

अनयोः कीलच्छाया मुक्ता घटिका भवन्ति वारुण्याः ।
मीनार्कोदयवेधादग्राश्चापांशकाश्चापि ॥ २६ ॥

[भगणयन्त्रम्]

अथवा चक्रे स्वविषयराश्युदयविनाडिकादशांशभवैः ।
कालांशैर्दीर्घलघून् राशींश्च लिखेत् स्वभगणाङ्कान् ॥ २७ ॥

